24 Vajrayaksa

27 Vajramālā

Vajragītā 28

26 Vajralāsī

Vajranṛtyā 29

31 Vajrapuṣpā

Vajrālokā 32

30 Vajradhūpā

Vajragandhā 33

Vajrasphota
36

Vajravesa
37

Vajrapasa
35

Vajrankusa
34



Thousand Buddhas of the Bhadrakalpa

The Twenty Devas

40 Kumāra

39 Nārāyaṇa

東方一

那羅延天種子 [illegible] 三形 八幅輪
尊形青色東一
俱摩羅天 [illegible] 三鈴鐸尊金
色童子形東二
金剛摧東三 [illegible] 三傘蓋尊
肉色
梵天東四 [illegible] 大慈三昧義也
三紅蓮華尊身紅色

四

42 Brahmā

三

41 Vajracchinna

43 Śakra

帝釋 東五 三獨古身金色

48 Piṅgala

47 Ketu

46 Vajrabhakṣaṇa

45 Candra

月天南二 三半月形尊肉色
金剛食南三 三華鬘身肉色
慧星南四 三梧尊赤黑色
今 白肉色云々
熒惑南五 三蓮上宝杖上独古
尊赤色 大鈔云肉色

52 Agni
53 Vaiśravaṇa
44 Āditya
49 Śukra
50 Vāyu
51 Vajravāsin

56 Jaya

Vināyaka 57

Varuṇa 58

54 Vajramukha

Yama 55

59 Tejas

60 Āpaḥ

61 Vāyu

62 Pṛthvī

LITERATURE CITED

Amoghavajra, Eighteen Assemblies

Chin-kan-ting-ching yü-ch'ieh shih-pa hui chih kuei = An Outline of 18 Assemblies of the STTS (T 869, Nj 1448, K 1289).

Amoghavajra, Trilokavijaya-siddhi

Chin-kang-ting yü-ch'ieh chiang-san-shih ch'eng chiu chi shen mi men = *Vajraśekhara-yoga-Trilokavijaya-siddhi-mahāguhya-dvāra (T 1209, Nj 1389, K 1380).

Bailey 1978

H.W. Bailey, Vajrayāna in Gostana-deśa, *The Journal of the International Association of Buddhist Studies,* Madison, Wisconsin 1.1(1978).53-56

Bosch 1929

F.D.K. Bosch, MKAW.68(1929).43-78, translated into English: Buddhist data from Balinese texts, and their contribution to archaeological research in Java, in his *Selected Studies in Indonesian Archaeology,* The Hague (Martinus Nijhoff), 1961.

Esot.

Lokesh Chandra, *The Esoteric Iconography of Japanese Maṇḍalas,* New Delhi (International Academy of Indian Culture), 1972

Fontein 1971

Jan Fontein, R. Soekmono, Satyawati Suleiman, *Ancient Indonesian Art of the Central and Eastern Javanese Periods,* New York (The Asia Society, Inc.)

Hakeda 1972

Yoshito S. Hakeda, *Kūkai: Major Works,* New York and London (Columbia University Press)

K = Korean Tripiṭaka

Lewis R. Lancaster, *The Korean Buddhist Canon: a descriptive catalogue,* Berkeley 1979 (University of California Press)

Lessing/Wayman 1968

Ferdinand D. Lessing and Alex Wayman, *Mkhas-grub-rje's Fundamentals of the Buddhist Tantras,* translated with original text and annotation, The Hague (Mouton & Co)

Lim 1964

K.W. Lim, Studies in later Buddhist iconography, *BKI.*120.327-341

Lokesh Chandra 1979

The Borobudur as a Monument of Esoteric Buddhism, New Delhi (International Academy of Indian Culture, mimeographed)

Lokesh Chandra 1980

Lokesh Chandra, Borobudur: a new interpretation, in *The Stūpa: its religious, historical and architectural significance* (ed. Anna Libera Dallapiccola and Stephanie Zingel-Ave Lallemant), Wiesbaden (Franz Steiner Verlag).

Mallmann 1975

Marie-Therèse de Mallmann, *Introduction à l'Iconographie du Tantrisme bouddhique*, Paris

Manabe/Yamamoto 1975

Shunshō Manabe, *Mikkyō Mandara-no Kenkyū*, Tokyo (Bijutsu Shuppan-sha), with an English résumé by Chikyo Yamamoto.

Nj

Bunyiu Nanjio, *A Catalogue of the Chinese Translation of the Buddhist Tripiṭaka*, Oxford (Clarendon Press), 1883.

Peter 1977

F.A. Peter, Glossary of place-names in Western Tibet, *The Tibet Journal* 2(2).5-37, Dharmashala (Library of Tibetan Works and Archives).

RaghuVira/Lokesh Chandra 1967

RaghuVira & Lokesh Chandra, *A New Tibeto-Mongol Pantheon*, parts 13-15, New Delhi (International Academy of Indian Culture).

Snellgrove 1957

David Snellgrove, *Buddhist Himalaya*, Oxford (Bruno Cassierer).

Snellgrove 1959

D.L. Snellgrove, *The Hevajra Tantra*, parts 1, 2, London (Oxford University Press).

STTS = Sarva-tathāgata-tattva-saṅgraha.

Wayman 1973

Alex Wayman, *The Buddhist Tantras*, New York (Samuel Weiser).

T = Taishō edition of the Sino-Japanese Tripiṭaka

Taishō Shinshū Daizōkyō, ed. Junjirō Takakusu and Kaigyoku Watanabe, vols. 1-55 (Tokyo, 1924-1929).

Toh

Hakuju Ui et al., *A Complete Catalogue of the Tibetan Buddhist Canons* (Bkaḥ-ḥgyur and Bstan-ḥgyur), Sendai (Tohoku Imperial University), 1934.

TZ

Taishō Zuzō-bu, The Tripiṭaka in Chinese (Picture Section), ed. J. Takakusu and G. Ono, Tokyo (The Daizo Shuppan Kabushiki Kwaisha).

Vajrabodhi, Recitation Sūtra

Chin-kang-ting yü-ch'ieh chung lüeh-ch'u nien-sung ching = Sūtra for recitation, extracted from the STTS (T 866, Nj 534, K 429).

Yamada 1980

Isshi Yamada, *Sarva-tathāgata-Tattva-saṅgraha:* a critical edition based on a Sanskrit manuscript and Chinese and Tibetan translations, Śatapiṭaka Series (New Delhi, International Academy of Indian Culture).

PART I

Sarva-tathāgata-mahāyānābhisamaya nāma Mahā-kalpa-rāja

CHAPTER 1

VAJRADHĀTU-MAHĀ-MAṆḌALA-VIDHI-VISTARA

MAṆḌALA I.1

[एवं मया श्रु]तमेकस्मिन् समये भगवान् सर्वतथागत-वज्राधिष्ठानसमयज्ञानविविधविशेषसमन्वागतः, सर्वतथागतरत्नमुकुटत्रैधातुकधर्मराज्याभिषेकप्राप्तः, सर्वतथागतसर्वज्ञानमहायोगीश्वरः, सर्वतथागतसर्वमुद्रासमताधिगतविश्वकार्यकरणताशेषानवशेषसत्त्वधातुसर्वाशापरिपूरकः, महाकृपो वैरोचनः शाश्वतस्त्र्यध्वसमयव्यवस्थितः सर्वकायवाक्चित्तवज्रस्तथागतः, सर्वतथागताध्युषितप्रशस्तस्तविते महामणिरत्नप्रत्युप्ते विचित्रवर्णघण्टावसक्तमारुतोद्धतपट्टस्रक्चामरहारार्धहारचन्द्रोपशोभिते अकनिष्ठदेवराजस्य भवने विजहार। नवनवतिभिर्बोधिसत्त्वकोटिभिः सार्धं, तद्यथा वज्रपाणिना च बोधिसत्त्वेन, अवलोकितेश्वरेण च बोधिसत्त्वेन, आकाशगर्भेण च, वज्रमुष्टिना च, मञ्जुश्रिया च, सहचित्तोत्पादधर्मचक्रप्रवर्तिना च, गगनगञ्जेन च सर्वमारबलप्रमर्दिना च, एवंप्रमुखैर्नवनवतिभिर्बोधिसत्त्वकोटिभिः; गङ्गानदीवालुकासमाख्यातैश्च तथागतैः, तद्यथापि नाम तिलबिम्बमिव परिपूर्णं जम्बूद्वीपे संदृश्यते। तैश्चाप्रमेयैस्तथागतैरेकैकस्माच्च तथागतकायादप्रमेयासंख्येयानि बुद्धक्षेत्राणि संदृश्यन्ते, तेषु च बुद्धक्षेत्रेषु इममेव धर्मनयं देशयन्ति स्म।

अथ भगवान् महावैरोचनः सर्वाकाशधातुसदावस्थितकायवाक्चित्तवज्रः सर्वतथागतसमवसरणतया सर्ववज्रधात्ववबोधनज्ञानसत्त्वः सर्वाकाशधातुपरमाणुरजो वज्राधिष्ठानसम्भवज्ञानगर्भः सर्वतथागतानन्ततया महवज्रज्ञानाभिषेकरत्नः सर्वाकाशस्फरणतथताज्ञानाभिसम्बोध्यभिसम्बोधिभूतः सर्वतथागतात्मभावशुद्धितयास्वभावशुद्धसर्वधर्मः सर्वाकाशचर्याग्र्यः सर्वतथागतामोघाज्ञाकारितया सर्वासमानुत्तरविश्वकर्मा। सर्वतथागतमहाबोधिदृढसत्त्वः सर्वतथागतकर्षणसमयः सर्वतथागतानुरागणज्ञानेश्वरः सर्वतथागतसाधुकारः सर्वतथागतमहाभिषेकरत्नः सर्वतथागतसूर्यप्रभामण्डलः सर्वतथागतचिन्ताराजमणिरत्नकेतुः सर्वतथागतमहाहासः सर्वतथागतमहाशुद्धधर्मः सर्वतथागतप्रज्ञाज्ञानः सर्वतथागतचक्रः सर्वतथागतमहावीर्यसुदृढकवचः सर्वतथागतरक्षपरिपालनवज्रयक्षः सर्वतथागतकायवाक्चित्तवज्रबन्धमुद्राज्ञानः।

Eulogy of Samantabhadra the mahābodhistattva

समन्तभद्रः स्वमोघः मारः प्रामोद्यनायकः।
खगर्भः सु[महाते]जा रत्नकेतुर्महास्मितः ॥१॥
अवलोकितमहेशश्च मञ्जुश्रीः सर्वमण्डलः।
अवाचो विश्वकर्मा च वीर्यश्चण्डो[दृढग्रहः] ॥२॥
वज्रोऽङ्कुशः शरस्तुष्टिः रत्नः सूर्यो ध्वजः स्मितः।
पद्मः कोशः सुचक्रो वाक् कर्म वर्म रवयो ग्रहः ॥३॥
अनादिनिध[नः शान्तो रुद्रः क्रोधो महा]क्षमः।
यक्षः सुराक्षसो धीरः सौरिः सौरिर्महाविभुः ॥४॥
उमापतिः प्रजानाथो विष्णुर्जिष्णुर्महामुनिः।
लोकपालो नभो भूमि[स्त्रिलोक]स्तु त्रिधातुकः ॥५॥
महाभूतः सुसत्त्वार्थः सर्वः शर्वः पितामहः।
संसारो निर्वृतिः शश्वत् सम्यग्वृत्तिर्महामहः ॥६॥

बुद्धः शुद्धो महायानस्त्रिभवः शाश्वतो हि सः ।
त्रिलोकविजयी शम्भुः शम्भुनाथः प्रदामकः ॥७॥

वज्रनाथः सुभूम्यग्र्यो ज्ञानः पारमितानयः ।
विमोक्षो बोधिसत्त्वश्च चर्यः सर्वतथागतः ॥८॥

बुद्धार्थो बुद्धहृदयः सर्वबोधिरनुत्तरः ।
वैरोचनो जिनो नाथः स्वयंभूर्धारणी स्मृतिः ॥९॥

महासत्त्वो महामुद्रः समाधिर्बुद्धकर्मकृत् ।
सर्वबुद्धात्मको भूतः सत्त्वो नित्यार्थबोधकः ॥१०॥

महास्थाणुर्महाकालो महारागो महासुखः ।
महापापो महाग्र्याग्र्यः सर्वाग्र्यो भुवनेश्वरः ॥११॥

भगवान् महाबोधिचित्तः समन्तभद्रो महाबोधिसत्त्वः सर्वतथागतहृदयेषु विजहार। अथ सर्वतथागतैरिदं बुद्धक्षेत्रं तद्यथा तिलबिम्बमिव परिपूर्णम ॥

अथ खलु सर्वतथागता महासमाजमापद्य, येन सर्वार्थसिद्धिर्बोधिसत्त्वो महासत्त्वः बोधिमण्डनिषण्णस्तेनोपजग्मुः। उपेत्य बोधिसत्त्वस्य सांभोगिकैः कायैर्दर्शनन्दत्वैवमाहुः —"कथं कुलपुत्रानुत्तरां सम्यक्सम्बोधिम् अभिसंभोत्स्यसे, यस्त्वं सर्वतथागततत्त्वानभिज्ञतया सर्वदुःकराण्युत्सहसी-?"ति।

अथ सर्वार्थसिद्धिर्बोधिसत्त्वो महासत्वस्सर्वतथागतचोदितःसमानस्तत आस्फानसमाधितो व्युत्थाय, सर्वतथागतान् प्रणिपत्याहू यैवमाह—"भगवन्तस्तथागता आज्ञापयत कथं प्रतिपद्यामि कीदृशं तत् तत्त्वम्" इति। एवमुक्ते सर्वतथागतास्तं बोधिसत्त्वमेककण्ठेनैवमाहुः—"प्रतिपद्यस्व कुलपुत्र स्वचित्तप्रत्यवेक्षणसमाधानेन प्रकृतिसिद्धेन रुचिजप्तेन मन्त्रेण" इति **ओं चित्तप्रतिवेधं करोमि।**

अथ बोधिसत्त्वः सर्वतथागतानेवमाह—"आज्ञातं मे भगवन्तस्तथागताः स्वहृदि चन्द्रमण्डलाकारं पश्यामि।" सर्वतथागताः प्रोचुः—"प्रकृतिप्रभास्वरमिदं कुलपुत्र चित्तं, तद्यथा परिकर्ष्यते तत् तथैव भवति। तद्यथापि नाम श्वेतवस्त्रे रागरञ्जनम्" इति।

अथ सर्वतथागताः प्रकृतिप्रभास्वरचित्तज्ञानस्य स्फीतीकरणहेतोः पुनरपि तस्मै बोधिसत्त्वाय **ओं बोधिचित्तमुत्पादयामि** इत्यनेन प्रकृतिसिद्धेन मन्त्रेण बोधिचित्तमुत्पादितवन्तः।

अथ बोधिसत्त्वः पुनरपि सर्वतथागताज्ञया बोधिचित्तमुत्पाद्यैवमाह—"यत् तच्चन्द्रमण्डलाकारं तच्चन्द्रमण्डलमेव पश्यामि"। सर्वतथागता आहुः—"सर्वतथागतहृदयन्ते समन्तभद्रश्चित्तोत्पादः सामीचीभूतः, तत्साधु प्रतिपद्यताम्, सर्वतथागतसमन्तभद्रचित्तोत्पादस्य दृढीकरणहेतोः स्वहृदि चन्द्रमण्डले वज्रबिम्बं चिन्तयानेन मन्त्रेण **ओं तिष्ठ वज्र**।

बोधिसत्त्व आह—"पश्यामि भगवन्तस्तथागताश्चन्द्रमण्डले वज्रम्"। सर्वतथागता आहुः—"दृढीकुर्विदं सर्वतथागतसमन्तभद्रचित्तवज्रमनेन मन्त्रेण **ओं वज्रात्मकोऽहम्** ॥

अथ यावन्तः सर्वाकाशधातुसमवसरणाः सर्वतथागतकायवाक्चित्तवज्रधातवः, ते सर्वे सर्वतथागताधिष्ठानेन तस्मिन् सत्त्ववज्रे प्रविष्टाः। ततः सर्वतथागतैः स भगवान् सर्वार्थसिद्धिर्महाबोधिसत्त्वो वज्रधातुर्वज्रधातुरिति वज्रनामाभिषेकेणाभिषिक्तः ॥

अथ वज्रधातुर्महाबोधिसत्त्वस्तान् सर्वतथागतानेवमाह "पश्यामि भगवन्तस्तथागताः सर्वतथागतकायमात्मानम्"। सर्वतथागताः प्राहुः—"तेन हि महासत्त्व सत्त्ववज्रं सर्वाकारवरोपेतं बुद्धबिम्बमात्मानं भावयानेन प्रकृतिसिद्धेन मन्त्रेण रुचितः परिजप्य **ओं यथा सर्वतथागतास्तथाहम्**" ॥

अथैवमुक्ते वज्रधातुर्महाबोधिसत्त्वस्तथागतमात्मानमभिसम्बुध्य, तान् सर्वतथागतान् प्रणिपत्याहू यैवमाह "अधितिष्ठत मां भगवन्तस्तथागता इमामभिसंबोधिं दृढीकुरुत चेति"। अथैवमुक्ते सर्वतथागता वज्रधातोस्तथागतस्य तस्मिन् सत्त्ववज्रे प्रविष्टा इति ॥

अथ भगवान् वज्रधातुस्तथागतस्तस्मिन् एव क्षणे सर्वतथागतसमताज्ञानाभिसंबुद्धः सर्वतथागतवज्रसमताज्ञान-मुद्रागुह्यसमयप्रविष्टः सर्वतथागतधर्मसमताज्ञानाधिगमस्वभावशुद्धः सर्वतथागतसर्वसमताप्रकृतिप्रभास्वरज्ञानाकरभूत-स्तथागतोऽर्हान् सम्यक्संबुद्धः संवृत्त इति ।।

अथ सर्वतथागताः पुनरपि ततः सर्वतथागतसत्त्ववज्रान् निःसृत्याकाशगर्भमहामणिरत्नाभिषेकेणाभिषिच्यावलोकि-तेश्वरधर्मज्ञानमुत्पाद्य सर्वतथागतविश्वकर्मतायां प्रतिष्ठाप्य येन सुमेरुगिरिमूर्धा येन च वज्रमणिरत्नशिखरकूटागारस्ते-नोपसंक्रान्ताः, उपसंक्रम्य वज्रधातुन्तथागतं सर्वतथागतत्वेऽधिष्ठच, सर्वतथागतसिंहासने सर्वतोमुखं प्रतिष्ठा-पयामासुरिति ।।

Emanation of the 37 deities from samādhi

अथ खलु अक्षोभ्यस्तथागतो रत्नसंभवश्च तथागतो लोकेश्वरराजश्च तथागतो अमोघसिद्धिश्च तथागतः सर्वतथा-गतत्वं स्वयमात्मन्यधिष्ठाय, भगवतः शाक्यमुनेस्तथागतस्य सर्वसमतासुप्रतिवेधत्वात् सर्वदिक्समतामभ्यालम्ब्य, चतसृषु दिक्षु निषण्णाः ।।

I.1.6 Vajrasattva

अथ भगवान् वैरोचनस्तथागतः अचिराभिसंबुद्धः सर्वतथागतसमन्तभद्रहृदयसर्वतथागताकाशसंभवमहामणि-रत्नाभिषेकाभिषिक्तः सर्वतथागतावलोकितेश्वरधर्मज्ञानपरमपारमिताप्राप्तः सर्वतथागतविश्वकर्मतामोघाप्रतिहत-शासनः परिपूर्णकार्यः परिपूर्णमनोरथः सर्वतथागतत्वं स्वयमात्मन्यधिष्ठाय, सर्वतथागतसमन्तभद्रमहाबोधिसत्त्व-समयसम्भवसत्त्वाधिष्ठानवज्रं नाम समाधिं समापद्येदं सर्वतथागतमहायानाभिसमयं नाम सर्वतथागतहृदयं स्वहृदयान निश्चचार **वज्रसत्त्व** ।।

अथास्मिन् विनिःसृतमात्रे सर्वथागतहृदयेभ्यः स एव भगवां समन्तभद्रश्चन्द्रमण्डलानि भूत्वा विनिःसृत्य, सर्वसत्त्वानां महाबोधिचित्तानि संशोध्य, सर्वतथागतानां सर्वपार्श्वेष्ववस्थिताः । अथ तेभ्यश्चन्द्रमण्डलेभ्यः सर्वतथागतज्ञानवज्राणि विनिःसृत्य, भगवतो वैरोचनस्य तथागतस्य हृदये प्रविष्टानि । समन्तभद्रत्वाच्च सुदृढत्वाच्च वज्रसत्त्वसमाधेः सर्वतथा-गताधिष्ठानेन चैकघनः सकलाकाशधातुसमवसरणप्रमाणो रश्मिमालो पञ्चमूर्धा सर्वतथागतकायवाक्चित्तवज्रमयो वज्रविग्रहः प्रादुर्भूय, सर्वथागतहृदयान् निष्क्रम्य पाणौ प्रतिष्ठितः । अथ ततो वज्राद् वज्राकारा रश्मयो विचित्र-वर्णरूपाः सर्वलोकधात्वाभासनस्फरणा विनिश्चरिताः । तेभ्यश्च वज्ररश्मिमुखेभ्यः सर्वलोकधातुपरमाणुरजःसमास्त-थागतविग्रहा विनिःसृत्य, सकलधर्मधातुसमवसरणेषु सर्वाकाशधातुपर्यवसानेषु सर्वलोकधातुप्रसरमेघसमुद्रेषु सर्वतथागत-समताज्ञानाभिज्ञास्वभिसंबोधात्, सर्वतथागतमहाबोधिचित्तोत्पादनसमन्तभद्रविविधचर्यानिष्पादनसर्वतथागतकुला-रागणमहाबोधिमण्डोपसंक्रमणसर्वमारधर्षणसर्वतथागतसमतामहाबोध्यभिसंबुध्यनधर्मचक्रप्रवर्तनं यावद् अशेषानवशेष-सत्त्वधातुपरित्राणसर्वहितसुखसर्वतथागतज्ञानाभिज्ञोत्तमसिद्धिनिष्पादनादीनि सर्वतथागतविकुर्वितानि सन्दर्श्य, समन्त-भद्रत्वाद् वज्रसत्त्वसमाधेः सुदृढत्वाच्चैकघनः समन्तभद्रमहाबोधिसत्त्वकायः संभूय, भगवतो वैरोचनस्य हृदये स्थित्वेद-मुदानमुदानयामास ।

अहो समन्तभद्रोऽहं दृढसत्त्वः स्वयंभुवां ।
यद् दृढत्वादकायोऽपि सत्त्वकायत्वमागतः ।।

अथ समन्तभद्रमहाबोधिसत्त्वकायो भगवतो हृदयादवतीर्य, सर्वतथागतानां पुरतश्चन्द्रमण्डलाश्रितो भूत्वाज्ञां मार्गयामास ।।

अथ भगवान् सर्वतथागतज्ञानसमयवज्रं नाम समाधिं समापद्य, सर्वतथागतशीलसमाधिप्रज्ञाविमुक्तिविमुक्ति-ज्ञानदर्शनधर्मचक्रप्रवर्तनसत्त्वार्थमहोपायबलवीर्यमहाज्ञानसमयमशेषानवशेषसत्त्वधातुपरित्राणसर्वाधिपत्यसर्वसुखसौमन -स्यानुभवनार्थं यावत् सर्वतथागतसमताज्ञानाभिज्ञानुत्तरमहायानाभिसमयोत्तमसिद्धयवाप्तिफलहेतोस्तत्सर्वतथागत-सिद्धिवज्रं तस्मै समन्तभद्राय महाबोधिसत्त्वाय सर्वतथागतचक्रवर्तित्वे सर्वबुद्धकायरत्नमुकुटपट्टाभिषेकेणाभिषिच्य पाणिभ्यामनुप्रादात् । ततः सर्वतथागतैर्वज्रपाणिर्वज्रपाणिरिति वज्रनामाभिषेकेणाभिषिक्तः ।।

अथ वज्रपाणिर्बोधिसत्त्वो महासत्त्वो वामवज्रगर्वोल्लालनतया तदवज्रं स्वहृद्युत्कर्षणयोगेन धारयन्निदमुदान-मुदानयामास ।

इदं तत्सर्वबुद्धानां सिद्धिवज्रमनुत्तरं।
अहं मम करे दत्तं वज्रं वज्रे प्रतिष्ठितम् ॥ इति ॥

I.1.7 Vajrarāja

अथ भगवान् पुनरप्यमोघराजमहाबोधिसत्त्वसमयसंभवसत्त्वाधिष्ठानवज्रं नाम समाधिं समापद्यदं सर्वतथागताकर्षणसमयन्नाम सर्वतथागतहृदयं स्वहृदयान्निश्चचार **वज्रराज** ॥

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रपाणि सर्वतथागतमहाङ्कुशानि भूत्वा विनिःसृत्य, भगवतो वैरोचनस्य हृदये प्रविष्ट्वैकघनो वज्राङ्कुशमहाविग्रहः प्रादुर्भूय, भगवतः पाणौ प्रतिष्ठितः। अथ ततो वज्राङ्कुशमहाविग्रहात् सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा विनिःसृत्य, सर्वतथागतकर्षणादीनि सर्वबुद्धद्धिविकुर्वितानि कृत्वा, स्वमोघराजत्वाद् वज्रसत्त्वसमाधेः सुदृढत्वाच्चैकघनः अमोघराजमहाबोधिसत्त्वकायः संभूय, भगवतो वैरोचनस्य हृदये स्थित्वेदमुदानमुदानयामास।

अहो ह्यमोघराजाहं वज्रसंभवमङ्कुशः।
यत्सर्वव्यापिनो बुद्धाः समाकृष्यन्ति सिद्धयः ॥ इति ॥

अथ सोऽमोघराजमहाबोधिसत्त्वकायो भगवतो हृदयादवतीर्य, सर्वतथागतानां दक्षिणचन्द्रमण्डलाश्रितो भूत्वा, पुनरप्याज्ञां मार्गयामास ॥

अथ भगवान् सर्वतथागताकर्षणसमयवज्रन्नाम समाधिं समापद्य, सर्वतथागताकर्षणसमयमशेषानवशेषसत्त्वधातुसर्वाकर्षणसर्वसुखसौमनस्यानुभवनार्थं यावत् सर्वतथागतसमाजाधिष्ठानोत्तमसिद्धयर्थं तद्वज्राङ्कुशं तस्मै अमोघराजाय महाबोधिसत्त्वाय तथैव पाणिभ्यामनुप्रादात्। ततः सर्वतथागतैर्वज्राकर्षो वज्राकर्ष इति वज्रनामाभिषेकेणाभिषिक्तः ॥

अथ वज्राकर्षो बोधिसत्त्वस्तेन वज्राङ्कुशेन सर्वतथागतानाकर्षयन्निदमुदानमुदानयामास।

इदं तत्सर्वबुद्धानां वज्रज्ञानमनुत्तरं।
यत्सर्वबुद्धार्थसिद्धयर्थं समाकर्षणमुत्तमम ॥ इति ॥

I.1.8 Vajrarāga

अथ भगवान् पुनरपि मारमहाबोधिसत्त्वसमयसंभवसत्त्वाधिष्ठानवज्रं नाम समाधिं समापद्येदं सर्वतथागतानुरागणसमयन्नाम सर्वतथागतहृदयं स्वहृदयान्निश्चचार **वज्रराग** ॥

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रधरः सर्वतथागतकुसुमायुधानि भूत्वा विनिःसृत्य, भगवतो वैरोचनस्य हृदये प्रविष्ट्वैकघनो महावज्रवाणविग्रहः प्रादुर्भूय, पाणौ प्रतिष्ठितः। अथ ततो वज्रवाणविग्रहात्सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा विनिःसृत्य, सर्वतथागतानुरागणादीनि सर्वबुद्धद्धिविकुर्वितानि कृत्वा, सुमारणत्वाद् वज्रसत्त्वसमाधेः सुदृढत्वाच्चैकघनो मारमहाबोधिसत्त्वकायः संभूय, भगवतो वैरोचनस्य हृदये स्थित्वेदमुदानमुदानयामास।

अहो स्वभावशुद्धोऽहमनुरागः स्वयंभुवां।
यच्छुद्धयर्थं विरक्तानां रागेण विनयन्ति हि ॥

अथ स मारमहाबोधिसत्त्वकायो भगवतो हृदयादवतीर्य सर्वतथागतानां वामचन्द्रमण्डलाश्रितो भूत्वा, पुनरप्याज्ञां मार्गयामास ॥

अथ भगवान् सर्वतथागतानुरागणाधिष्ठानवज्रन्नाम समाधिं समापद्य, सर्वतथागतमारणवज्रसमयमशेषानवशेषत्वधात्वनुरागणस र्सिसुखसौमनस्यानुभवनार्थं यावत् सर्वतथागतमारकर्मोत्तमसिद्धयवाप्तिफलहेतोस्तद्वज्रवाणं तस्मै माराय महाबोधिसत्त्वाय तथैव पाणिभ्यामनुप्रादात्। ततः सर्वतथागतैर्वज्रधनुर्वज्रधनुरिति वज्रनामाभिषेकेणाभिषिक्तः ॥

अथ वज्रधनुर्बोधिसत्त्वो महासत्त्वस्तेन वज्रवाणेन सर्वतथागतान् मारयन्निदमुदानमुदानयामास ।

इदन्तत्सर्वबुद्धानां रागज्ञानमनाविलं ।
हत्वा विरागं रागेण सर्वसौख्यं ददन्ति हि ।।

I.1.9 Vajrasādhu

अथ भगवान् पुनरपि प्रामोद्यराजमहाबोधिसत्त्वसमयसंभवसत्त्वाधिष्ठानवज्रन्नाम समाधिं समापद्येदं सर्वतथागत-प्रमोदसमयन्नाम सर्वतथागतहृदयं स्वहृदयान्निश्चचार **वज्रसाधु** ।।

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रधरः साधुकाराणि भूत्वा, भगवतो वैरोचनस्य हृदये प्रविष्ट्वैकघनो भूत्वा, वज्रतुष्टिविग्रहः प्रादुर्भूय, भगवतः पाणौ प्रतिष्ठितः । अथ ततो वज्रतुष्टिविग्रहात् सर्वलोकधातुपरमाणुरजःसमाः तथागतविग्रहा विनिःसृत्य, सर्वतथागतसाधुकारादीनि सर्वबुद्धर्द्धिविकुर्वितानि कृत्वा, सुप्रामोद्यत्वाद् वज्रसत्त्वसमाधेः सुदृढत्वाच् चैकघनः प्रामोद्यराजमहाबोधिसत्त्वकायः संभूय, भगवतो वैरोचनस्य तथा-गतस्य हृदये स्थित्वेदमुदानमुदानयामास ।

अहो हि साधुकारोऽहं सर्वः सर्वविदां वरः ।
यद् विकल्पप्रहीणानां तुष्टिं जनयति ध्रुवं ।।

अथ स प्रामोद्यराजमहाबोधिसत्त्वकायो भगवतो वैरोचनस्य हृदयादवतीर्य, सर्वतथागतानां पृष्ठतश्चन्द्रमण्डला-श्रितो भूत्वा, पुनरप्याज्ञां मार्गयामास ।।

अथ भगवान् सर्वतथागतसंतोषणवज्रन्नाम समाधिं संपाद्य, सर्वतथागतानुत्तरप्रामोद्यज्ञानसमयशेषानवशेष-सत्त्वधातुसर्वसत्त्वसन्तोषणमहासुखसौमनस्यानुभवनार्थं यावत् सर्वतथागतानुत्तरहर्षरसोत्तमसिद्धिप्राप्तिफलहेतोस्तद्वज्रतुष्टिं तस्मै प्रामोद्यराजाय महाबोधिसत्त्वाय तथैव पाणिभ्यामनुप्रादात् । ततः सर्वतथागतैर्वज्रहर्षो वज्रहर्ष इति वज्रनामा-भिषेकेणाभिषिक्तः ।।

अथ वज्रहर्षो बोधिसत्त्वस्तेन वज्रतुष्टिना सर्वतथागतान् साधुकारैः प्रहर्षयन्निदमुदानमुदानयामास ।

इदं तत्सर्वबुद्धानां साधुकारप्रवर्तकं ।
सर्वतुष्टिकरं वज्रं दिव्यं प्रामोद्यवर्धनम् ।। इति ।।

महाबोधिचित्तं, सर्वतथागतकर्षणसमयः, सर्वतथागतानुरागणज्ञानं, महातुष्टिरिति सर्वतथागतमहासमय-सत्त्वाः ।।

I.1.10 Vajraratna

अथ भगवान् पुनरप्याकाशगर्भमहाबोधिसत्त्वसमयसंभवरत्नाधिष्ठानवज्रन्नाम समाधिं समापद्येदं सर्वतथागता-भिषेकसमयन्नाम सर्वतथागतहृदयं स्वहृदयान्निश्चचार **वज्ररत्न** ।।

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः सर्वाकाशसमताज्ञानसुप्रतिवेधत्वाद् वज्रसत्त्वसमाधेः स एव भगवान् वज्रधरः सर्वाकाशरसमयो भूत्वा विनिःसृतास्, तैः सर्वैः सर्वाकाशरश्मिभिः सर्वलोकधातवोऽवभासिताः, सर्वा-काशधातुसमाः संवृता अभूवन् । अथ सर्वतथागताधिष्ठानेन सर्वोऽसाकाशधातुर्भगवतो वैरोचनस्य हृदये प्रविष्टाः । सुपरिभावितत्वाच्च वज्रसत्त्वसमाधेः सर्वाकाशधातुगर्भमयः सर्वलोकधातुसमवसरणप्रमाणो महावज्ररत्नविग्रहः प्रादु-र्भूय, भगवतः पाणौ प्रतिष्ठितः । अथ तस्माद् वज्ररत्नविग्रहात् सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहाः प्रादुर्भूय, सर्वतथागताभिषेकादीनि सर्वतथागतर्द्धिविकुर्वितानि सर्वलोकधातुषु कृत्वा, सर्वाकाशधातुगर्भसुसंभवत्वाद् वज्रसत्त्वसमाधेः सुदृढत्वाच्चैकघनः आकाशगर्भमहाबोधिसत्त्वकायः संभूय, भगवतो वैरोचनस्य हृदये स्थित्वेदमुदान-मुदानयामास ।

अहो हि स्वभिषेकोऽहं वज्ररत्नमनुत्तरं ।
यन्निःसंगा अपि जिनास्त्रिधातुपतयः स्मृताः ।।

अथ स आकाशगर्भमहाबोधिसत्त्वकायो भगवतो हृदयादवतीर्य, सर्वतथागतानां पुरतश्चन्द्रमण्डलाश्रितो भूत्वा, पुनरप्याज्ञां मार्गयामास ।।

अथ भगवान् सर्वतथागतमणिरत्नवज्रन्नाम समाधिं समापद्य, सर्वतथागताभिप्रायपरिपूर्णसमयमशेषानवशेष-सत्त्वधातुसर्वार्थपरिप्राप्तिसर्वसुखसौमनस्यानुभवनार्थं यावत् सर्वतथागतार्थसंपदुत्तमसिद्धिप्राप्त्यै तं वज्रमणिं तस्मै आकाशगर्भाय महाबोधिसत्त्वाय वज्ररत्नचक्रवर्तित्वे वज्ररत्नाङ्कुराभिषेकेणाभिषिच्य पाणिभ्यामनुप्रादात् । ततः सर्वतथागतैर्वज्रगर्भो वज्रगर्भ इति वज्रनामाभिषेकेणाभिषिक्तः ।

अथ वज्रगर्भो महाबोधिसत्त्वस्तं वज्रमणिं स्वाभिषेकस्थाने स्थापयन्निदमुदानमुदानयामास ।

इदं तत् सर्वबुद्धानां सत्त्वधात्वभिषेचनं ।
अहम्मम करे दत्तं रत्ने रत्नन्नियोजितं ।।

I.1.11 Vajrateja

अथ भगवान् पुनरपि महातेजमहाबोधिसत्त्वसमयसंभवरत्नाधिष्ठानवज्रन्नाम समाधिं समापद्यदं सर्वतथागत-रश्मिसमयन्नाम सर्वतथागतहृदयं स्वहृदयान्निश्चचार **वज्रतेज** ।।

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रपाणिः महासूर्यमण्डलानि भूत्वा, भगवतो वैरोचनस्य हृदये प्रविष्ट्वैकघनो वज्रसूर्यविग्रहः प्रादुर्भूय, भगवतः पाणौ प्रतिष्ठितः । अथ ततो वज्रसूर्यमण्डलात्सर्व-लोकधातुपरमाणुरजःसमाः तथागतविग्रहा विनिःसृत्य, सर्वतथागतरश्मिप्रमुञ्चनादीनि सर्वतथागतर्द्धिविकुर्वितानि कृत्वा, सुमहातेजस्त्वाद् वज्रसत्त्वसमाधेः सुदृढत्वाच्चैकघनो महातेजमहाबोधिसत्त्वकायः संभूय, भगवतो वैरोचनस्य हृदये स्थित्वेदमुदानमुदानयामास ।

अहो ह्यनुपमं तेजः सत्त्वधात्ववभासनं ।
यच्छोधयति शुद्धानां बुद्धानामपि तायिनां ।।

अथ स विमलतेजमहाबोधिसत्त्वकायो भगवतो हृदयादवतीर्य, सर्वतथागतानां दक्षिणचन्द्रमण्डलाश्रितो भूत्वा, पुनरप्याज्ञां मार्गयामास ।।

अथ भगवान् सर्वतथागतप्रभामण्डलाधिष्ठानवज्रन्नाम समाधिं समापद्य, सर्वतथागतरश्मिसमयमशेषानवशेष-सत्त्वधात्वनुपमतेजःसर्वसुखसौमनस्यानुभवनार्थं यावत्सर्वतथागतस्वयंप्रभावाप्त्युत्तमसिद्धये तद्वज्रसूर्यं तस्मै महातेजसे महाबोधिसत्त्वाय तथैव पाणिभ्यामनुप्रादात् । ततः सर्वतथागतैर्वज्रप्रभो वज्रप्रभ इति वज्रनामाभिषेकेणाभिषिक्तः ।।

अथ वज्रप्रभो महाबोधिसत्त्वस्तेन वज्रसूर्येण सर्वतथागतानवभासयन्निदमुदानमुदानयामास ।

इदं तत्सर्वबुद्धानामज्ञानध्वान्तनाशनं ।
परमाणुरजःसंख्यसूर्याधिकतरप्रभम् ।। इति ।।

I.1.12 Vajraketu

अथ भगवान् पुनरपि रत्नकेतुमहाबोधिसत्त्वसमयसंभवरत्नाधिष्ठानवज्रन्नाम समाधिं समापद्येदं सर्वतथागता-शापरिपूरणसमयन्नाम सर्वतथागतहृदयं स्वहृदयान्निश्चचार **वज्रकेतु** ।।

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रधरो विचित्रवर्णरूपालङ्कारसंस्थानाः पताका भूत्वा विनिःसृत्य, भगवतो वैरोचनस्य हृदये प्रविष्ट्वैकघनो वज्रध्वजविग्रहः प्रादुर्भूय, भगवतः पाणौ प्रतिष्ठितः । अथ ततो वज्रध्वजविग्रहात् सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा विनिश्चरित्वा, सर्वतथागतरत्नध्वजोच्छ्रेपणादीनि सर्वबुद्धर्द्धिविकुर्वितानि कृत्वा, महारत्नकेतुत्वाद् वज्रसत्त्वसमाधेः सदृढत्वाच्चैकघनो रत्नकेतुमहाबोधिसत्त्वकायः संभूय, भगवतो वैरोचनस्य तथागतस्य हृदये स्थित्वेदमुदानमुदानयामास ।

अहो ह्यसदृशः केतुरहं सर्वार्थसिद्धीनां ।
यत्सर्वाशापरिपूर्णानां सर्वार्थप्रतिपूरणं ।। इति ।।

अथ स रत्नकेतुर्महाबोधिसत्त्वकायो भगवतो हृदयादवतीर्य, सर्वतथागतानां वामचन्द्रमण्डलाश्रितो भूत्वा, पुनरप्याज्ञां मार्गयामास ॥

अथ भगवान् सर्वतथागतोच्छ्याधिष्ठानवज्रन्नाम समाधिं समापद्य, सर्वतथागतचिन्ताराजमणिध्वजोच्छ्रेपण-समयमशेषानवशेषसत्त्वधातुसर्वाशापरिपूरिसर्वसुखसौमनस्यानुभवनार्थं यावत् सर्वतथागतमहार्थोत्तमसिद्धिप्राप्तिफलहेतोः तद्वज्रध्वजं तस्मै रत्नकेतवे महाबोधिसत्त्वाय तथैव पाणिभ्यामनुप्रादात् । ततः सर्वतथागतैर्वज्रयष्टिर्वज्रयष्टिरिति वज्रनामाभिषेकेणाभिषिक्तः ॥

अथ वज्रयष्टिर्बोधिसत्त्वो महासत्त्वस्तेन वज्रध्वजेन सर्वतथागतान् दानपारमितायान्नियोजयन्निदमुदान-मुदानयामास ।

इदं तत्सर्वबुद्धानां सर्वाशापरिपूरणं ।
चिन्तामणिध्वजन्नाम दानपारमितानयम् ॥ इति ॥

I.1.13 Vajrahāsa

अथ भगवान् पुनरपि नित्यप्रीतिप्रमुदितेन्द्रियमहाबोधिसत्त्वसमयसंभवरत्नाधिष्ठानवज्रन्नाम समाधिं समा-पद्येदं सर्वतथागतप्रीतिसमयन्नाम सर्वतथागतहृदयं स्वहृदयान्निश्चचार **वज्रहास** ॥

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रधरः सर्वतथागतस्मितानि भूत्वा विनिः-सृत्य, भगवतो वैरोचनस्य हृदये प्रविष्ट्वैकघनो वज्रस्मितविग्रहः प्रादुर्भूय, पाणौ प्रतिष्ठितः । अथ ततो वज्रस्मित-विग्रहात् सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहाः सर्वतथागताद्भुतादीनि सर्वबुद्धर्द्धिविकुर्वितानि कृत्वा, नित्य-प्रीतिप्रमुदितेन्द्रियत्वाद् वज्रसत्त्वसमाधेः सुदृढत्वाच्चैकघनो नित्यप्रीतिप्रमुदितेन्द्रियमहाबोधिसत्त्वकायः संभूय, भगवतो वैरोचनस्य हृदये स्थित्वेदमुदानमुदानयामास ।

अहो महाहासमहं सर्वाग्र्याणां महाद्भुतं ।
यत्प्रयुञ्जन्ति बुद्धार्थे सदैव सुसमाहिताः ॥

अथ स नित्यप्रीतिप्रमुदितेन्द्रियमहाबोधिसत्त्वकायो भगवतो हृदयादवतीर्य, सर्वतथागतानां पृष्ठतश्चन्द्रमण्डला-श्रितो भूत्वा, पुनरप्याज्ञां मार्गयामास ॥

अथ भगवान् सर्वतथागताद्भुताधिष्ठानवज्रन्नाम समाधिं समापद्य, सर्वतथागताद्भुतोत्पादसमयमशेषानवशेष-सत्त्वधातुसर्वेन्द्रियानुत्तरसुखसौमनस्यानुभवनार्थं यावत् सर्वतथागतेन्द्रियपरिशोधनज्ञानाभिज्ञावाप्तिफलहेतोस्तद्वज्र-स्मितं तस्मै नित्यप्रीतिप्रमुदितेन्द्रियाय महाबोधिसत्त्वाय तथैव पाणिभ्यामनुप्रादात् । ततः सर्वतथागतैर्वज्रप्रीतिर्वज्र-प्रीतिरिति वज्रनामाभिषेकेणाभिषिक्तः ॥

अथ वज्रप्रीतिर्बोधिसत्त्वो महासत्त्वः तेन वज्रस्मितेन सर्वतथागतान् प्रहर्षयन्निदमुदानमुदानयामास ।

इदन्तत्सर्वबुद्धानामद्भुतोत्पाददर्शकं ।
महाहर्षकरं ज्ञानमज्ञातं परशासिभिर् ॥ इति ॥

महाभिषेकः, व्यामप्रभामण्डलं, महासत्त्वार्थो, महाहर्षश्चेति । सर्वतथागतमहाभिषेकसत्त्वाः ॥

I.1.14 Vajradharma

अथ भगवान् पुनरप्यवलोकितेश्वरमहाबोधिसत्त्वसमयसंभवधर्माधिष्ठानवज्रन्नाम समाधिं समापद्येदं सर्वतथागत-धर्मसमयन्नाम सर्वतथागतहृदयं स्वहृदयान्निश्चचार **वज्रधर्म** ॥

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रधरः स्वभावशुद्धधर्मसमताज्ञानसुप्रतिवेध-त्वात् वज्रसत्त्वसमाधेः सद्धर्मरश्मयो भूत्वा विनिश्चरितः, तैः सद्धर्मरश्मिभिः सर्वलोकधातवोऽवभासिताः, धर्म-धातुमयाः संवृता अभूवन् । स च सकलो धर्मधातुर्भगवतो वरोचनस्य हृदये प्रविष्ट्वैकघनः सर्वाकाशधातुसमवसरण-प्रमाणो महापद्मविग्रहः प्रादुर्भूय, भगवतः पाणौ प्रतिष्ठितः । अथ तस्माद् वज्रपद्मविग्रहात् सर्वलोकधातुपरमाणु-

रजःसमास्तथागतविग्रहा विनिःसृत्य, सर्वतथागतसमाधिज्ञानाभिज्ञादीनि सर्वबुद्धर्द्धिविकुर्वितानि सर्वलोकधातुषु कृत्वा, स्ववलोकनैश्वर्यत्वाद् वज्रसत्त्वसमाधेः सुदृढत्वाच्चैकघनः अवलोकितेश्वरमहाबोधिसत्त्वकायः संभूय, भगवतो वैरोचनस्य तथागतस्य हृदये स्थित्वेदमुदानमुदानयामास ।

अहो हि परमार्थोऽहमादिशुद्धः स्वयंभुवान् ।
यत्कोलोपमधर्माणां विशुद्धिरुपलभ्यते ।।

अथ सोऽवलोकितेश्वरमहाबोधिसत्त्वकायो भगवतो वैरोचनस्य हृदयादवतीर्य, सर्वतथागतानां पुरतश्चन्द्रमण्डलाश्रितो भूत्वा, पुनरप्याज्ञां मार्गयामास ।।

अथ भगवान् सर्वतथागतसमाधिज्ञानसमयवज्रन्नाम समाधिं समापद्य, सर्वतथागतविशोधनसमयमशेषानवशेषसत्त्वात्मपरिशुद्धिसर्वसुखसौमनस्यानुभवनार्थं यावत् सर्वतथागतधर्मज्ञानाभिज्ञावाप्तिफलहेतोस्तद्वज्रपद्मं तस्म अवलोकितेश्वराय महाबोधिसत्त्वाय सद्धर्मचक्रवर्तित्वे सर्वतथागतधर्मकायाभिषेकेणाभिषिच्य, पाणिभ्यामनुप्रादात । ततः सर्वतथागतैर्वज्रनेत्रो वज्रनेत्र इति वज्रनामाभिषेकेणाभिषिक्तः ।।

अथ वज्रनेत्रो बोधिसत्त्वो महासत्त्वः तद्वज्रपद्मं पत्रविकासनतया रागविशुद्धिनिर्लेपस्वभावावलोकनतथावलोकयन्निदमुदानमुदानयामास ।

इदं तत्सर्वबुद्धानां रागतत्त्वावबोधनं ।
अहं मम करे दत्तं धर्मं धर्मे प्रतिष्ठितम ।। इति ।।

I.1.15 Vajratīkṣṇa

अथ भगवान् पुनरपि मञ्जुश्रीमहाबोधिसत्त्वसमयसंभवधर्माधिष्ठानवज्रं नाम समाधिं समापद्यदं सर्वतथागतमहाप्रज्ञाज्ञानसमयन्नाम सर्वतथागतहृदयं स्वहृदयान्निश्चचार **वज्रतीक्ष्ण** ।।

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रधरः प्रज्ञाशस्त्राणि भूत्वा विनिःसृत्य, भगवतो वैरोचनस्य हृदये प्रविष्ट्वैकघनो वज्रकोशविग्रहः प्रादुर्भूय, भगवतः पाणौ प्रतिष्ठितः । अथ ततो वज्रकोशविग्रहात् सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा विनिश्चरित्वा, सर्वतथागतप्रज्ञाज्ञानादीनि सर्वबुद्धर्द्धिविकुर्वितानि कृत्वा, सुमञ्जुश्रियत्वात् वज्रसत्त्वसमाधेः सुदृढत्वाच्चैकघनो मञ्जुश्रीमहाबोधिसत्त्वकायः संभूय, भगवतो वैरोचनस्य हृदये स्थित्वेदमुदानमुदानयामास ।

अहो हि सर्वबुद्धानां मञ्जुघोषमहं स्मृतः ।
यत्प्रज्ञाया अरूपिण्या घोषत्वमुपलभ्यते ।।

अथ स मञ्जुश्रीमहाबोधिसत्त्वकायो भगवतो हृदयादवतीर्य, सर्वतथागतानां दक्षिणचन्द्रमण्डलाश्रितो भूत्वा, पुनरप्याज्ञां मार्गयामास ।।

अथ भगवान् सर्वतथागतप्रज्ञाज्ञानवज्रं नाम समाधिं समापद्य, सर्वतथागतक्लेशच्छेदनसमयमशेषानवशेषसत्त्वधातुसर्वदुःखच्छेदनसर्वसुखसौमनस्यानुभवनार्थं यावत् सर्वतथागतघोषानुगप्रज्ञापारिपूर्युत्तमसिद्धयर्थं तस्मै मञ्जुश्रिये महाबोधिसत्त्वाय तद्वज्रकोशं तथैव पाणिभ्यामनुप्रादात् । ततः सर्वतथागतैर्वज्रबुद्धिर्वज्रबुद्धिरिति वज्रनामाभिषेकेणाभिषिक्तः ।।

अथ स वज्रबुद्धिर्बोधिसत्त्वो महासत्त्वः तेन वज्रकोशेन सर्वतथागतान् प्रहरन्निदमुदानमुदानयामास ।

इदं तत्सर्वबुद्धानां प्रज्ञापारमितानयं ।
छेत्तारं सर्वशत्रूणां सर्वपापहरं परम् ।। इति ।।

I.1.16 Vajrahetu

अथ भगवान् पुनरपि सहचित्तोत्पादितधर्मचक्रप्रवर्तिमहाबोधिसत्त्वसमयसंभवधर्माधिष्ठानवज्रं नाम समाधिं समापद्येदं सर्वतथागतचक्रसमयन्नाम सर्वतथागतहृदयं स्वहृदयान्निश्चचार **वज्रहेतु** ।।

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रधरो वज्रधातुमहामण्डलादीनि सर्वतथागतमण्डलानि भूत्वा विनिःसृत्य, भगवतो वैरोचनस्य हृदये प्रविष्ट्वैकघनो वज्रचक्रविग्रहः प्रादुर्भूय, भगवतः पाणौ प्रतिष्ठितः। अथ ततो वज्रचक्रविग्रहात् सर्वलोकधातुपरमाणुरजःसमाः तथागतविग्रहा विनिश्चरित्वा, सहचित्तोत्पादधर्मचक्रप्रवर्तनादीनि सर्वबुद्धद्धिविकुर्वितानि सर्वलोकधातुषु कृत्वा, सहचित्तोत्पादधर्मचक्रप्रवर्तनत्वाद् वज्रसत्त्वसमाधेः सुदृढत्वाच्चैकघनः सहचित्तोत्पादितधर्मचक्रप्रवर्तिमहाबोधिसत्त्वकायः संभूय, भगवतो वैरोचनस्य हृदये स्थित्वेदमुदानमुदानयामास।

अहो वज्रमयं चक्रमहं वज्राग्रधर्मिणाम्।
यच्चित्तोत्पादमात्रेण धर्मचक्रं प्रवर्तते ॥

अथ स सहचित्तोत्पादितधर्मचक्रप्रवर्तिमहाबोधिसत्त्वकायो भगवतो हृदयादवतीर्य, सर्वतथागतानां वामचन्द्रमण्डलाश्रितो भूत्वा, पुनरप्याज्ञां मार्गयामास ॥

अथ भगवान् सर्वतथागतचक्रवज्रन्नाम समाधिं समापद्य, सर्वतथागतमहामण्डलसमयं शेषानवशेषसत्त्वधातुप्रवेशावैवर्तिकचक्रसर्वसुखसौमनस्यानुभवनार्थं यावत् सर्वतथागतसद्धर्मचक्रप्रवर्तनोत्तमसिद्धिनिमित्तं तद्वज्रचक्रं तस्मै सहचित्तोत्पादितधर्मचक्रप्रवर्तिने महाबोधिसत्त्वाय तथैव पाणिभ्यामनुप्रादात्। ततः सर्वतथागतैर्वज्रमण्डो वज्रमण्ड इति वज्रनामाभिषेकेणाभिषिक्तः ॥

अथ वज्रमण्डो बोधिसत्त्वो महासत्त्वस्तेन वज्रचक्रेण सर्वतथागतानवैवर्तिकत्वे प्रतिष्ठापयन्निदमुदानमुदानयामास।

इदं तत् सर्वबुद्धानां सर्वधर्मविशोधकम्।
अवैवर्तिकचक्रन्तु बोधिमण्डमिति स्मृतम ॥ इति ॥

I.1.17 Vajrabhāṣa

अथ भगवानवाचमहाबोधिसत्त्वसमयसंभवधर्माधिष्ठानवज्रन्नाम समाधिं समापद्येदं सर्वतथागतजापसमयं नाम सर्वतथागतहृदयं स्वहृदयान्निश्चचार **वज्रभाष** ॥

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रपाणिः सर्वतथागतधर्माक्षराणि भूत्वा विनिःसृत्य, भगवतो वैरोचनस्य हृदये प्रविष्ट्वैकघनो वज्रजापविग्रहः प्रादुर्भूय, भगवतः पाणौ प्रतिष्ठितः। अथ ततो वज्रजापविग्रहात्सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा विनिःसृत्य, सर्वतथागतधर्मतादीनि सर्वबुद्धद्धिविकुर्वितानि कृत्वा स्ववाचत्वाद् वज्रसत्त्वसमाधेः सुदृढत्वाच्चैकघनः अवाचमहाबोधिसत्त्वकायः संभूय, भगवतो वैरोचनस्य हृदये स्थित्वेदमुदानयामास।

अहो स्वयंभुवां गुह्यं सन्धाभाषमहं स्मृतः।
यद् देशयन्ति सद्धर्मं वाक्प्रपञ्चविवर्जितं ॥

अथ स अवाचमहाबोधिसत्त्वकायो भगवतो हृदयादवतीर्य, सर्वतथागतानां पृष्ठतश्चन्द्रमण्डलाश्रितो भूत्वा, पुनरप्याज्ञां मार्गयामास।

अथ भगवान् सर्वतथागतगुह्यवाग्वज्रं नाम समाधिं समापद्य, सर्वतथागतवाग्ज्ञानसमयं अशेषानवशेषसत्त्वधातुवाक्सिद्धिसर्वसुखसौमनस्यानुभवनार्थं यावत्सर्वतथागतवाग्गुह्यताप्राप्त्युत्तमसिद्धये तद्वज्रजापं तस्मै अवाचाय महाबोधिसत्त्वाय तथैव पाणिभ्यामनुप्रादात्। ततः सर्वतथागतैर्वज्रवाचो वज्रवाच इति वज्रनामाभिषेकेणाभिषिक्तः ॥

अथ वज्रवाचो बोधिसत्त्वो महासत्त्वस्तेन वज्रजापेन सर्वतथागतान् संल्लापयन्निदमुदानमुदानयामास।

इदं तत्सर्वबुद्धानां वज्रजापमुदाहृतं।
सर्वतथागतानां तु मन्त्राणामाशुसाधनम् ॥ इति ॥

वज्रधर्मताज्ञानं, सर्वतथागतप्रज्ञाज्ञानं, महाचक्रप्रवर्तनज्ञानं, सर्वतथागतवाक्प्रपञ्चविनिवर्तनज्ञानं चेति। सर्वतथागतमहाज्ञानसत्त्वाः ॥

I.1.18 Vajrakarma

अथ भगवान् सर्वतथागतविश्वकर्ममहाबोधिसत्त्वसमयसंभवकर्माधिष्ठानवज्रं नाम समाधिं समापद्य, इदं सर्वतथागतकर्मसमयन्नाम सर्वतथागतहृदयं स्वहृदयान्निश्चचार **वज्रकर्म** ॥

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः सर्वकर्मसमताज्ञानसुप्रतिवेधत्वात् वज्रसत्त्वसमाधेः स एव भगवन् वज्रधरः सर्वतथागतकर्मसमयो भूत्वा विनिःसृतः, तैश्च सर्वतथागतकर्मरश्मिभिः सर्वलोकधातवो भासिताः, सर्वतथागतकर्मधातुमयाः संवृत्ताः, स सकलः सर्वतथागतकर्मधातुर्भगवतो वैरोचनस्य हृदये प्रविष्ट्वैकघनः सर्वाकाशधातुसमवसरणप्रमाणस्ततः सर्वतथागतकर्मधातुतः कर्मवज्रविग्रहः प्रादुर्भूय, भगवतः पाणौ प्रतिष्ठितः । अथ ततः कर्मवज्रविग्रहात् सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा विनिःसृत्य, सर्वलोकधातुषु सर्वतथागतकर्मादीनि सर्वबुद्धद्धिविकुर्वितानि कृत्वा, सर्वतथागतानन्तकर्मत्वाद्वज्रसत्त्वसमाधेः सुदृढत्वाच्चैकघनः सर्वतथागतविश्वकर्ममहाबोधिसत्त्वकायः संभूय, भगवतो वैरोचनस्य हृदये स्थित्वेदमुदानमुदानयामास ।

अहो ह्यमोघं बुद्धानां सर्वकर्ममहं बहु ।
यदनाभोगबुद्धार्थं वज्रकर्म प्रवर्तते ॥

अथ स सर्वतथागतविश्वकर्ममहाबोधिसत्त्वकायो भगवतो हृदयादवतीर्य, सर्वतथागतानां पुरतश्चन्द्रमण्डलाश्रितो भूत्वा, पुनरप्याज्ञां मार्गयामास ॥

अथ भगवान् सर्वतथागतामोघवज्रं नाम समाधिं समापद्य, सर्वतथागतपूजाप्रवर्तनाद्यप्रमेयामोघसर्वकर्मविधिविस्तरसमयशेषानवशेषसत्त्वधातुसर्वकर्मसिद्धिसर्वसुखसौमनस्यानुभवनार्थं यावत् सर्वतथागतवज्रकर्मताज्ञानाभिज्ञोत्तमसिद्धिफलहेतोस्तत्कर्मवज्रं तस्मै सर्वतथागतविश्वकर्मणे महाबोधिसत्त्वाय सर्वकर्मचक्रवर्तित्वे सर्वतथागतवज्राभिषेकेणाभिषिच्य, पाणिभ्यामनुप्रादात् । ततः सर्वतथागतैर्वज्रविश्वो वज्रविश्व इति वज्रमहाभिषेकेणाभिषिक्तः ॥

अथ वज्रविश्वो बोधिसत्त्वो महासत्वस्तद्वज्रं स्वहृदि स्थाप्य, सर्वतथागतकर्मतायान्नियोजयन्निदमुदानमुदानयामास ।

इदं तत्सर्वबुद्धानां विश्वकर्मकरं परं ।
अहं मम करे दत्तं विश्वे विश्वं नियोजितम् ॥ इति ॥

I.1.19 Vajrarakṣa

अथ भगवान् दुर्योधनवीर्यमहाबोधिसत्त्वसमयसंभवकर्माधिष्ठानवज्रं नाम समाधिं समापद्येदं सर्वतथागतरक्षासमयन्नाम सर्वतथागतहृदयं स्वहृदयान्निश्चचार **वज्ररक्ष** ॥

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रापाणिर्दृढकवचानि भूत्वा विनिःसृत्य, भगवतो वैरोचनस्य हृदये प्रविष्ट्वैकघनो महावज्रकवचविग्रहः प्रादुर्भूय, भगवतः पाणौ प्रतिष्ठितः । अथ ततो वज्रकवचविग्रहात्सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा विनिःसृत्य, सर्वतथागतरक्षाविधिविस्तरकर्मादीनि सर्वबुद्धद्धिविकुर्वितानि कृत्वा, दुर्योधनवीर्यत्वाद् वज्रसत्त्वसमाधेः सुदृढत्वाच्चैकघनो दुर्योधनवीर्यमहाबोधिसत्त्वविग्रहः संभूय, भगवतो वैरोचनस्य हृदये स्थित्वेदमुदानमुदानयामास ।

अहो वीर्यमयो वर्मः सुदृढोऽहं दृढात्मनां ।
यद् दृढत्वादकायानां वज्रकायकरं परं ॥

अथ स दुर्योधनवीर्यमहाबोधिसत्त्वकायो भगवतो हृदयादवतीर्य, सर्वतथागतानां दक्षिणचन्द्रमण्डलाश्रितो भूत्वा, पुनरप्याज्ञां मार्गयामास ॥

अथ भगवान् सर्वतथागतदृढवज्रन्नाम समाधिं समापद्य, सर्वतथागतवीर्यपारमितासमयमशेषानवशेषसत्त्वधातुपरित्राणसर्वसुखसौमनस्यानुभवनार्थं यावत्सर्वतथागतवज्रकायप्राप्त्युत्तमसिद्धिहेतोस्तद्वज्रवर्म तस्मै दुर्योधनवीर्याय महाबोधिसत्त्वाय पाणिभ्यामनुप्रादात् । ततः सर्वतथागतैर्वज्रमित्रो वज्रमित्र इति वज्रनामाभिषेकेणाभिषिक्तः ॥

अथ वज्रमित्रो बोधिसत्त्वो महासत्त्वः तेन वज्रवर्मेण सर्वतथागतान् कवचयन्निदमुदानमुदानयामास ।

इदं तत्सर्वबुद्धानां मैत्रीकवचमुत्तमं ।
दृढवीर्यमहारक्षं महामित्रमुदाहृतम ।। इति ।।

I.1.20 Vajrayakṣa

अथ भगवान् पुनरपि सर्वमारप्रमर्दिमहाबोधिसत्त्वसमयसंभवकर्माधिष्ठानवज्रनाम समाधिं समापद्येदं सर्वतथागतोपायसमयं नाम सर्वतथागतहृदयं स्वहृदयान्निश्चचार **वज्रयक्ष** ।।

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रधरो महादंष्ट्रायुधानि भूत्वा विनिःसृत्य, भगवतो वैरोचनस्य हृदये प्रविष्ट्वैकघनो वज्रदंष्ट्राविग्रहः प्रादुर्भूय, पाणौ प्रतिष्ठितः । अथ ततो वज्रदंष्ट्राविग्रहात् सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा विनिश्चरित्वा, सर्वतथागतरौद्रविनयादीनि सर्वबुद्धर्द्धिविकुर्वितानि कृत्वा, सर्वमारसुप्रमर्दित्वाद् वज्रसत्त्वसमाधेः सुदृढत्वाच्चैकघनः सर्वमारप्रमर्दिमहाबोधिसत्त्वकायः संभूय, भगवतो वैरोचनस्य हृदये स्थित्वेदमुदानमुदानयामास ।

अहो महोपायमहं बुद्धानां करुणात्मनां ।
यत्सत्त्वार्थतया शान्ता रौद्रत्वमपि कुरुवते ।।

अथ स सर्वमारप्रमर्दिमहाबोधिसत्त्वकायो भगवतो हृदयादवतीर्य, सर्वतथागतानां वामचन्द्रमण्डलाश्रितो भूत्वा, पुनरप्याज्ञां मार्गयामास ।।

अथ भगवान् सर्वतथागतप्रचण्डवज्रनाम समाधिं समापद्य, सर्वतथागतदुष्टविनयसमयमशेषानवशेषसत्त्वधात्वभयसर्वसुखसौमनस्यानुभवनार्थं यावत्सर्वतथागतमहोपायज्ञानाभिज्ञावाप्त्युत्तमसिद्धिफलहेतोस्तद्वज्रदंष्ट्रायुधं तस्मै सर्वमारप्रमर्दिने महाबोधिसत्त्वाय तथैव पाणिभ्यामनुप्रादात् । ततः सर्वतथागतैर्वज्रचण्डो वज्रचण्ड इति वज्रनामाभिषेकेणाभिषिक्तः ।।

अथ वज्रचण्डो बोधिसत्त्वो महासत्त्वस्तद्वज्रदंष्ट्रायुधं स्वमुखे प्रतिष्ठाप्य, सर्वतथागतान् भीषयन्निदमुदानमुदानयामास ।

इदं तत् सर्वबुद्धानां सर्वदुष्टाग्रदामकं ।
वज्रदंष्ट्रायुधं तीक्ष्णमुपायः करुणात्मनाम् ।। इति ।।

I.1.21 Vajrasandhi

अथ भगवान् पुनरपि सर्वतथागतमुष्टिमहाबोधिसत्त्वसमयसंभवकर्माधिष्ठानवज्रं नाम समाधिं समापद्येदं सर्वतथागतकायवाक्चित्तवज्रबन्धसमयन्नाम सर्वतथागतहृदयं स्वहृदयान्निश्चचार **वज्रसन्धि** ।।

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रधरः सर्वतथागतसर्वमुद्राबन्धा भूत्वा विनिःसृत्य, भगवतो वैरोचनस्य हृदये प्रविष्ट्वैकघनो वज्रबन्धविग्रहः प्रादुर्भूय, पाणौ प्रतिष्ठितः । अथ ततो वज्रबन्धविग्रहात् सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा विनिश्चरित्वा, सर्वलोकधातुषु सर्वतथागतमुद्राज्ञानादीनि सर्वबुद्धर्द्धिविकुर्वितानि कृत्वा, सर्वतथागतमहामुष्टिसुबन्धत्वाद् वज्रसत्त्वसमाधेः सुदृढत्वाच्चैकघनः सर्वतथागतमुष्टिमहाबोधिसत्त्वकायः संभूय, भगवतो वैरोचनस्य हृदये स्थित्वेदमुदानमुदानयामास ।

अहो हि सुदृढो बन्धः समयोऽहं दृढात्मनां ।
यत्सर्वाशाप्रसिद्धचर्थं मुक्तानामपि बन्धनं ।।

अथ सर्वतथागतमुष्टिमहाबोधिसत्त्वकायो भगवतो हृदयादवतीर्य, सर्वतथागतानां पृष्ठतश्चन्द्रमण्डलाश्रितो भूत्वा, पुनरप्याज्ञां मार्गयामास ।।

अथ भगवान् सर्वतथागतसमयवज्रनाम समाधिं समापद्य, सर्वतथागतमुद्राबन्धसमयमशेषानवशेषसत्त्वधातुसर्वतथागतदेवतासान्निध्यकल्पनात् सर्वसिद्धिसुखसौमनस्यानुभवनार्थं यावत्सर्वतथागतसर्वज्ञानमुद्राधिपत्योत्तमसिद्धिफलहेतोस्तद्वज्रबन्धं तस्मै सर्वतथागतमुष्टये महाबोधिसत्त्वाय तथैव पाणिभ्यामनुप्रादात् । ततः सर्वतथागतैर्वज्रमुष्टिर्वज्रमुष्टिरिति वज्रनामाभिषेकेणाभिषिक्तः ।।

अथ स वज्रमुष्टिर्बोधिसत्त्वो महासत्त्वः तेन वज्रबन्धेन सर्वतथागतान् बन्धयन्निदमुदानमुदानयामास ।

इदं तत्सर्वबुद्धानां मुद्राबन्धं महादृढं ।
यत्सर्वबुद्धाशुसिद्धचर्थं समयो दुरतिक्रमः ।। इति ।।

सर्वतथागतपूजाविधिविस्तरकर्म, महावीर्यदृढकवचः, सर्वतथागतमहोपायः, सर्वमुद्राज्ञानं चेति । सर्वतथागत-महाकर्मसत्त्वाः ।।

I.1.22 Sattvavajrī

अथ खल्वक्षोभ्यस्तथागतो भगवतो वैरोचनस्य तथागतस्य सर्वतथागतज्ञानानि निष्पाद्य, सर्वतथागतज्ञान-मुद्रणार्थं वज्रपारमितासमयोद्भववज्राधिष्ठानं नाम समाधिं समापद्येमां सर्वतथागतवज्रसमयां नाम सर्वतथागत-मुद्रां स्वहृदयान्निश्चचार **सत्त्ववज्रि** ।।

अथास्यां विनिःसृतमात्रायां सर्वतथागतहृदयेभ्यो वज्ररश्मयो विनिश्चरिताः । तेभ्यश्च वज्ररश्मिभ्यः स एव भगवान् वज्रधरः सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा भूत्वा, सर्वतथागतवज्रपारमिताज्ञानान्यामुद्रच, पुनरप्येकघनः सर्वलोकधातुसमवसरणप्रमाणो महावज्रविग्रहः प्रादुर्भूय, भगवतो वैरोचनस्य पुरतश्चन्द्रमण्डलाश्रितो भूत्वा, इदमुदानमुदानयामास ।

अहो हि सर्वबुद्धानां सत्त्ववज्रमहं दृढः ।
यद् दृढत्वादकायोऽपि वज्रकायत्वमागतः ।। इति ।।

I.1.23 Ratnavajrī

अथ भगवान् रत्नसंभवस्तथागतः भगवतो वैरोचनस्य तथागतस्य सर्वतथागतज्ञानमुद्रणार्थं रत्नपारमिता-समयसंभववज्राधिष्ठानं नाम समाधिं समापद्येमां वज्ररत्नसमयां नाम स्वमुद्रां स्वहृदयान्निश्चचार **रत्नवज्रि** ।।

अथास्यां विनिःसृतमात्रायां सर्वतथागतहृदयेभ्यो रत्नरश्मयो विनिश्चरिताः । तेभ्यो रत्नरश्मिभ्यः स एव भगवान् वज्रधरः सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा भूत्वा, सर्वतथागतज्ञानान्यामुद्रच, पुनरप्येकघनः सर्वलोकधातुसमवसरणप्रमाणो महावज्ररत्नविग्रहः प्रादुर्भूय, भगवतो वैरोचनस्य दक्षिणपार्श्वे चन्द्र-मण्डलाश्रितो भूत्वा, इदमुदानमुदानयामास ।

अहो हि सर्वबुद्धानां रत्नवज्रमहं स्मृतं ।
यन्मुद्राणां हि सर्वासामभिषेकनयं दृढम् ।। इति ।।

I.1.24 Dharmavajrī

अथ भगवान् लोकेश्वरराजस्तथागतो भगवतो वैरोचनस्य तथागतस्य सर्वतथागतज्ञानमुद्रणार्थं धर्मपारमिता-समयोद्भववज्राधिष्ठानं नाम समाधिं समापद्येमां धर्मसमयां नाम स्वमुद्रां स्वहृदयान्निश्चचार **धर्मवज्रि** ।।

अथास्यां विनिःसृतमात्रायां सर्वतथागतहृदयेभ्यः पद्मरश्मयो विनिश्चरिताः । तेभ्यः पद्मरश्मिभ्यः स एव भगवान् वज्रधरः सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा भूत्वा, सर्वतथागतज्ञानान्यामुद्रच, पुनरप्येकघनः सर्वलोकधातुसमवसरणप्रमाणो महावज्रपद्मविग्रहः प्रादुर्भूय, भगवतो वैरोचनस्य पृष्ठतश्चन्द्रमण्डलाश्रितो भूत्वे-दमुदानमुदानयामास ।

अहो हि सर्वबुद्धानां धर्मवज्रं अहं शुचिः ।
यत्स्वभावविशुद्धचा वै रागोऽपि हि सुनिर्मलः ।। इति ।।

I.1.25 Karmavajrī

अथ भगवानमोघसिद्धिस्तथागतो भगवतो वैरोचनस्य तथागतस्य सर्वतथागतज्ञानमुद्रणार्थं कर्मपारमिता-संभववज्राधिष्ठानं नाम समाधिं समापद्येमां सर्वतथागतकर्मसमयां नाम स्वमुद्रां स्वहृदयान्निश्चचार **कर्मवज्रि** ।।

अथास्यां विनिःसृतमात्रायां सर्वतथागतहृदयेभ्यः सर्वकर्मरश्मयो विनिश्चरिताः। तेभ्यश्च सर्वतथागतकर्मरश्मिभ्यः स एव भगवान् वज्रधरः सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा भूत्वा, सर्वतथागतज्ञानान्यामुद्रच्य, पुनरप्येकघनः सर्वलोकधातुसमवसरणप्रमाणः सर्वतोमुखो महाकर्मवज्रविग्रहः प्रादुर्भूय, भगवतो वैरोचनस्य वामपार्श्वे चन्द्रमण्डलाश्रितो भूत्वा, इदमुदानमुदानयामास।

अहो हि सर्वबुद्धानां कर्मवज्रमहं बहु।
यदेकः सन्नशेषस्य सत्त्वधातोः सुकर्मकृद्॥ इति॥

सर्वतथागतज्ञानसमया, महाभिषेका, वज्रधर्मता, सर्वपूजा चेति। सर्वतथागतपारमिताः॥

I.1.26 Vajralāsyā

अथ भगवान् वैरोचनः पुनरपि सर्वतथागतरतिपूजासमयसंभववज्रन्नाम समाधिं समापद्य इमां सर्वतथागतकुलमहादेवीं स्वहृदयान्निश्चचार **वज्रलास्ये**॥

अथास्यां विनिःसृतमात्रायां सर्वतथागतहृदयेभ्यो वज्रमुद्रा विनिःसृताः। तेभ्यो वज्रमुद्रामुखेभ्यः स एव भगवान् वज्रधरः सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा भूत्वा, पुनरप्येकघना महादेवी वज्रसत्त्वसदृशात्मभावा विचित्रवर्णरूपलिङ्गेर्यापथा सर्वालङ्कारविभूषिता सर्वतथागतकुलसंग्रहभूता वज्रसत्त्वदयिता संभूय, भगवतोऽक्षोभ्यमण्डलवामपार्श्वे चन्द्रमण्डलाश्रिता भूत्वा, इदमुदानमुदानयामास।

अहो न सदृशी मेऽस्ति पूजा ह्यन्या स्वयंभुवां।
यत्कामरतिपूजाभिः सर्वपूजा प्रवर्तते॥ इति॥

I.1.27 Vajramālā

अथ भगवान् पुनरपि सर्वतथागतरत्नमालाभिषेकसमयोद्भववज्रन्नाम समाधिं समापद्य इमां सर्वतथागतकुलमहादेवीं स्वहृदयान्निश्चचार **वज्रमाले**।

अथास्यां विनिःसृतमात्रायां सर्वतथागतहृदयेभ्यो महारत्नमुद्रा विनिःसृताः। ताभ्यो महारत्नमुद्राभ्यः स एव भगवान् वज्रधरः सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा भूत्वा, एकघनां वज्रमालां महादेवीं तथैव संभूय, भगवतो रत्नसंभवमण्डलवामपार्श्वे पूर्णचन्द्रमण्डलाश्रिता भूत्वेदमुदानमुदानयामास।

अहो ह्यसदृशाहं वै रत्नपूजेति कीर्तिता।
यत्त्रैधातुकराज्याग्र्यं शासयन्ति प्रपूजिता॥ इति॥

I.1.28 Vajragītā

अथ भगवान् पुनरपि सर्वतथागतसंगीतिसमयसंभववज्रन्नाम समाधिं समापद्य इमां सर्वतथागतकुलमहादेवीं स्वहृदयान्निश्चचार **वज्रगीते**॥

अथास्यां विनिःसृतमात्रायां सर्वतथागतहृदयेभ्यः सर्वतथागतधर्ममुद्रा विनिश्चरिताः। ताभ्यश्च सर्वतथागतधर्ममुद्राभ्यः स एव भगवान् वज्रधरः सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा भूत्वा, पुनरप्येकघनां वज्रगीतां महादेवीं संभूय, भगवतो लोकेश्वरराजमण्डलवामपार्श्वे चन्द्रमण्डलाश्रिता भूत्वेदमुदानमुदानयामास।

अहो हि संगीतिमयी पूजाहं सर्वदर्शिनां।
यत् तोषयन्ति पूजाभिः प्रतिश्रुत्कोपमेष्वपि॥ इति॥

I.1.29 Vajranṛtyā

अथ भगवान् पुनरपि सर्वतथागतनृत्यपूजासमयोद्भववज्रं नाम समाधिं समापद्य इमां सर्वतथागतकुलमहादेवीं स्वहृदयान्निश्चचार **वज्रनृत्ये**॥

अथास्मिन विनिःसृतमात्रायां सर्वतथागतहृदयेभ्यः सर्वतथागतनृत्यपूजाविधिविस्तरा भूत्वा विनिःसृताः।

तेभ्यश्च सर्वतथागतसर्वनृत्तपूजाविधिविस्तरेभ्यः स एव भगवान् वज्रधरः सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा भूत्वा, पुनरप्येकघनां वज्रनृत्तमहादेवीं संभूय, भगवतो अमोघसिद्धेस्तथागतस्य मण्डलवामपार्श्वे पूर्णचन्द्रमण्डलाश्रिता भूत्वेदमुदानमुदानयामास।

अहो ह्यु दारपूजाहं सर्वपूजार्थकरिणां।
यद्वज्रनृत्तविधिना बुद्धपूजा प्रकल्प्यते ॥ इति ॥

सर्वतथागतानुत्तरसुखसौमनस्यसमया, सर्वतथागतमाला, सर्वतथागतगाथा, सर्वतथागतानुत्तरपूजाकर्मकरी चेति। सर्वतथागतगुह्यपूजाः॥

I.1.30 Vajradhūpā

अथ पुनरपि भगवान् अक्षोभ्यस्तथागतो भगवतो वैरोचनस्य तथागतस्य पूजाप्रतिपूजार्थं सर्वतथागतप्रह्लादनसमयोद्भववज्रन्नाम समाधिं समापद्य मां सर्वतथागतगणिकां स्वहृदयान्निश्चचार **वज्रधूपे**॥

अथास्यां विनिःसृतमात्रायां सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रधरः अनेकविधा धूपपूजामेघव्यूहाः सर्ववज्रधातुस्फरणा भूत्वा विनिश्चरिताः। तेभ्यश्च धूपपूजामेघसमुद्रेभ्यः सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा विनिःसृत्य, पुनरप्येकघनो वज्रधूपदेवताकायः संभूय, भगवतो वज्रमणिरत्नशिखरकूटागारस्य कोणे वामपार्श्वे चन्द्रमण्डलाश्रिता भूत्वेदमुदानमुदानयति स्म।

अहो ह्यं महापूजा प्रह्लादनवती शुभा।
यत्सत्त्वावेशयोगाद्धि क्षिप्रं बोधिरवाप्यते॥ इति॥

I.1.31 Vajrapuṣpā

अथ भगवान् रत्नसंभवस्तथागतो भगवतो वैरोचनस्य तथागतस्य पूजाप्रतिपूजार्थं रत्नाभरणपूजासमयसंभववज्रं नाम समाधिं समापद्य मां सर्वतथागतप्रतीहारीं स्वहृदयान्निश्चचार **वज्रपुष्पे**॥

अथास्यां विनिःसृतमात्रायां सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रधरः सर्वपुष्पपूजाव्यूहाः सर्वाकाशधातुस्फरणा भूत्वा विनिःसृतास्तेभ्यश्च सर्वपुष्पपूजाव्यूहेभ्यः सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा विनिःसृत्य, पुनरप्येकघनो वज्रपुष्पदेवताकायः संभूय, भगवतो वज्रमणिरत्नशिखरकूटागारस्य वामकोणे चन्द्रमण्डलाश्रिता भूत्वेदमुदानमुदानयामास।

अहो हि पुष्पपूजाहं सर्वालङ्कारकारिका।
यत्तथागतरत्नत्वं पूज्य क्षिप्रमवाप्यते॥ इति॥

I.1.32 Vajrālokā

अथ भगवान् लोकेश्वरराजस्तथागतो भगवतो वैरोचनस्य तथागतस्य पूजाप्रतिपूजार्थं सर्वतथागतालोकपूजासमयोद्भववज्रं नाम समाधिं समापद्येमां सर्वतथागतदूतीं स्वहृदयान्निश्चचार **वज्रालोके**॥

अथास्यां विनिःसृतमात्रायां सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रधरः सर्वालोकपूजाव्यूहाः सकलधर्मधातुस्फरणा भूत्वा विनिश्चरिताः। तेभ्यश्च सर्वालोकपूजाव्यूहेभ्यः सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा विनिःसृत्य, पुनरप्येकघनो वज्रालोकदेवताकायः संभूय, भगवतो वज्रमणिरत्नशिखरकूटागारस्य वामकोणे चन्द्रमण्डलाश्रिता भूत्वा, इदमुदानमुदानयामास।

अहो ह्यहं महोदारा पूजा दीपमयी शुभा।
यदालोकवती क्षिप्रं सर्वबुद्धदृशो लभेद् ॥ इति ॥

I.1.33 Vajragandhā

अथ भगवानमोघसिद्धिस्तथागतो भगवतो वैरोचनस्य तथागतस्य पूजाप्रतिपूजार्थं सर्वतथागतगन्धपजासमयसंभववज्रन्नाम समाधिं समापद्येमां सर्वतथागतचेटीं स्वहृदयान्निश्चचार **वज्रगन्धे**॥

अथास्यां विनिःसृतमात्रायां सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रधरः सर्वगन्धपूजाव्यूहाः सर्वलोकधातुस्फरणा भूत्वा विनिःसृताः। तेभ्यश्च गन्धपूजाव्यूहेभ्यः सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा विनिःसृत्य पुनरप्येकघनो वज्रगन्धदेवताकायः संभूय, भगवतो वज्रमणिरत्नशिखरकूटागारस्य वामकोणे चन्द्रमण्डलाश्रिता भत्वेदमुदानमुदानयामास।

अहो गन्धमयी पूजा दिव्याहं मनोरमा।
यत्तथागतगन्धो वै सर्वकाये ददाति हि॥ इति॥

सर्वतथागतज्ञानावेशा, महाबोध्यङ्गसंचया, सर्वतथागतधर्मालोका, शीलसमाधिप्रज्ञाविमुक्तिविमुक्तिज्ञानदर्शनगन्धा चेति। सर्वतथागताज्ञाकार्यः॥

I.1.34 Vajrāṅkuśa

अथ भगवान् वैरोचनस्तथागतः पुनरपि सर्वतथागतसमयां कुशमहासत्त्वसमयसंभवसत्त्ववज्रनाम समाधिं समापद्य इमं सर्वतथागतसर्वमुद्रागणपतिं स्वहृदयान्निश्चचार **वज्रांकुश**॥

अथास्मिन् विनिःसृतमात्र सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रधरः सर्वतथागतसर्वमुद्रागणा भूत्वा विनिःसृतः। तेभ्यश्च सर्वतथागतमुद्रागणेभ्यः सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा विनिःसृत्य, पुनरप्येकघनो वज्राङ्कुशमहाबोधिसत्त्वकायः संभूय, भगवतो वज्रमणिरत्नशिखरकूटागारस्य वज्रद्वारमध्ये चन्द्रमण्डलाश्रितो भत्वा, सर्वतथागतसमयानाकर्षयन्, इदमुदानमुदानयामास।

अहो हि सर्वबुद्धानां समाकर्षमहं दृढः।
यन्मया हि समाकृष्टा भजन्ते सर्वमण्डलम्॥ इति॥

I.1.35 Vajrapāśa

अथ भगवान् पुनरपि सर्वतथागतसमयप्रवेशमहासत्त्वसमयसंभवसत्त्ववज्रनाम समाधिं समापद्य मं सर्वतथागतमुद्राप्रवेशप्रतीहारं स्वहृदयान्निश्चचार **वज्रपाश**॥

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रधरः सर्वतथागतसमयप्रवेशमुद्रागणा भूत्वा विनिश्चरितः। तेभ्यश्च सर्वतथागतसमयप्रवेशमुद्रागणेभ्यः सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा विनिःसृत्य, पुनरप्येकघनो वज्रपाशमहाबोधिसत्त्वकायः संभूय, भगवतो वज्रमणिरत्नशिखरकूटागारस्य रत्नद्वारमध्ये चन्द्रमण्डलाश्रितो भूत्वा सर्वतथागतां प्रवेशयन्, इदमुदानमुदानयामास।

अहो हि सर्वबुद्धानां वज्रपाशमहं दृढः।
यत्सर्वाणुप्रविष्टापि प्रवेश्यन्ते मया पुनः॥ इति॥

I.1.36 Vajrasphoṭa

अथ भगवान् पुनरपि सर्वतथागतसमयस्फोटमहासत्त्वसमयोद्भवसत्त्ववज्रनामसमाधिं समापद्येमं सर्वतथागतसमयबन्धन्नाम सर्वतथागतदूतं स्वहृदयान्निश्चचार **वज्रस्फोट**॥

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रधरः सर्वतथागतसमयबन्धमुद्रागणा भूत्वा विनिःसृतस्तेभ्यश्च सर्वतथागतसमयबन्धसर्वमुद्रागणेभ्यः सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा विनिःसृत्य, एकघनो वज्रस्फोटमहाबोधिसत्त्वकायः संभूय, भगवतो वज्रमणिरत्नशिखरकूटागारस्य धर्मद्वारमध्ये चन्द्रमण्डलाश्रितो भत्वा, सर्वतथागतान बन्धयन्न, इदमुदानमुदानयामास।

अहो हि सर्वबुद्धानां वज्रस्फोटमहं दृढः।
यत्सर्वबन्धमुक्तानां सत्त्वार्थाद् बन्ध इष्यते॥ इति॥

I.1.37 Vajrāveśa

अथ भगवान् पुनरपि सर्वतथागतावेशमहासत्त्वसमयसंभवसत्त्ववज्रन्नाम समाधिं समापद्येमं सर्वतथागतसर्वमुद्राचेटं स्वहृदयान्निश्चचार **वज्रावेश** ॥

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रधरः सर्वतथागतसर्वमुद्रागणा भूत्वा विनिश्चरितः। तेभ्यश्च सर्वतथागतसर्वमुद्रागणेभ्यः सर्वलोकधातुपरमाणुरजःसमास्तथागतविग्रहा विनिःसृत्य, एकघनो वज्रावेशमहाबोधिसत्त्वविग्रहः प्रादुर्भूय, भगवतो वज्रमणिरत्नशिखरकूटागारस्य कर्मद्वारमध्ये चन्द्रमण्डलाश्रितो भूत्वा, सर्वतथागतानावेशयन्, इदमुदानमुदानयामास।

अहो हि सर्वबुद्धानां वज्रावेशमहं दृढः।
यत्सर्वपतयो भूत्वा चेटा अपि भवन्ति हि ॥ इति ॥

सवतथागतसमाकर्षणं, प्रवेशो, बन्धः, वशीकरणं चेति। सर्वतथागताज्ञाकराः ॥

अथ भगवान् सर्वतथागतासमाजाधिष्ठानाय वज्राच्छटिकासंज्ञामकार्षीत्। इदं सर्वतथागतसमाजाधिष्ठानहृदयमभाषत **वज्रसमाज** ॥

अथ तेन क्षपालवमुहूर्तेन सर्वतथागताच्छटिकासंज्ञासंचोदिताः सर्वलोकधातुप्रसरमेघसमुद्रेषु सर्वलोकधातुपरमाणुरजःसमास्तथागताः सबोधिसत्त्वपर्षन्मण्डलाः समाजमापद्य, येन भगवान् वज्रमणिरत्नशिखरकूटागारो येन च भगवान् वैरोचनस्तेनोपजग्मुरुपेत्य **ओं सर्वतथागतपादवन्दनाङ्करोमि** ॥ इत्यनेन प्रकृतिसिद्धेन मन्त्रेण रुचिजप्तेन सर्वतथागतपादवन्दनां कृत्वेदमुदानमुदानयामासुः।

अहो समन्तभद्रस्य बोधिसत्त्वस्य सत्क्रिया।
यत्तथागतचक्रस्य मध्ये भाति तथागतः ॥

अथेदमुक्त्वा ते दशदिक्सर्वलोकधातुसन्निपतिताः सर्वतथागताः सर्वतथागताधिष्ठानेन भगवतो वैरोचनस्य हृदये सबोधिसत्त्वपर्षन्मण्डलाः प्रविष्टाः। तेभ्यश्च सर्वतथागतहृदयेभ्यः स्वानि स्वानि बोधिसत्त्वपर्षन्मण्डलानि विनिःसृत्य भगवतो वज्रमणिरत्नशिखरकूटागारस्य सर्वपार्श्वेषु मण्डलीभूत्वा समापद्यावस्थिता इदमुदानमुदानयामासुः।

अहो हि सर्वबुद्धानां महोदार्यमनादिजम्।
यत्सर्वाणुप्रसंख्या वै बुद्धा ह्येकत्वमागता ॥ इति ॥

Hymn of 108 Names of Mahāvajradhara

अथ भगवन्तः सर्वतथागताः पुनरपि समाजमागम्यास्य वज्रधातुमहामण्डलस्याधिष्ठानायाशेषानवशेषस्य च सत्त्वधातोः परित्राणसर्वहितसुखावाप्त्यै यावत्सर्वतथागतसमताज्ञानाभिज्ञाभिसंबोध्युत्तमसिद्धये भगवन्तं सर्वतथागताधिपतिं स्ववज्रसत्त्वमनादिनिधनं महावज्रधरमनेन नामाष्टशतेनाध्येषितवन्तः ॥

वज्रसत्त्वमहासत्त्व वज्रसर्वतथागत ।
समन्तभद्र वज्राद्य वज्रपाणे नमोऽस्तु ते ॥ १ ॥
वज्रराज सुबुद्धाग्र्य वज्राङ्कुशतथागत।
अमोघराज वज्राग्र्य वज्राकर्ष नमोऽस्तु ते ॥ २ ॥
वज्रराग महासौख्य वज्रवाण वशङ्कर।
भारकाम महावज्र वज्रचापो नमोऽस्तु ते ॥ ३ ॥
वज्रसाधो सुसत्त्वाग्र्य वज्रतुष्टि महारते।
प्रामोद्यराज वज्राग्र्य वज्रहर्ष नमोऽस्तु ते ॥ ४ ॥

वज्ररत्न सुवज्रार्थ वज्राकाश महामणे।
आकाशगर्भ वज्राढ्य वज्रगर्भ नमोऽस्तु ते ॥ ५ ॥
वज्रतेज महाज्वाल वज्रसूर्य जिनप्रभ ।
वज्ररश्मि महातेज वज्रप्रभ नमोऽस्तु ते ॥ ६ ॥
वज्रकेतु सुसत्त्वार्थ वज्रध्वज सुतोषक ।
रत्नकेतु महावज्र वज्रयष्टे नमोऽस्तु ते ॥ ७ ॥
वज्रहास महाहास वज्रस्मित महाद्भुत।
प्रीतिप्रामोद्य वज्राग्र्य वज्रप्रीते नमोऽस्तु ते ॥ ८ ॥
वज्रधर्म सुतत्वार्थ वज्रपद्म सुशोधक ।
लोकेश्वर सुवज्राक्ष वज्रनेत्र नमोऽस्तु ते ॥ ९ ॥
वज्रतीक्ष्ण महायान वज्रकोश महायुध ।
मञ्जुश्री वज्रगांभीर्य वज्रबुद्धे नमोऽस्तु ते ॥ १० ॥
वज्रहेतु महामण्ड वज्रचक्र महानय ।
सुप्रवर्तन वज्रोत्थ वज्रमण्ड नमोऽस्तु ते ॥ ११ ॥
वज्रभाष सुविद्याग्र्य वज्रजाप सुसिद्धिद ।
अवाच वज्रसिद्धयग्र वज्रवाच नमोऽस्तु ते ॥ १२ ॥
वज्रकर्म सुवज्राज्ञा कर्मवज्र सुसर्वग ।
वज्रामोघ महोदार्य वज्रविश्व नमोऽस्तु ते ॥ १३ ॥
वज्ररक्ष महाधैर्य वज्रवर्म महादृढ ।
दुर्योधन सुवीर्याग्र्य वज्रवीर्य नमोऽस्तु ते ॥ १४ ॥
वज्रयक्ष महोपाय वज्रदंष्ट्र महाभय।
भारप्रमर्दिन् वज्रोग्र वज्रचण्ड नमोऽस्तु ते ॥ १५ ॥
वज्रसन्धि सुसान्निध्य वज्रबन्ध प्रमोचक ।
वज्रमुष्टयग्रसमय वज्रमुष्टे नमोऽस्तु ते ॥ १६ ॥
यः कश्चिद् धारयेन्नाम्नामिदन्तेऽष्टशतं शिवम् ।
वज्रनामाभिषेकाद्यैः सर्वाग्रैः सोऽभिषिच्यते ॥ १७ ॥
यस्तु गौणमिदन्नाम्नां महावज्रधरस्य तु ।
शश्वद्गेयं स्तुयात् सोऽपि भवेद्वज्रधरोपमः ॥ १८ ॥
अनेनाभिष्टुतोऽस्माभिर्नाम्नामष्टशतेन तु ।
महायानाभिसमयं विस्फारय महानयम् ॥ १९ ॥
अध्येषयामस्त्वां नाथ भाषस्व परमं विधिम् ।
सर्वबुद्धमहाचक्रं महामण्डलमुत्तमम ॥ २० ॥ इति ॥

Delineation of the maṇḍala

अथ भगवान् वज्रधरः सर्वतथागताध्येषणवचनमुपश्रुत्य सर्वतथागतसमयसंभववज्राधिष्ठानन्नाम समाधिं समापद्य वज्रधातुन्नाम महामण्डलमुदाजहार ।

अथातः संप्रवक्ष्यामि महामण्डलमुत्तमम् ।
वज्रधातुप्रतीकाशं वज्रधातुरिति स्मृतम् ॥ १ ॥
उपविश्य यथास्यायं मण्डलस्य तु मध्यतः ।
महासत्वमहामुद्रां भावयं समधिष्ठच च ॥ २ ॥
तथैवोत्थाय मुद्रास्थः सर्वतो व्यवलोकयेत् ।
परिक्रमेत गर्वेण वज्रसत्त्वमुदाहरन् ॥ ३ ॥
नवेन सुनियुक्तेन सुप्रमाणेन चारुणा ।
सूत्रेण सूत्रयेत् प्राज्ञैर्यथाशक्तेन मण्डलम् । ॥ ४ ॥
चतुरस्रं चतुर्द्वारं चतुस्तोरणशोभितम् ।
चतुःसूत्रसमायुक्तं पट्टस्रग्दामभूषितम् ॥ ५ ॥
कोणभागेषु सर्वेषु द्वारनिर्यूहसन्धिषु ।
खचितं वज्ररत्नैस्तु सूत्रयेद्बाह्यमण्डलम् ॥ ६ ॥
तस्य चक्रप्रतीकाशं प्रविश्याभ्यन्तरं पुरम् ।
वज्रसूत्रपरिक्षिप्तमष्टस्तम्भोपशोभितम् ॥ ७ ॥
वज्र [स्तंभाग्रस्थश्चन्द्रपञ्च] मण्डलमण्डितम् ।
मध्यमण्डलमध्ये तु बुद्धबिम्बन्निवेशयेत् ॥ ८ ॥
बुद्धस्य सर्वपार्श्वेषु मण्डलानान्तु मध्यतः ।
समयाग्र्यश्चतस्रो हि संलिखेदनुपूर्वशः ॥ ९ ॥
वज्रवेगेन चाक्रम्य मण्डलानां चतुष्टये ।
अक्षोभ्याद्यांस्तु चतुरः सर्वबुद्धान्निवेशयेत् ॥ १० ॥
अक्षोभ्यमण्डलं कुर्यात्समं वज्रधरादिभिः ।
वज्रगर्भादिभिः पूर्णं रत्नसंभवमण्डलम् ॥ ११ ॥
वज्रनेत्रादिभिः शुद्धं मण्डलममितायुषः ।
अमोघसिद्धेः संलेख्यं वज्रविश्वादिमण्डलम् ॥ इति ॥ १२ ॥
चक्रस्य कोणसंस्थेषु वज्रदेव्यः समालिखेत् ।
बाह्यमण्डलकोणेषु बुद्धपूजाः समालिखेत् ॥ १३ ॥
द्वारमध्येषु सर्वेषु द्वारपालचतुष्टयम् ।
बाह्यमण्डलसंस्थेषु महासत्वान्निवेशयेत् ॥ १४ ॥
ततो वै सम्यगाग्रीन्तु मुद्रां बध्वा यथाविधि ।
वज्राचार्यः प्रविष्ट्वा तु स्फोटच मुद्रां समाविशेत ॥१५॥

Initiation

तत्रेदं सर्वाविशहृदयं भवति अः ॥

आज्ञां माग्र्य यथावत्तु स्वाधिष्ठानादिकन्तथा ।
कृत्वोच्चार्य स्वकन्नाम ततो वज्रेण साधयेत ॥ १ ॥

सत्त्ववज्राङ्कुशीं बध्वा वज्राचार्यस्ततः पुनः ।
कुर्वन्नच्छटसंघातं सर्वबुद्धां समाजयेत् ॥ २ ॥
तत्क्षणं सर्वबुद्धास्तु वज्रसत्त्वसमन्विताः ।
सर्वमण्डलसंपूर्णाः समाजं यान्ति मण्डले ॥ ३ ॥
ततः शीघ्रं महामुद्रां [बध्वा] वज्रधरस्य तु ।
उच्चारयेत्सकृद्वारन्नामाष्टशतमुत्तमम ॥ ४ ॥
ततस्तुष्टाः समाजेन दृढं यान्ति तथागताः ।
वज्रसत्त्वः स्वयंसिद्धो मित्रत्वेनोपतिष्ठति ॥ ५ ॥
ततो द्वारेषु सर्वेषु कर्म कृत्वाङ्कुशादिभिः ।
महाकर्माग्र्यमुद्राभिः समयांस्तु निवेशयेत् ॥ ६ ॥
मुद्राभिः समयाग्र्याभिः सत्त्ववज्रादिभिस्तथा ।
साधयेत महासत्त्वो जः हूम् वं होः प्रवर्तयन् ॥ ७ ॥
ततो बुद्धादयः सर्वमहासत्त्वाः समग्रतः ।
आकृष्टा सुप्रविष्टाश्च बध्वा याम्यन्ति तद्वशम् ॥ ८ ॥
ततस्तु गुह्यपूजाभिः सन्तोष्य स महात्मना ।
विज्ञयेत्सर्वसत्वार्थं कुरुध्वं सर्वसिद्धये ॥ ९ ॥ इति ॥
एवं सर्वमण्डलेष वज्राचार्यकर्मेति ॥

Initiation of the disciple

अथात्र वज्रधातुमहामण्डले वज्रशिष्यप्रवेशादिविधिविस्तरो भवति ॥

तत्र प्रथमं तावत् प्रवेशो भवत्यशेषानवशेषसत्त्वधातुपरित्राणसर्वहितसुखोत्तमसिद्धिकार्यकरणतया । अत्र महामण्डलप्रवेशे पात्रापात्रपरीक्षा न कार्या । तत्कस्माद्धेतोः ।

सन्ति भगवन्तस्तथागताः केचित् सत्त्वा महापापकारिणस्ते इदं वज्रधातुमहामण्डलं दृष्ट्वा प्रविष्टा च सर्वापायविगता भविष्यन्ति ।

सन्ति च भगवन्तः सत्त्वाः सर्वार्थभोजनपानकामगुणगृद्धाः समयद्विष्टाः पुरश्चरणादिष्वशक्ताः । तेषामप्यत्र यथाकामकरणीयतया प्रविष्टानां सर्वाशापरिपूरिर्भविष्यति ।

सन्ति भगवन्तः सत्त्वा नृत्यगीतहास्यलास्याहारविहारप्रियतया सर्वतथागतमहायानाभिसमयधर्मतानवबोधत्वादन्यदेवकुलमण्डलानि प्रविशन्ति, सर्वाशापरिपूरिसंपदभूतेषु निरुत्तररतिप्रीतिहर्षसंभवकरेषु सर्वतथागतकुलमण्डलेषु शिक्षापदभयभीता न प्रविशन्ति । तेषामपायमण्डलप्रवेश [पथाभिमुखविहाराणामप्येव] वज्रधातुमहामण्डलप्रवेशो युज्यत सर्वरतिप्रीत्युत्तमसिद्धिसुखसौमनस्यानुभवनार्थं सर्वापायगतिप्रवेशाभिमुखपथविनिवर्तनाय च ।

सन्ति च पुनर्भगवन्तो धार्मिकाः सत्त्वाः सर्वतथागतशीलसमाधिप्रज्ञोत्तमसिद्धच्युपायैर्बुद्धबोधिं प्रार्थयन्तो ध्यानविमोक्षादिभिर्भूमिभिर्यतन्तः क्लिश्यन्ते । तेषामत्रैव वज्रधातुमहामण्डलप्रवेशमात्रेणैव सर्वतथागतत्वमपि न दुर्लभम्, किमङ्गा पुनरन्या सिद्धिरिति ॥

तत्रादित एव तावत् सर्वतथागतप्रणामचतुष्टयं कारयेत् । तद्यथा ।

सर्वशरीरेण वज्राञ्जलिप्रसारितेन प्रणमेदनेन मन्त्रेण । **ओं सर्वतथागतपूजोपस्थानायात्मानन्निर्यातयामि सर्वतथागतवज्रसत्त्वाधितिष्ठस्व मां ॥**

तथव स्थितो वज्राञ्जलिं हृदि कृत्वा ललाटेन प्रणमेदनेन मन्त्रेण **ओं सर्वतथागतपूजाभिषेकायात्मानन्निर्यातयामि सवतथागतवज्ररत्नाभिषिञ्च माम् ॥**

ततस्तथैवोत्थाय वज्रांजलिबन्धेन शिरसा मुखेन प्रणमेदनेन मन्त्रेण **ओं सर्वतथागतपूजाप्रवर्तनायात्मानं निर्यातयामि सर्वतथागतवज्रधर्म प्रवर्तय माम् ॥**

ततस्तथैव स्थितो वज्रांजलिं शिरसोऽवतार्य हृदि कृत्वा मूर्ध्ना प्रणमेदनेन मन्त्रेण **ओं सर्वतथागतपूजाकर्मणे आत्मानन्निर्यातयामि सर्वतथागतवज्रकर्म कुरु माम् ॥**

ततो रक्तवस्त्रोत्तरीयो रक्तपट्टकावच्छादितमुखः सत्त्ववज्रिमुद्रां बन्धयेदनेन हृदयेन **समयस्त्वम् ॥**

ततो मध्याङ्गुलिद्वयेन मालां ग्रन्थ्या प्रवेशयेदनेन हृदयेन **समय हूं ॥**

ततः प्रवेश्यैवं वदेत् । "अद्य त्वं सर्वतथागतकुले प्रविष्टः । तदहं ते वज्रज्ञानमुत्पादयिष्यामि, येन ज्ञानेन त्व सर्वतथागतसिद्धिरपि प्राप्स्यसि, किमुतान्याः सिद्धीः । न च त्वयादृष्टमहामण्डलस्य वक्तव्यं, मा ते समयो व्यथेद्" इति । ततः स्वयं वज्राचार्यः सत्त्ववज्रमुद्रामेव मूर्ध्वामुखीं बध्वा वज्रशिष्यस्य मूर्ध्नि स्थास्यैवं वदेत् । "अयं ते समयवज्रो मूर्धानं स्फलयेद्, यदि त्वं कस्यचिद् ब्रूयात् ।"

ततस्तयैव समयमुद्रया उदकं शपथहृदयेन सकृत् परिज्ञाप्य, तस्य शिष्याय पाययेदिति ॥

तत्रेदं शपथहृदयं भवति ।

वज्रसत्त्वः स्वयन्तेऽद्य हृदये समवस्थितः ।
निर्भिद्य तत्क्षणं यायाद् यदि ब्रूयादिमं नयम् ॥

वज्रोदक ठः ॥

ततः शिष्याय ब्रूयात् । "अद्य प्रभृत्यहन्ते वज्रपाणिर्यत्तेऽहं ब्रूयामिदं कुरु तत्कर्तव्यं, न च त्वयाहमवमन्तव्यो, मा ते विषमापरिहारेण कालक्रियां कृत्वा नरपतनं स्याद्" इति उक्त्वा, वक्तव्यं ब्रूहि, "सर्वतथागता अधितिष्ठन्तो वज्रसत्त्वो मे आविशतु" ।

ततस्त्वरमाणेन वज्राचार्येण सत्त्ववज्रिमुद्रां बध्वा इदमुच्चारयितव्यम् ।

अयं तत्समयो वज्रं वज्रसत्त्वमिति स्मृतम् ।
आवेशयतु तेऽद्यैव वज्रज्ञानमनुत्तरम् ॥

वज्रावेश अः ।

ततः क्रोधमुष्टिं बध्वा सत्त्ववज्रिमुद्रां स्फोटयेत्, महायानाभिसमयं च वज्रवाचा रुचितोच्चारयेदिति ।

ततः समाविशत्याविष्टमात्रस्य दिव्यं ज्ञानमुत्पद्यते । तेन ज्ञानेन परचित्ताभ्यवबुध्यति । सर्वकार्याणि चातीतानागतवर्तमानानि जानाति । हृदयं चास्य दृढीभवति सर्वतथागतशासने । सर्वदुःखानि च [संप्र]णश्यन्ति । सर्वभयविगतश्च भवति । अवध्यः सर्वसत्त्वेषु । सर्वतथागताश्चाधितिष्ठन्ति । सर्वसिद्धयश्चास्याभिमुखीभवन्ति । अपूर्वाणि चास्याकारणहर्षरतिप्रीतिकराणि सुखान्युत्पद्यन्ते । तैः सुखैः केषाञ्चित्समाधयो निष्पद्यन्ते, केषाञ्चिद धारण्यः, केषाञ्चित सर्वाशापरिपूरयो, यावत्, केषाञ्चित्सर्वतथागतत्वमपि निष्पद्यत इति ।

ततस्तां मुद्रां बध्वा स्वहृदि मोक्षयेदनेन हृदयेन

तिष्ठ वज्र दृढो मे भव, शाश्वतो मे भव, हृदयं मेऽधितिष्ठ, सर्वसिद्धिञ्च मे प्रयच्छ, हूं ह ह ह ह होः ॥

ततस्तां मालां महामण्डले क्षेपयेदनेन हृदयेन **प्रतीच्छ वज्र होः ॥** ततो यत्र पतति सोऽस्य सिध्यति । ततस्तां मालां गृह्य तस्यैध शिरसि बन्धयेदनेन हृदयेन **ओं प्रतिगृह्ण त्वमिमं सत्वं महाबलः ॥** तया बन्धया तेन महासत्त्वेन प्रतीच्छितो भवति, शीघ्रं चास्य सिध्यति ।

ततस्तथाविष्टस्यैव मुखबन्धं मुंचेदनेन हृदयेन **ओं वज्रसत्वः स्वयन्तेऽद्य चक्षूद्घाटनतत्परः उद्घाटयति सर्वाक्षो वज्रचक्षुरनुत्तरम् ॥ हे वज्र पश्य ॥**

ततो महामण्डलं यथानुपूर्वतो दर्शयेत् । महामण्डले च दृष्टमात्रे सर्वतथागतैरधिष्ठ्यते, वज्रसत्त्वश्चास्य हृदये तिष्ठति । नानाद्यतीवरश्मिमण्डलदर्शनादीनि प्रातीहार्यविकुर्वितानि पश्यति । सर्वतथागताधिष्ठितत्वात ।

कदाचित् भगवान् महावज्रधर : स्वरूपेण दर्शनं ददाति, तथागतो वति । तत : प्रभृति सर्वार्था : सर्वमनोऽभिरुचित-कार्याणि सर्वसिद्धिर्, यावद्, वज्रधरत्वमपि तथागतत्वं वेति ।

ततो महामण्डलं दर्शयित्वा वज्राधिष्ठितकलशाद् गन्धोदकेनाभिषिचेदनेन हृदयेन **वज्राभिषिञ्च** ॥

ततस्त्वेकतमां मुद्रां मालां बध्वा स्वचिह्नं पाणौ प्रतिष्ठाप्यैवं वदेत् ।

अद्याभिषिक्तस्त्वमसि बुद्धैर्वज्राभिषेकतः ।
इदन्ते सर्वबुद्धत्वं गृह्ण वज्रं सुसिद्धये ॥

ओं वज्राधिपति त्वामभिषिंचामि तिष्ठ वज्र समयस्त्वम् ॥

ततो वज्रनामाभिषेकेण अभिषिचेदनेन हृदयेन । **ओं वज्रसत्त्व त्वामभिषिंचामि वज्रनामाभिषेकतः हे वज्र नाम** ॥ यस्य यन्नाम कुर्यात्तस्य हे-शब्द : प्रयोक्तव्य इति ॥

सर्वमण्डलप्रवेशविधिविस्तरः ॥

ततो ब्रूयात्, "किन्तेऽभिरुचिरर्थोत्पत्तिसिद्धिज्ञानं वा, ऋद्धिसिद्धिनिष्पत्तिज्ञानं वा, विद्याधरसिद्धिनिष्पत्तिज्ञानं वा, यावत्, सर्वतथागतोत्तमसिद्धिनिष्पत्तिज्ञानं वे" ति । ततो यस्य यदभिरुचितं तत तस्योच्चेयम् ॥

ततोऽर्थसिद्धिनिष्पत्तिमुद्राज्ञानं शिक्षयेत् ।

वज्रबिम्बन्निधिस्थं तु हृदये परिभावयेत् ॥
भावयन् भूमिसंस्थानि निधानानि स पश्यति ॥ १ ॥
वज्रबिम्बं समालिख्य गगने परिभावयेत् ।
पतेद्यत्र तु पश्येत निधिन्तत्र विनिर्दिशेत् ॥ २ ॥
वज्रबिम्बं तु जिह्वायां भावयेद् बुद्धिमान् नरः ।
अत्रास्तीति स्वयं वाचा ब्रवीति परमार्थतः ॥ ३ ॥
वज्रबिम्बमयं सर्वं भावयं कायमात्मनः ।
समाविष्ट : पतेद्यत्र निधिन्तत्र विनिर्दिशेद् ॥इति॥ ४ ॥

तत्रैतानि [हृदयानि भवन्ति] ॥

वज्रनिधि ॥
रत्न निधि ॥
धर्म निधि ॥
कर्मनिधि ॥

ततो वज्रऋद्धिसिद्धिनिष्पत्तिमुद्राज्ञानं शिक्षयेत् ।

वज्रावेशे समुत्पन्ने वज्रबिम्बमयं जलम् ।
भावय[ञ्छीघ्रं सि]द्धस्तु जलस्योपरि चंक्रमेत् ॥ १ ॥
तथैवावेशमुत्पद्य यद् रूपं स्वयमात्मनः ।
भावयं भवते तत्तु बुद्धरूपमपि स्वयम् ॥ २ ॥
तथैवाविष्टमात्मानमाकाशोऽहमिति स्वयम् ।
भावयन् यावदिच्छेत तावददृश्यतां व्रजेत् ॥ ३ ॥
वज्राविष्टः स्वयं भत्वा वज्रोऽहमिति भावयन् ।
यावदारुहते स्थानन्तावदाकाशगो भवेद् ॥ इति ॥ ४ ॥

तत्रैतानि हृदयानि भवन्ति ।

वज्रजल ॥
वज्ररूप ॥
वज्राकाश ॥
वज्रमहम् ॥

ततो वज्रविद्याधरसिद्धिनिष्पत्तिमुद्राज्ञानं शिक्षयेत् ।

चन्द्रबिम्बं समालिख्य नमस्यूर्ध्वं समारुहेत् ।
पाणौ प्रभावयं वज्रं वज्रविद्याधरो भवेत् ॥ १ ॥
चन्द्रबिम्बं समारुह्य वज्ररत्नं प्रभावयेत् ।
यावदिच्छति शुद्धात्मा तावदुत्पतति क्षणात् ॥ २ ॥
चन्द्रबिम्बाभिरूढस्तु वज्रपद्मं करे स्थितम् ।
भावयन् वज्रनेत्रं तु दद्याद् विद्याधृतां पदम् ॥ ३ ॥
चन्द्रमण्डलमध्यस्थः कर्मवज्रां तु भावयेत् ।
वज्रविश्वधराच्छीघ्रं सर्वविद्याधरो भवेद ॥ इति ॥ ४ ॥

अथ हृदयानि भवन्ति ।

वज्रधर ॥
रत्नधर ॥
पद्मधर ॥
कर्मधर ॥

ततः सर्वतथागतोत्तमसिद्धिनिष्पत्तिमुद्राज्ञानं शिक्षयेत् ।

सर्ववज्रसमाधिन्तु संविष्टचाकाशधातुषु ।
यावदिच्छति वज्रात्मा तावदुत्पतति क्षणात् ॥ १ ॥
सर्वशुद्धसमाधिन्तु भावयन्नुत्तमांस्तथा ।
पंचाभिज्ञानवाप्नोति शीघ्रं ज्ञानप्रसाधक ॥ २ ॥
वज्रसत्त्वमयं सर्वं आकाशमिति संस्फरन् ।
दृढानुस्मृतिमाञ्छीघ्रं भवेद्वज्रधरः स्वयम् ॥ ३ ॥
बुद्धबिम्बमयं सर्वमधिमुच्य खधातुषु ।
सर्वबुद्धसमाधिषु बुद्धत्वाय भविष्यति ॥ इति ॥ ४ ॥

अथात्र हृदयानि भवन्ति ।

वज्र वज्र ॥
शुद्ध शुद्ध ॥
सत्व सत्व ॥
बुद्ध बुद्ध ॥

सर्वसिद्धिज्ञाननिष्पत्तयः ॥

अथ रहस्यधारणक्षमो भवति ॥
तस्य प्रथमं तावच्छपथहृदयं भूयात् ।

ओं वज्रसत्त्वः स्वयं तेऽद्य हृदयं समवस्थितः ।
निर्भिद्य तत्-क्षणं यायाद्यदि भूयादिदन्नयम् ॥

तत एवं वदेन् "न त्वयेदं शपथहृदयमतिक्रमितव्यम्; मा ते विषमापरिहारेणाकालमरणं स्याद, अनेनैव कायेन नरकपतनम्" ।

ततो रहस्यमुद्राज्ञानं शिक्षयेत् ।

वज्रावेशं समुत्पाद्य तालं दद्यात् समाहितः ।
वज्रांजलितलैः सूक्ष्मं पर्वतोऽपि वशं नयेत् ॥ १ ॥
वज्रतालमुद्रा ॥
वज्रावेशविधिं योज्य वज्रबन्धतलैः हनेत् ।
सूक्ष्मतालप्रयोगेण पर्वतेऽपि समाविशेत् ॥ २ ॥
तथैवावेशविधिना वज्रबन्धप्रसारिते ।
अग्रांगुलिसमास्फोटाद्धनेत् कुलशतं क्षणात् ॥ ३ ॥
सूक्ष्मावेशविधेर्योगात्सर्वांगुलिसमाहितम् ।
वज्रबन्धविनिर्मुक्तं सर्वदुःखहरं परम् ॥ इति ॥ ४ ॥

अथासां गुह्यसाधनं भवति ।

भगेन प्रविशेत् कायं स्त्रियायाः पुरुषस्य वा ।
प्रविष्ट्वा मनसा सर्वं तस्य कायं समं स्फरेद् ॥ इति ॥

तत्रैतानि तालहृदयानि भवन्ति ।

वज्र वश ॥
वज्र विश ॥
वज्र हन ॥
वज्र हर ॥

ततो हृदयं दत्त्वा स्वकुलदेवताचतुर्मुद्राज्ञानं शिक्षयेत् । अनेन विधिना वक्तव्यम् । "न कस्यचित् त्वयान्यस्यैषां मुद्राणामकोविदस्य एकतरापि मुद्रा दर्शयितव्या । तत्कस्य हेतोः । तथा हि ते सत्वा अदृष्टमहामण्डलाः सन्तो मुद्राबन्धं प्रयोजयन्ति तदा तेषान्न तथा सिद्धिर्भविष्यति । ततस्ते विचिकित्सा प्राप्ता विषमापरिहारेण शीघ्रमेव कालं कृत्वावीचीमहानरके पतन्तः । तव चापायगमनं स्याद्" इति ॥

अथ सर्वतथागतसत्वसाधनमहामुद्राज्ञानं भवति ।

चित्तज्ञानात्समारभ्य वज्रसूर्यं तु भावयेत् ।
बुद्धबिम्बं स्वमात्मानं वज्रधातुं प्रवर्तयन् ॥ १ ॥
अन्या सिद्धिमात्रस्तु ज्ञानमायुर्बलं वर्षः ।
प्राप्नोति सर्वगामित्वं बुद्धत्वमपि न दुर्लभम् ॥ २ ॥ इति ॥
सर्वतथागताभिसंबोधिमुद्रा ॥ ॥

अथ वज्रसत्त्वसाधनमहामुद्राबन्धो भवति ।

सगर्वं वज्रमुल्लास्य वज्रगर्वां समुद्वहन् ।
कायवाक्चित्तवज्रैस्तु वज्रसत्त्वः स्वयं भवेत ॥ १ ॥

अन्या सर्वगामी सर्वकामपतिः सुखी ।
ऋद्ध्यायुर्बलरूपाग्र्यो वज्रसत्त्वसमो भवेद् ॥ इति ॥ २ ॥
कायवाक्चित्तवज्रैस्तु यथा लेख्यानुसारतः ।
चिह्नमुद्रान् समोपेतान्महासत्वांस्तु साधयेत् ॥ ३ ॥
अथात्र सर्वकल्पानां साधनं सिद्धिरेव च ।
सिद्धानां च महत्कर्म प्रवक्ष्याम्यनुपूर्वशः ॥ ४ ॥
प्रत्यहं प्राग्यथाकालं स्वाधिष्ठानादिकन्तथा ।
कृत्वा तु साधयेत्सर्वं ततः पश्चाद् यथासुखम् ॥ ५ ॥ इति ॥

तत्रायं महामुद्रासाधनविधिविस्तरो भवति ।

वज्रावेशं समुत्पाद्य महामुद्रां यथाविधि ।
बध्वा तु पुरतस्तं तु महासत्त्वं प्रभावयेत् ॥ १ ॥
तं दृष्ट्वा ज्ञानसत्त्वं तु स्वशरीरे प्रभावयेत् ।
आकृष्य प्रवेश्य बध्वा वशीकृत्वा च साधयेत् ॥

तत्रैषां हृदयानि भवन्ति । **वज्र-सत्त्व अः** ॥ वज्रावेशहृदयम् ॥
वज्र-सत्त्व दृश्य ॥ महासत्वानुस्मृतिहृदयम् ॥
जः हूं वं होः ॥ महासत्वाकर्षणप्रवेशनबन्धनवशीकरणहृदयम ॥

"समयस्त्वम्" इति प्रोक्ते पृष्ठतश्चन्द्रमाविशेत् ।
तत्रात्मा भावयेत्सत्वं **"समयस्त्वम्"** अहं ब्रुवन् ॥ १ ॥
यस्य सत्त्वस्य या मुद्रा तामात्मानन्तु भावयेत् ।
साधयेद्वज्रजापेन सर्वमुद्राप्रसाधनम् ॥ २ ॥
"जः हूं वं होः" ब्रुवन् काये सर्वबुद्धान् प्रवेशयेत् ।
मनसा साधुयोगेन साधनं त्वपरम् महद् ॥ इति ॥ ३ ॥
अथासां कर्म प्रवक्ष्यामि वज्रकर्म निरुत्तरम् ।
बुद्धानुस्मृतिसंसिद्धः शीघ्रं बुद्धत्वमाप्नुयात् ॥ ४ ॥
सत्त्ववज्या तु संसिद्धः सर्वमुद्राधिपो भवेत् ।
सत्त्ववज्र्यान्तु मुद्रायां सर्वरत्नाधिपः स तु ॥ ५ ॥
सिद्धस्तु धर्मवज्र्या वै बुद्धधर्मधरो भवेत् ।
कर्मवज्रिणि मुद्रायां वज्रकर्मकरो भवेत् ॥ ६ ॥
सिद्ध्यते वज्रसत्त्वस्तु बन्धया सत्त्वमुद्रया ।
आकर्षयेद्वज्रधरां वज्राकर्षप्रयोगतः ॥ ७ ॥
वज्रारागमहामुद्रा सर्वबुद्धांस्तु रागयेत् ।
तोषयेत्सर्वबुद्धानां वज्रसाधप्रयोगतः ॥ ८ ॥
दद्याद् बुद्धाभिषेकाणि रत्नमुद्राविधिस्तथा ।
वज्रतेजा भवेच्छीघ्रं वज्रतेजःप्रयोगतः ॥ ९ ॥

वज्रकेतुधरं सेव्य भवेदाशाप्रपूरकः ।
वज्रहासविधिं योज्य सर्वबुद्धैः समं हसेत् ।। १० ।।
वज्रधर्मधरो भूयाद् वज्रधर्मप्रयोगतः ।
प्रज्ञाग्र्यः सर्वबुद्धानां वज्रतीक्ष्णप्रयोगतः ।। ११ ।।
वज्रचक्रधरं सेव्य धर्मचक्रं स वर्तयेत् ।
बुद्धवाक्सिद्धिमाप्नोति वज्रभाषप्रयोगतः ।। १२ ।।
वज्रकर्म [गतं] क्षिप्रं वज्रकर्माग्र्यसाधनात् ।
निबध्य वज्रकवचं वज्रकायत्वमाप्नुयात् ।। १३ ।।
वज्रयक्षं तु वै साध्य वज्रयक्षसमो भवेत् ।
सर्वमुद्राप्रसिद्धस्तु वज्रमुष्टिनिबन्धनान् ।। १४ ।।
वज्रलास्यां तु वै साध्य महावज्ररतिं लभेत् ।
वज्रमाला निबन्धस्तु सर्वबुद्धाभिषेकदः ।। १५ ।।
योजयेद्वज्रगीतां तु वज्रगीताप्रयोगतः ।
वज्रनृत्यां तु संयोज्य सर्वबुद्धैः स पूज्यते ।। १६ ।।
प्रह्लादयेज्जगत्सर्वं वज्रधूपाप्रयोगतः ।
वज्रपुष्पां तु संयोज्य वशीकुर्याज्जगत् स तु ।। १७ ।।
वज्रालोकमहामुद्रा चक्षुर्दद्यात्प्रपूजयन् ।
सर्वदुःखहरो भूयाद्वज्रगन्धप्रयोगतः ।। १८ ।।
वज्राङ्कुशसमाकर्षात् सर्वाकर्षकरः परः ।
सर्वप्रवेशको भूयाद् वज्रपाशप्रयोगतः ।। १९ ।।
वज्रस्फोटन्तु संयोज्य सर्वबन्धक्षयो भवेद् ।
वज्रावेशविधिं योज्य सर्वावेशप्रसाधक ।। २० इति ।। ।।

अथ सर्वतथागतवज्रसमयमुद्राज्ञानं भवति ।

अञ्जलिं तु दृढं बध्वा सर्वाङ्गुलिनिबन्धितम् ।
वज्राञ्जलिः समाख्यातो वज्रबन्धः सुबन्ध [नात् ।। १ ।।
सर्व] समयमुद्रास्तु वज्रबन्धसमुद्भवाः ।
तासां बन्धं प्रवक्ष्यामि वज्रबन्धमनुत्तरम् ।। २ ।।
सत्त्ववज्रां दृढीकृत्य मध्यमोत्थसमाङ्कुराम् ।
मध्यमान्तरसंकोचान् द्वितीया बुद्धवर्णिता ।। ३ ।।
मध्यमाङ्गुष्ठरत्ना तु पद्मसंकोचमध्यमा ।
पञ्चमी बुद्धमुद्रा तु तथैवाग्रसुकुञ्चिता ।। ४ ।।
अथातः संप्रवक्ष्यामि तथागतकुलस्य हि ।
समयग्राहिका मुद्रा बन्धं सिद्धिं च कर्म च ।। ५ ।।
पाणिद्वयमये चन्द्रे मध्यमाङ्गुलिवर्जिते ।
अन्त्याङ्गुलिमुखासङ्गाद वज्रं वै सत्त्ववज्रया ।। ६ ।।

अग्राङ्कुशाग्रसंयोगाद् साधुकारप्रदायिका ।
वज्रसत्वचतुष्कस्य सिद्धिमुद्रागणो ह्ययम् ॥ ७ ॥
रत्नवज्रा समाङ्गुष्ठतर्जनीमुखसन्धनात् ।
सा एव मध्यमानामकनिष्ठा सुप्रसारिता ॥ ८ ॥
पताका तु समानामकनिष्ठाभ्यां समन्विता ।
हासस्थानस्थिता चैव सा एव परिवर्तिता ॥ ९ ॥
प्रसारितसमाङ्गुष्ठस्थिता कुञ्चिततर्जनी ।
सा एव वज्रकोशा तु मध्यमा मुखसन्धिता ॥ १० ॥
सा एव तु समानामकनिष्ठा चक्रसंज्ञिता ।
निर्युक्ताङ्गुष्ठबन्धा तु प्रसारितमुखोत्थिता ॥ ११ ॥
कनिष्ठाङ्गुष्ठमुखयोः समाजात् कर्मवर्जिता ।
सा एव तु समाग्र्या वै हृदिस्था सुप्रसारिता ॥ १२ ॥
कुञ्चिताग्र्याग्रदंष्ट्रा तु कनिष्ठा सन्धिमोक्षिता ।
कनिष्ठान्तरतोऽङ्गुष्ठौ पीडयेत्कुञ्चिताग्र्यया ॥ १३ ॥
हृदये तु समाङ्गुष्ठा सुप्रसारितमालिनी ।
अङ्गुल्यग्रमखोद्धान्ता नृत्यतो मूर्ध्नि संयुता ॥ १४ ॥
वज्रबन्ध त्वधो दानात् स्वाञ्जलिश्चोर्ध्वदायिका ।
समाङ्गुष्ठनिपीडा च सुप्रसारितलेपना ॥ १५ ॥
एकतर्जनीसंकोचा द्व्यङ्गुष्ठग्रन्थिबन्धिता ।
अङ्गुष्ठाग्र्यकटा बन्धा वज्रटमुष्ट्यग्रसन्धिता ॥ इति ॥ १६ ॥
अथासां साधनं वक्ष्ये वज्रसाधनमुत्तमम् ।
स्वमुद्रया हृदिस्थया सत्त्ववज्रसमाधिना ॥ १७ ॥
अथासां कर्म वक्ष्यामि वज्रकर्म निरुत्तरम् ।
वज्रधात्वादिमुद्रासु समाजेन तथागताः ॥ १८ ॥
मण्डलाचार्यशिष्याणामधिष्ठास्यन्ति तत्क्षणात् ।
सत्त्ववज्र्यान्तु बद्धायां भवेद्वज्रधरोपमः ॥ १९ ॥
वज्राङ्कुश्यां बद्धमात्रायां सर्वबुद्धां समाह्वयेत् ।
रागवज्रप्रयोगेण स बुद्धानपि रागयेत् ॥ २० ॥
[वज्रसाधुबन्धेन बुद्धदानतुष्टिं लभति ।]
वज्रतुष्ट्या जिनैः सर्वैः साधुकारैः प्रशंस्यते ॥ २१ ॥
रत्नवज्र्यान्तु बद्धायां बुद्धैः सोऽप्यभिषिच्यते ।
वज्रसूर्यां बध्वा वै भवेद् बुद्धप्रभोपमः ॥ २२ ॥
वज्रकेतुधरो भूत्वा सर्वाशाः स तु पूरयेत् ।
वज्रहासप्रयोगेण सर्वबुद्धैः समं हसेत् ॥ २३ ॥
धर्मवज्रां समाधाय वज्रधर्मोपमो भवेत् ।
वज्रकोशां तु संगृह्य सर्वक्लेशां च्छिनत्ति सः ॥ २४ ॥

वज्रचक्रां दृढीकृत्वा मण्डलाधिपतिर्भवेत् ।
वज्रभाषप्रयोगेण वज्रवाक्सिद्धिरुत्तमा ॥ २५ ॥
कर्मवज्रां तु सन्धाय वज्रकर्मसमो भवेत् ।
वज्रवर्मां दृढीकृत्वा कायो वज्रमयो भवेत् ॥ २६ ॥
वज्रदंष्ट्राग्रमुद्रया दुष्टमारां स भञ्जति ।
वज्रमुष्टिं दृढां बध्वा सर्वमुद्रां वशन्नयेत् ॥ २७ ॥
लास्यया रतयो दिव्याः मालया भूषणानि च ।
गीतया स्फुटवाचो नित्यं पूजां लभति नृत्यया ॥ २८ ॥
धूपया ह्लादयेद् लोक पुष्पया रूपशोभिताम् ।
दीपया लोकशुद्धित्वं गन्धया दिव्यगन्धताम् ॥ २९ ॥
वज्राङ्कुशः समाकर्षेद् वज्रपाशा प्रवेशयेत् ।
वज्रस्फोटा तु बन्धयाद् वज्रघण्टा समाविशेद् ॥ ३० ॥ इति ॥

अथ **धममुद्रा** भवन्ति ।

वज्रज्ञानं तु बुद्धानां वज्रधातु दृढंकरम् ।
अतः परं प्रवक्ष्यामि धर्ममुद्रा यथाविधि ॥ १ ॥
"**समयस्त्वम्**" इति प्रोक्ते सर्वमुद्रापतिर्भवेत् ।
"**अन्यस्व**" इति वै प्रोक्ते बुद्धानाकर्षयेद् ध्रुवम् ॥ २ ॥
"**अहो सुख**" इति प्रोक्ते बुद्धानपि स रागयेत् ।
"**साधु साध्व्**" इति वै प्रोक्त्वा साधुकारैः स तोषयेत् ॥ ३ ॥
"**सुमह [त्त्वम्**" इति] प्रोक्ते सर्वबुद्धाभिषेचनम् ।
"**रूपोद्योते**"-ति वै प्रोक्ते धर्मतेजो भविष्यति ॥ ४ ॥
"अर्थ-प्राप्तिर्" इति प्रोक्ते सर्वाशाः पूरयेत् स तु ।
"**ह ह हूं हे-**" [ति प्रोक्ते समबुद्धहासं प्राप्नु] यात् ॥ ५ ॥
"**सर्व-कारि**" इति प्रोक्ते अकार्यमपि शोधयेत् ।
"**दुः खच्छेद**" इति प्रोक्ते सर्वदुःखाञ्छिनत्ति सः ॥ ६ ॥
[**"बुद्ध बोधि**" इति] प्रोक्ते मण्डलाधिपतिर्भवेत् ।
"**प्रति-शब्द**" इति प्रोक्ते बुद्धैः सहसमालपेत् ॥ ७ ॥
"**शुभ-सिद्धम्**" इति प्रोक्ते वशित्वं सर्वतो भवेत् ।
[**"निर्भयस्त्वम्**" इति] प्रोक्ते निर्भयो भवेत्तत्क्षणात् ॥८॥
"**शत्रु भक्ष**" इति प्रोक्ते सर्वशत्रून् स भक्षयेत् ।
"**सर्वसिद्धिर्**" इति प्रोक्ते सर्वसिद्धिर्भविष्यति ॥ ९ ॥
[**"महारति**" रतिं] दिव्यां "**रुपशोभा**" तथैव च ।
"**श्रोत्रसौख्या**" सुखं दद्यात् "**सर्वपूजा**" सुपूजताम् ॥ १० ॥
"**प्रह्लादिनि**" मनःसौख्यं "**फलागमी**" फलागमा ।
"**सु[तेजाग्नि**" महातेजः] "**सुगन्धाङ्गि**" सुगन्धताम् ॥ ११ ॥

"अयाहि जः" समाकर्षा "अहि हूं हूं" प्रवेशिका ।
"हेस्फोट वं" महाबन्धा "घण्टा अः अः" प्रचालिते- ॥ ति ॥ १२ ॥
अथासां धर्ममुद्रा [साधनं प्र] वक्ष्यते शुभम् ।
जिह्वायां भावयेद् वज्रां सर्वकर्माणि कुर्वते ॥ ति ॥ १३ ॥

अथ **कर्ममुद्रा**बन्धो भवति ।

वज्रमुष्टिं दृढां बध्वा द्विधीकुर्यात्समाहितः ।
वज्रमुद्राद्वयं भूयात् ततो बन्धः प्रवक्ष्यते ॥ १ ॥
वामवज्राङ्गुलिर्ग्राह्यं दक्षिणेन समुत्थिता ।
बोधाग्री नाम मुद्रेयं बुद्धबोधिप्रदायिका ॥ २ ॥
अक्षोभ्यस्य भूमिस्पर्शा रत्ने तु वरदा तथा ।
अमितायोः समाध्यग्रा अमोघस्याभयप्रदा ॥ ३ ॥
अतः परं प्रवक्ष्यामि कर्ममुद्रा समासतः ।
वज्रसत्त्वादिसत्त्वानां वज्रकर्मप्रवर्तिकाः ॥ ४ ॥
सगर्वोत्कर्षणं द्वाभ्यामङ्कुशग्रहसंस्थिता ।
वाणघन्तनयोगाच्च साधुकारा हृदि स्थिता ॥ ५ ॥
अभिषेके द्विवज्रं तु हृदि सूर्यप्रदर्शनम् ।
वामस्थबाहुदण्डा च तथास्ये परिवर्तिता ॥ ६ ॥
सव्यापसव्यविकचा हृद् वामां खड्गमारण ।
अलातचक्रभ्रमिता वज्रद्वयमुखोत्थिता । ७ ॥
वज्रनृत्यभ्रमोन्मुक्तं कपोलोष्णीषसंस्थिता ।
कवचा कनिष्ठदंष्ट्राग्र्या मुष्टिद्वयनिपीडिता ॥ ८ ॥
वज्रगर्वाप्रयोगेण नमेदाशयकंपितैः ।
मालाबन्धा मुखोद्वान्ता वज्रनृत्यप्रनर्तिता ॥ ९ ॥
वज्रमुष्टिप्रयोगेण दद्याद् धूपादयस्तथा ।
सर्वबुद्धप्रपूजायाः पूजामुद्राः प्रकल्पिता ॥ १० ॥
तर्जन्यङ्कुशबन्धेन कनिष्ठाया महाङ्कुशी ।
बाहुग्रन्थिकटाग्र्याभ्यां पृष्ठयोश्च निपीडिता ॥ इति ॥ ११ ॥
अथासां साधनं वक्ष्ये वज्रकर्मकृता समम् ।
सर्ववज्रमयं वज्रं हृदये परिभावयेद् ॥ इतिं ॥ १२ ॥
अथासां कर्ममुद्राणां वज्रकर्माण्यनेकधा ।
ज्ञानमुष्टयां तु बद्धायां बुद्धज्ञानं समाविशेत् ॥ १३ ॥
अक्षोभ्यायां तु बन्धायामक्षोभ्यं भवेत् मनः
रत्नसंभवमुद्रायां परानुग्रहवान् भवेत् ॥ १४ ॥
सद्धर्मचक्रमुद्रायां धर्मचक्रं प्रवर्तयेत् ।
अभयाग्र्या भवेत क्षिप्रं सर्वसत्त्वामयप्रदः ॥ १५ ॥

ञ्चगर्वां दृढीकृत्य वज्रसत्वसुखं लभत् ।
वज्राङ्कुश्या समाकर्षेत् क्षणात् सर्वतथागतान ॥ १६ ॥
रागयेद् वज्रवाणैस्तु वज्रभार्यामपि स्वयम् ।
वज्रतुष्टचा जिनाः सर्वे साधुकारान् ददन्ति हि ॥ १७ ॥
महावज्रमणिं बध्वा शास्तृभिः सोऽभिषिच्यते ।
वज्रसूर्यां समाधाय वज्रसूर्यसमो भवेत् ॥ १८ ॥
वज्रध्वजां समुच्छ्राप्य रत्नवृष्टिं स वर्षयेत् ।
वज्रस्मितां समाधाय हसेद् बुद्धैः समं लघु ॥ १९ ॥
वज्रफुल्लां समाधाय वज्रधर्मं स पश्यति ।
वज्रकोशां दृढं बध्वा सर्वदुःखाञ्छिनत्ति सः ॥ २० ॥
वज्रचक्रं समाधाय धर्मचक्रं प्रवर्तयेत् ।
सर्वं वै बुद्धवचनं सिध्यते व ञ्चजापतः ॥ २१ ॥
[वज्रनृत्यपूजया बुद्धोऽपि वशीभूतं भवेत् ।]
वज्रवर्म निबध्वा सो वज्रसारत्वं प्राप्नुयात् ॥ २२ ॥
वज्रदंष्ट्रं समाधाय [प्रध्वंसेद् वज्रत्वमपि] ।
वज्रमुष्टचाहरे [त् सर्वं मुद्रासिद्धिरालभ्यते] ॥ २३ ॥
वज्रलास्या रतिन् दद्याद् वज्रमाला सुरूपताम् ।
वज्रगीता सुगीता [त्वं वज्रनृत्या च वशयेत्] ॥ २४ ॥
धूपया तु मनोह्लादं पुष्पयाभरणानि तु ।
दीपपूजा महादीप्तिं वज्रगन्धा सुगन्धताम् ॥ २५ ॥
वज्राङ्कुश्या समाकर्षेद् वज्र आशा प्रवेशयेत् ।
बन्धयेद् वज्रनिगडा वज्रघण्टा तु चालयेद् ॥ इति ॥ २६ ॥

अथ सर्वमुद्राणां सामान्यां बन्धविधिविस्तरो भवति । तत्रादित एव वज्रबन्धाङ्गुलीं तालं कृत्वा हृदये, इदं हृदयमुच्चारयेत् **वज्रबन्ध त्रट्** ॥ ततः सर्वमुद्रावन्धाः स्वकायवाक्चित्तवज्रेषु वशीभवन्ति ॥

ततो वज्रावेशसमयमुद्रां बध्वा, इदं हृदयमुच्चारयेत् **अः** ॥ ततः समाविष्टा मित्रत्वेनोपतिष्ठन्ति ॥

ततो मुद्रासमयमहासत्त्वाननुस्मृत्येदं हृदयमुदाहरेत् **महासमयसत्त्वोऽहम्** ॥ अनेन सर्वमुद्राः सिद्धचन्तीति । **सर्वमुद्राविधिविस्तरः** ॥ ॥

अथ सामान्यः साधनविधिविस्तरो भवति । तत्रादित एव स्वमुद्रां बध्वा स्वमुद्रासत्वमात्मानं भावयेदनेन हृदयेन **समयोऽहम्** ॥

ततः स्वमुद्रासत्त्वमात्मानं भाव्य तेनाधिष्ठायेदनेन मन्त्रेण **समयसत्त्वाधितिष्ठस्व माम्** ॥ ततः साधयेदिति । **साधनाविधिविस्तरः** ॥ ॥

अथ सिद्धिविधिविस्तरो भवति । तत्रादित एव अर्थसिद्धिमिच्छता तेन हृदयेन **अर्थसिद्धि** ॥ अनेन सिद्धा मुद्रा महार्थोत्पत्तिन् करोति ॥

अथ वज्रसिद्धिमिच्छेदनेन हृदयेन वज्रसिद्धि ॥ अनेन यथाभिरुचितवज्रसिद्धो भवति ॥

अथ विद्याधरसिद्धिमिच्छेदनेन हृदयेन **वज्रविद्याधर** ॥ अनेन यथाभिरुचितविद्याधरसिद्धिः ।

अथोत्तमसिद्धिमिच्छेत् स्वमुद्राहृदयेनेति । **सिद्धिविधिविस्तरः ॥** ॥

अथ सर्वमुद्राणां सामान्यः स्वकायवाक्चित्तवज्रेषु वज्रीकरणविधिविस्तरो भवति । यदा मुद्राधिष्ठानं शिथिलीभवति, स्वयं वा मुक्तुकामो भवति, ततोऽनेन हृदयेन दृढीकर्तव्या ।

ओं वज्र सत्त्वसमयमनुपालय,
वज्रसत्त्वत्वेनोपतिष्ठ,
दृढो मे भव, सुतोष्यो मे भवानुरक्तो मे
भव, सुपोष्यो मे भव, सर्वसिद्धिञ्च मे प्रयच्छ,
सर्वकर्मसु च मे चित्तश्रेयः कुरु हूं
ह ह ह ह होः भगवन् सर्वतथागतवज्र मा मे मुंच,
वज्रीभव महासमयसत्व आः ॥

"अनेनानन्तर्यकारिणोऽपि सर्वतथागतमोक्षा अपि सद्धर्मप्रतिक्षेपका अपि सर्वदुष्कृतकारिणोऽपि सर्वतथागत-मुद्रासाधका वज्रसत्त्वदृढीभावादिहैव जन्मन्यासु यथाभिरुचितां सर्वसिद्धिमुत्तमसिद्धिं वज्रसिद्धिं वज्रसत्त्वसिद्धिं वा यावत् तथागतसिद्धिं वा प्राप्स्यन्ती—"त्याह भगवां सर्वतथागतवज्रसत्त्वः ॥ ॥

अथ स्वमुद्राणां सामान्यो मोक्षविधिविस्तरो भवति । तत्रादित एव यतोयतः समुत्पन्ना मुद्रा तान् तत्रतत्रैव मुञ्चेदनेन हृदयेन **वज्र मुः ॥**

ततो हृदयोत्थितया रत्नवज्रिमुद्रया स्वाभिषेकस्थानस्थितयाभिषिच्याग्राङ्गुलिभ्यां मालां वेष्टव्यं बध्वा तथैव कवचं बन्धयेदनेन हृदयेन **ओं रत्नवज्राभिषिञ्च सर्वमुद्रा मे दृढीकुरु वरकवचेन वम् ॥**

ततः पुनः कवचान्तं मालाबन्धं कृत्वा, समतालया तोषयेदनेन हृदयेन **वज्र तुष्य होः ॥**

अनेन विधिना मुद्रा मुक्ता बद्धाश्च तोषिता ।
वज्रत्वमुपयास्यन्ति वज्रसत्त्वेन वा पुनः ॥
वज्रसत्त्वः सकृज्जप्तो यथाकामं सुखात्मना ।
सिध्यते जापमात्रेण वज्रपाणिवचो यथा ॥

इत्याह भगवान् समन्तभद्रः ॥

वज्रसत्त्वादिसत्त्वानां सर्वसाधनकर्मसु ।
जापस्तु रुचितोऽप्यत्र सर्वकल्पेषु सिद्धिदः ॥
हृन्मुद्रामन्त्रविद्यानां यथाभिरुचितैर्नयैः ।
कल्पोक्तैः स्वकृतैर्वापि साधनं त्वत्र सर्वतः ॥ इति ॥

ततः पूजागुह्यमुद्रामुदाहरन्, गुह्यपूजाचतुष्टयं कार्यम्, अनेन वज्रस्तुतिगीतेन गायन् ।

ओं वज्रसत्त्वसंग्रहाद् वज्ररत्नमनुत्तरम् ।
वज्रधर्मगायनैश्च वज्रकर्मकरो भव ॥

ततोऽभ्यन्तरमण्डलेऽप्यनेनैव वज्रस्तुतिगीतेन वज्रनृत्यकरपुटेन गृह्य धूपादिभिः पूजा कार्या । ततो बाह्यमण्डले वज्रधूपादिभिः पूजां कृत्वा, ताः पूजा स्वस्थानेषु स्थापयेत् । ततः "सर्वे यथाशक्त्या पूजयन्त्वि"ति सर्वतथागतान् विज्ञाप्य, यथेच्छया धूपादिभिः पूजां कारयित्वा, यथा प्रविष्टां यथा विभवतः सर्वरसाहारविहारादिभिः सर्वोपकरण-र्महामण्डले निर्यातितैः सन्तुष्येदं सर्वतथागतसिद्धिवज्रव्रतं दद्यात् ।

इदं तत्सर्वबुद्धत्वं वज्रसत्त्वकरे स्थितम् ।
त्वयापि हि सदा धार्यं वज्रपाणिदृढव्रतम ॥

ओं सर्वतथागतसिद्धि वज्रसमय तिष्ठ
एष त्वा धारयामि वज्रसत्व हि हि हि हि हूं ॥

ततः "सर्वेषां पुनरपि न कस्यचिद् वक्तव्यम्" इति शपथहृदयमाख्येयं ।

ततो यथा प्रविष्टान् संप्रेष्य सर्वतथागतान् विज्ञापयेत्, सत्ववज्रिमुद्रां बध्वोर्ध्वतो मुञ्चेद्, इदं च हृदय-मुच्चारयेत् ।

ओं कृतो वः सर्वसत्वार्थः सिद्धिर्दत्ता यथानुगा । गच्छध्वं बुद्धविषयं पुनरागमनाय तु ॥ **वज्रसत्व मुः** ॥

एवं सर्वमण्डलेषु कर्तव्यं । समयाग्र्या मुद्रासु च मोक्त इति ॥

सर्वतथागतमहायानाभिसमयान् महाकल्पराजाद् वज्रधातुमहामण्डलविधिविस्तरः समाप्तः ॥

CHAPTER 2

VAJRA-GUHYA-VAJRA-MAṆḌALA-VIDHI-VISTARA

अथ भगवान् सर्वतथागतसर्ववज्रधरणीसमयसंभववज्रन्नाम समाधिं समापन्नः । समनन्तरसमापन्ने चाथ तावदेव सर्वतथागतहृदयेभ्यः स एव भगवान् वज्रपाणिः वज्रधररूपधारिण्यः समन्त ज्वालागर्भा वज्रधारणीसमयमुद्रा देवता भूत्वा विनिःसृत्य, सर्वलोकधातुषु सर्वबुद्धानां सर्वतथागतवज्रधारणी ज्ञानानि निष्पाद्य, सर्वतथागतसमयमुद्रा-बिम्बानि भूत्वा, सर्वतथागतानां वज्रधातुमहामण्डले सन्निवेशयोगेन चन्द्रमण्डलान्याश्रित्येदमुदानमुदानयामास ।

अहो हि बोधिचित्तस्य सर्वसत्वहितैषिता ।
यद् विनयवशाद् धीराः स्त्रीरूपमपि कुर्वते ॥

Emanation of deities from samādhi

अथ भगवान् सर्वतथागतज्ञानमुद्रासमयवज्रधात्वधिष्ठानं नाम समाधिं समापद्येमां स्वविद्यात्तमामभाषत् **ओं वज्रधात्वीश्वरि हूं वज्रिणि ॥**

अथ खल्वक्षोभयस्तथागतः सर्वतथागतवज्रसत्वसमयज्ञानमुद्रामण्डलाधिष्ठानन् नाम समाधिं समापद्येमां स्वविद्योत्तमामभाषत् **ओं वज्रवज्रिणि हूं ॥**

अथ रत्नसंभवस्तथागतः सर्वतथागतवज्ररत्नसमयज्ञानमुद्रामण्डलाधिष्ठानन् नाम समाधिं समापद्येमां स्वविद्योत्तमामभाषत् **ओं रत्नवज्रिणि हूं ॥**

अथामितायुस्तथागतः सर्वतथागतवज्रधर्मसमयज्ञानमुद्रामण्डलाधिष्ठानन् नाम समाधिं समापद्येमां स्वविद्योत्तमामभाषत् **ओं धर्मवज्रिणि हूं ॥**

अथामोघसिद्धिस्तथागतः सर्वतथागतवज्रकर्मसमयज्ञानमुद्रामण्डलाधिष्ठानन् नाम समाधिं समापद्येमां स्वविद्योत्तमामभाषत् **ओं कर्मवज्रिणि हूं ॥**

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतमहाधारणीसमयमुद्राचतुष्टयमभाषत् ।

ओं वज्रसत्वगुह्यसमये हूं ॥
ओं गुह्यवज्राङ्कुशि हूं ॥
ओं वज्रगुह्यरागे रागय हूं ॥
ओं गुह्यवज्रसाध्वीश्वरि हूं ॥

समन्तभद्रा, तथागताङ्कुशी, रतिरागा, साधुमती च । वज्रधारण्यः ।

ओं वज्रगुह्यरत्नसमये हूं ॥
ओं वज्रगुह्यप्रभे हूं ॥
ओं वज्रध्वजाग्रगुह्ये हूं ॥
ओं गुह्यहासवज्रि हूं ॥

रत्नोत्तमा, रत्नोल्का, ध्वजाग्रकेयूरा, हासवती च । रत्नधारण्यः ॥

ओं वज्रधर्मगुह्यसमये हूं ॥
ओं वज्रकोशगुह्ये हूं ॥

ओं वज्रगुह्यमण्डले हूं ॥
ओं वज्रगुह्यजापसमये हूं ॥

वज्राम्बुजा, आधारणी, सर्वचक्र, सहस्रावर्ता च । धर्मधारण्यः ॥

ओं वज्रगुह्यकर्मसमये हूं ॥
ओं वज्रगुह्यकवचे हूं ॥
ओं गुह्यवज्रदंष्ट्राधारिणि हूं ॥
ओं वज्रगुह्यमुष्टि हूं ॥

सिद्धोत्तरा, सर्वरक्षा, तेजःप्रत्याहारिणी, धारणीमुद्रा च । सर्वधारण्य इति ॥

अथ वज्रपाणिर्महाबोधिसत्वः पुनरपि सर्वतथागतवज्रगुह्यसमयमुद्राचतुष्टयमभाषत् ।

ओं गुह्यसत्ववज्रि हूं ॥
ओं गुह्यरत्नवज्रि हूं ॥
ओं गुह्यधर्मवज्रि हूं ॥
ओं गुह्यकर्मवज्रि हूं ॥

ता एव वज्रपारमितादयः सर्वतथागतवज्रगुह्यसमयधारणीसंग्रहसमयमुद्राः । वज्रधात्वीश्वरीमहामण्डले सज्वालाः चन्द्रमण्डलाश्रिताः स्थाप्याः ॥

अथ पुनरपि वज्रपाणिः सर्वतथागत वज्रगुह्यपूजासमयमुद्राचतुष्टयमभाषत् ।

ओं वज्रगुह्यरतिपूजासमये सर्वपूजां प्रवर्तय हूं ॥
ओं वज्रगुह्याभिषेकपूजासमये सर्वपूजां प्रवर्तय हूं ॥
ओं वज्रगुह्यगीतापूजासमये सर्वपूजां प्रवर्तय हूं ॥
ओं वज्रगुह्यनृत्यपूजासमये सर्वपूजां प्रवर्तय हूं ॥

ता एव वज्रलास्यादयः सज्वालाः स्वचिह्ना मुद्राश्चक्रमण्डलकोणचतुष्टये स्थाप्याः ॥

Delineation of the maṇḍala

अथ वज्रपाणिः पुनरपीदं वज्रगुह्यं नाम महावज्रमण्डलमभाषत् ।

अथातः संप्रवक्ष्यामि वज्रमण्डलमुत्तमं ।
वज्रधातुप्रतीकाशं वज्रगुह्यमितिस्मृतं ॥ १ ॥
महामण्डलयोगेन सर्वमण्डलमालिखेत् ।
सर्वमण्डलमध्येषु बुद्धमुद्राः समालिखेत् ॥ २ ॥
पर्यङ्के सुस्थितं चैत्यं वज्रधात्वीश्वरी स्मृता ।
पर्यङ्के वज्रा वज्रां तु वज्रचिन्तेति कीर्तिता ॥ ३ ॥
वज्ररत्नं तु पर्यङ्के स्वाभिषेकेति कीर्तिता ।
पर्यङ्के वज्रपद्मं तु आयुधैति प्रकीर्तिता ॥ ४ ॥
कर्मवज्रं तु पर्यङ्के सर्ववज्रेति कीर्तिता ।
पद्मप्रतिष्ठाः समालेख्याः प्रभामण्डलसंस्थिताः ॥ ५ ॥
पर्यङ्के तु लिखेद् वज्रमुत्थितं द्व्यङ्गुशं तथा ।
वज्रं वज्रपरियुक्तं साधुकारद्वयं तथा ॥ ६ ॥
रत्नं करोज्वलं कुर्यात्सूर्यमुद्रान्तथैव च ।
ध्वजाग्रं चैव सज्वालं दन्तपङ्क्तिर्द्विवज्रगे ॥ ७ ॥

वज्रमध्ये लिखेत्पद्मं खड्गं सज्वालमेव च।
वज्रारं वज्रचक्रं तु जिह्वां रश्मिकरोज्ज्वलां ॥ ८ ॥
वज्रं तु सर्वतो वक्त्रं कवचं वज्रसंयुतं।
वज्रदंष्ट्रे तथा लेख्ये मुष्टिमुद्रा करद्वये ॥ ९ ॥
सत्ववज्रादयो लेख्या यथावद् धातुमण्डले।
चिह्नमुद्राः समालेख्या वज्रलास्यादिमण्डले ॥ १० ॥
बाह्यतश्च यथायोगं स्वचिह्नं तु समालिखेत्।
मैत्रेयादिस्वचिह्नानि यथाभिरुचितं लिखेद् ॥ ११ ॥ इति ॥

Initiation into the maṇḍala

अथात्र वज्रगुह्यमण्डले प्रवेशादिविविधविस्तरो भवति।

तत्र प्रथमं तावद्वज्राचार्यः स्वयं सत्ववज्रिमुद्रां बध्वा प्रविशेत्; प्रविश्य सकृत् प्रदक्षिणीकृत्य, तां मुद्रां भगवते वज्रपाणये निर्यात्य, स्वहृदये यथावन्मुक्त्वा, चतुर्षु द्वारेषु वज्राङ्कुशकर्ममुद्रादिभिर्यथावत् कर्माणि कृत्वा निष्क्रमेद्, अभिनिष्क्रम्य शिष्यां प्रवेशयेत् वज्रधातुमहामण्डलयोगेनेति। ततः प्रवेश्य मुष्ट्याच्छाद्य सिद्धिगुह्यवज्रचिह्नं दत्वा, वज्रगुह्यमुद्राज्ञानं शिक्षयेत् ॥

Mudrā

तत्र प्रथमं तावद् वज्रगुह्यकायमुद्राज्ञानं शिक्षयेत्।

चन्द्रमण्डलमध्ये तु हस्तपादाञ्जलिं मुखं।
विजृंभन् भावयेद्वज्रं वज्रिणीमपि रागयेत् ॥ १ ॥
अङ्कुशं बाहुसंकोचं शीर्षे वज्रं तु भावयेत्।
शब्दापयंस्तु हस्तेन आनयेदङ्कुशीमपि ॥ २ ॥
वाणप्रक्षेपयोगेन विजृंभन् प्रहरेद् हृदि।
रागयेन्मारयोगेन रतिवज्रामपि स्वयं ॥ ३ ॥
बाहुबन्धेन बध्नीयाद् हृदयं स्वयमात्मनः।
वज्रवर्मप्रयोगेण रक्षेद् बुद्धमपि स्वयम् ॥ इति ॥ ४ ॥

तत्रैषां हृदयानि भवन्ति।

वज्र रागय होः ॥
वज्राङ्कुश जः ॥
मारय मारय फट् ॥
बन्ध रक्ष हं ॥

ततो वज्रगुह्यदृष्टिमुद्राज्ञानं शिक्षयेत्।

वज्रदृष्टिस्तु संरागप्रहर्षोत्फुल्ललोचना।
तया निरीक्षिता स्त्री तु वश्या भवति शाश्वती ॥ १ ॥
प्रद्रुतप्रचलच्चक्षुः पक्ष्मकर्षणलोचना।
दीप्तकृष्टिरिति प्रोक्ता सर्वमाकर्षयेज्जगत् ॥ २ ॥
प्रध्वस्तभृकुटीभङ्गक्रोधसंकुचितेक्षणं।
क्रोधदृष्टि समाधाय त्रैलोक्यमपि नाशयेत् ॥ ३ ॥
मेरुमर्दनपाषाणदृढानिमिषलोचना।
मैत्रीदृष्टिरिति ख्याता ज्वरग्रहविषापहा ॥ इति ॥ ४ ॥

अथासां हृदयानि भवन्ति ।

वज्रदृष्टि मट् ॥
दीप्तदृष्टचाङ्कुशिज्जः ॥
क्रोधदृष्टि हीः ॥
दृढदृष्टि त्रट् ॥

ततो वज्रगुह्यवाङ्मुद्राज्ञानं शिक्षयेत् ।

होः होः होः हो इति प्रोक्ते वाग्विवर्तितया क्षणात् ।
रागयेत् सर्वसत्वां सो वज्रवाचा परिस्फुटां ॥ १ ॥
ज्जः ज्जः ज्जः ज्ज इति प्रोक्ते क्रोधवाचा परिस्फुटां ।
आकर्षयेज्जगत्सर्वमपि वज्रधरोपमम् ॥ २ ॥
हुं हुं हुं हुं समाधाय शब्दवाचा परिस्फुटां ।
मारयेत् सर्वसत्वां सो मेरुमर्दनसन्निभाम् ॥ ३ ॥
हं हं हं हं इति प्रोक्ते सूक्ष्मवाचा परिस्फुटां ।
रक्षेत् सर्वमिदं लोचमपि वज्रात्मकं जिनम् ॥ इति ॥ ४ ॥

तत्रैतानि हृदयानि भवन्ति ।

वज्र होः ॥
वज्र ज्जः ॥
वज्र हुं ॥
वज्र हं ॥

ततो वज्रगुह्यचित्तमुद्राज्ञानं शिक्षयेत् ।

सर्वाकारवरोपेतं भावयन् स्वयमात्मना ।
वज्रपाणिं स्वमात्मानं सर्वबुद्धां वशन्नयेत् ॥ १ ॥
सर्वाकारवरोपेतं भावयन् स्वयमात्मना ।
वज्रगर्भं स्वमात्मानमाकर्षयेद्वज्रपाणिनं ॥ २ ॥
सर्वाकारवरोपेतं भावयन् स्वयमात्मना ।
वज्रनेत्रं स्वमात्मानं सर्वधर्मां स मारयेत् ॥ ३ ॥
सर्वाकारवरोपेतं भावयन् स्वयमात्मना ।
वज्रविश्वं स्वमात्मानं सर्ववज्रं स रक्षति ॥ इति ॥ ४ ॥

तत्रैतानि हृदयानि भवन्ति ।

वज्रपाणि वशमानय सर्वबुद्धान् होः ॥
वज्रगर्भ वज्रपाणिं शीघ्रमाकर्षय हूं ज्जः ॥
वज्रनेत्र सर्वधर्मान् मारय हूं फट् ॥
वज्रविश्व रक्ष सर्ववज्रान् हं ॥

ततो वज्रगुह्यमुद्राज्ञानं शिक्षयेत् ।

सत्ववज्रां समाधाय हृदये स्वयमात्मनः ।
वज्रदृष्ट्या निरीक्षन् वै सर्वमावेशयेज्जगत् ॥ १ ॥
रत्नवज्रां समाधाय हृदये स्वयमात्मनः ।
दीप्तदृष्ट्या निरीक्षन् वै सर्वमानयते वशं ॥ २ ॥

धर्मवज्रां समाधाय हृदये स्वयमात्मनः ।
क्रोधदृष्ट्या निरीक्षन् वै जगत्सर्वं स मारयेत् ॥ ३ ॥
कर्मवज्रां समाधाय हृदये स्वयमात्मनः ।
मैत्रीदृष्ट्या निरीक्षन् वै रक्षेत्सर्वमिदं जगद् ॥ इति ॥ ४ ॥

अथासां वज्रगुह्यज्ञानमुद्राणां हृदयानि भवन्ति ।

वज्रगुह्यसमय अः ॥
वज्रगुह्यसमय होः ॥
वज्रगुह्यसमय हुं ॥
वज्रगुह्यसमय हं ॥

ततो वज्रगुह्यमुद्राबन्धं शिक्षयेत् ।

वज्राञ्जलिसमुद्भूता महागुह्याः प्रकीर्तिताः ।
महामुद्राः समासेन तासां बन्धः प्रवक्ष्यते ॥ १ ॥

अङ्गुष्ठद्वयपर्यङ्का कुञ्चिताग्राग्रविग्रहा ।
सममध्योत्तमाङ्गा च वज्रधात्वीश्वरी स्मृता ॥ २ ॥

सा एव मध्यवज्रा तु मध्याभ्यां तु मणीकृता ।
मध्यानामान्त्यपद्मा च प्रसारितकराङ्गुली ॥ ३ ॥

अग्र्या वज्रा द्विवज्राग्री साङ्गुष्ठद्वयगूहिता ।
साधुकाराग्र्यरत्ना च स रत्नाग्राकरोज्वला ॥ ४ ॥

समानामान्त्यरत्ना च सा एव परिवर्तिता ।
सुप्रसारितसर्वाग्रा समाङ्गुष्ठान्तरस्थिता ॥ ५ ॥

प्रसारिताङ्गुलीमण्डा सा एव तु मुखोद्धृता ।
अङ्गुष्ठवज्रसंच्छन्ना समाग्र्याभ्यन्तरस्थिता ॥ ६ ॥

द्व्यङ्गुष्ठविकचा सा तु ततोऽभ्यन्तरवज्रिणी ।
वज्रगुह्याः पुनश्चैता वज्रबन्धसमुद्भवाः ॥ ७ ॥

धर्मगुह्याः पुनश्चिह्नैः संपुटान्तरभावितैः ।
कर्मगुह्यान्तरस्थितैस्तु चिह्नैः कर्मप्रदर्शनम् ॥ ८ ॥

अतः परं प्रवक्ष्यामि धर्ममुद्राः समासतः ।
आः ज्जः होः सः, उं आं त्रं हः, ह्रीः धं भं रं, कं हं हुं वं ॥ १ ॥

गुह्यमुद्रा द्विधीकृत्य कर्ममुद्रासु कल्पयेत् ।
यावदयः समयाग्र्यो वै द्विधीकृत्य तथैव च ॥ २ ॥

अथासां साधनं वक्ष्ये **समयस्त्वम्** इति ब्रूवन् ।
स्वयं बध्वा तु सिध्यन्ते कामरागसुखात्मनः ॥ १ ॥

आसां त्वधिकमेकं तु सर्वकालं न बन्धयेत् ।
गुह्ये वार्थमहत्कार्ये प्रयुञ्जीत विचक्षणः ॥ २ ॥

यसर्वात्मस्थितात ह्येता दृढभार्याः स्वयंभुवां ।
साधकेषु दृढं रक्ता मा त्यजेयुः पतिन्निजम् ॥ ३ ॥ इति ॥

अथासां सर्वमुद्राणां बन्धादिति कर्माणि भवन्ति ।

वज्रावेशं समुत्पाद्य आत्मनश्च परस्य वा ।
बन्धयेद्वा बन्धयेद्वापि अनेन हृदयेन तु ॥

वज्र हूं बन्ध ॥

अथ मोक्षो भवति ।

यतो यतः समुत्पन्नाः सर्वमुद्राः समासतः ।
तत्र तत्र तां मुञ्चेदनेन हृदयेन तु ॥

ओं वज्र मुः ॥

अथ दृढीकरणं भवति ।

रत्न वज्रां दृढीकृत्य हृदयान्मूर्ध्नि मोक्षिता ।
अग्राभ्यां कवचं बन्धेदनेन हृदयेन तु ॥

ओं दृढ वज्रकवच धृट् ॥

अथ बन्धसमयो भवति ।

यथा स्थानेषु वै मुक्ता कवचेन दृढीकृता ।
निबन्धेत्तालया सर्वा ह्यनेन हृदयेन तु ॥

ओं गुह्यसमयताल सः ॥

वज्रसत्वो रुचिजप्तिः सर्वमण्डलकर्मसु ।
प्रयोक्तव्योऽत्र समये सर्वसिद्धिकरः परम् ॥ इति ॥

सर्वतथागतमहायानाभिसमयान् महाकल्पराजाद् वज्रगुह्यवज्रमण्डलविधिविस्तरः समाप्तः ॥

CHAPTER 3

VAJRA-JÑĀNA-DHARMA-MAṆḌALA-VIDHI-VISTARA

Emanation of deities from samādhi

अथ भगवान् पुनरपि सर्वतथागतसूक्ष्मवज्रज्ञानमुद्रासमयमण्डलाधिष्ठानं नाम समाधिं समापद्येमां स्वविद्योत्तमामभाषत् **ओं सूक्ष्मवज्रज्ञानसमय हूं ॥**

अथ खल्वक्षोभ्यः तथागतः सर्वतथागतवज्रसत्वसूक्ष्मज्ञानसमयमण्डलाधिष्ठानन् नाम समाधिं समापद्येमां स्वविद्योत्तममभाषत् **ओं वज्रसत्व सूक्ष्मज्ञानसमय हूं ॥**

अथ खलु रत्नसंभवस्तथागतः सर्वतथागतवज्ररत्नसूक्ष्मज्ञानसमयमण्डलाधिष्ठानं नाम समाधिं समापद्येमां स्वविद्योत्तममभाषत् **ओं वज्ररत्न सूक्ष्मज्ञानसमय हूं ॥**

अथ खल्वमितायुस्तथागतः सर्वतथागतवज्रधर्मसूक्ष्मज्ञानसमयमण्डलाधिष्ठानं नाम समाधिं समापद्येमां स्वविद्योत्तममभाषत् **ओं वज्रधर्म सूक्ष्मज्ञानसमय हूं ॥**

अथ खल्वमोघसिद्धिस्तथागतः सर्वतथागतवज्रकर्मसूक्ष्मज्ञानसमयमण्डलाधिष्ठानन्नाम समाधिं समापद्येमां स्वविद्योत्तममभाषत् **ओं वज्रकम सूक्ष्मज्ञानसमय हूं ॥**

अथ भगवान् वैरोचनः सर्वतथागतसूक्ष्मज्ञानवज्रं नाम समाधिं समापन्नः, समनन्तरसमापन्ने च भगवत्यथ तावदेव सर्वतथागतहृदयेभ्यः सूक्ष्मज्ञानवज्ररश्मयो विनिश्चरित्वा, सर्वलोकधातवोऽवभास्य सर्वसत्वानां, सर्वतथागतसूक्ष्मज्ञानवज्रसमाधिसमापत्तीन् दृढी कृत्य पुनरप्येकध्यीभूत्वा, समाधिज्ञानवज्रकायतामध्यालम्ब्यैकघनस्तथागतज्ञानः संभूय, भगवतो वैरोचनस्य हृदये प्रविष्टः ॥

अथ वज्रपाणिः सर्वतथागतज्ञानहृदयेभ्यः प्रविष्ट्वेदं सर्वतथागतसूक्ष्मज्ञानमहासमयवज्रमभाषत् **सूक्ष्मवज्र ॥**

अथास्मिन् भाषितमात्रे सर्वतथागतहृदयेभ्यो वज्रपाणिर्विनिःसृत्य, सर्वतथागतसूक्ष्मज्ञानवज्रबिम्बमात्मानमधिष्ठाय, सर्वतथागतनासिकाग्रेषु स्थित्वेदमुदानमुदानयामास ।

अहो हि सर्वबुद्धानां सूक्ष्मवज्रमहं महत् ।
यन्महत्वात्स सूक्ष्मोऽपि त्रैधातुकमपि स्फरेद् ॥ इति ॥

अथेदमुक्त्वा भगवान् वज्रपाणिर्महाबोधिसत्वः सर्वतथागतनासिकाग्रेभ्यः सुसूक्ष्मवज्रज्ञाननिमित्तस्फरणताय सर्वतथागतकायेभ्यः स्फरित्वा, सकलधर्मधातुस्फरणतायोगेन सर्वाकाशधातुं सुसूक्ष्मवज्रज्ञाननिमित्तैः संस्फर्य, सकलाकाशधातुविस्फरितसर्वतथागतज्ञानवज्रबिम्बमात्मानमधिष्ठायावस्थितः ॥

अथ तस्मिन्नेव क्षणे सर्वतथागताः सर्वतथागतज्ञानवज्रमध्ये वज्रधर्मतामध्यालम्ब्य, सर्वतथागतसूक्ष्मज्ञानवज्राधिष्ठानन्नाम समाधिं समापद्यावस्थिताः ॥

अथ ततः सर्वतथागतज्ञानवज्रात्सर्वतथागतसमाधिज्ञानहृदयं निश्चचार **वज्रनाभि तथागत हूं ॥**

अथास्मिन् विनिःसृतमात्रे भगवान् वज्रपाणिः पुनरपि सूक्ष्मज्ञानप्रवेशयोगेन सर्वतथागतकायेषु प्रविष्ट्वा, हृदये वज्रबिम्बानि भूत्वावस्थिताः ॥

अथ तेभ्यः सर्वतथागतसत्ववज्रेभ्य इदं महाज्ञानहृदयचतुष्टयं निश्चचार ।

वज्रात्मक ॥
हृद्वज्राङ्कुश ॥

तिष्ठ रागवज्र प्रविश हृदयं ॥
अहो वज्रतुष्टि ॥

वज्रसत्वज्ञानमुद्रः, सर्वतथागतसमाजाधिष्ठानज्ञानमुद्रः, सर्वतथागतानुरागणज्ञानमुद्रः, महातुष्टिज्ञानमुद्रश्चेति। सर्वतथागतमहावज्रसमाधयः ॥

अथ वज्रपाणिः सर्वतथागतहृदयः पुनरपि सूक्ष्मज्ञानप्रवेशयोगेन स्वहृदयं प्रविष्ट्वा हृदये वज्रबिम्बमात्मानमधिष्ठायावस्थितः ॥

अथ ततो वज्रविग्रहादिदं हृदयचतुष्टयं निश्चचार।

वज्ररत्नात्मक ॥
हृदय वज्रसूर्य ॥
तिष्ठवज्रध्वजाग्र वं ॥
हृदयवज्रहास ॥

सर्वतथागतवज्राभिषेकज्ञानमुद्रः, महाप्रभामण्डलव्यूहज्ञानमुद्रः, सर्वतथागताशापरिपूरणज्ञानमुद्रः, सर्वतथागतमहाहासज्ञानमुद्र इति। सर्वतथागतरत्नसमाध्यः ॥

अथ वज्रपाणिः पुनरपि सूक्ष्मवज्रज्ञानप्रवेशयोगेन स्वहृदयं वज्रहृदयं प्रविष्ट्वा वज्रबिम्बमात्मानमधिष्ठायावस्थितः ॥

अथ ततो वज्रबिम्बादिदं हृदयचतुष्टयं निश्चचार।

वज्रपद्मात्मक ॥
हृद्वज्रकोश ॥
तिष्ठ वज्रचक्र हृदयं प्रविश ॥
वज्रजिह्वाग्र हृदय ॥

सर्वधर्मसमताज्ञानमुद्रः, सर्वतथागतप्रज्ञाज्ञानमुद्रः, महाचक्रप्रवेशज्ञानमुद्रः, सर्वतथागतधर्मवाग्निःप्रपञ्चज्ञानमुद्र इति। सर्वतथागतधर्मसमाधयः ॥

अथ वज्रपाणिः पुनरपि स्वहृदयवज्रहृदयवज्रात् सुसूक्ष्मज्ञानप्रवेशयोगेन तद्वज्रहृदयं प्रविष्ट्वा, पुनरपि सूक्ष्मवज्रबिम्बमात्मानमधिष्ठायावस्थितः ॥

अथ ततः सूक्ष्मवज्रबिम्बादिदं हृदयचतुष्टयं निश्चचार।

सर्ववज्रात्मक ॥
हृद्वज्रकवच ॥
तिष्ठ वज्रयक्ष हृदय ॥
वज्रमुष्टिहृदय ॥

सर्वतथागतविश्वकर्मज्ञानमुद्रः, दुर्योधनवीर्यज्ञानमुद्रः, सर्वमारमण्डलविध्वंसनज्ञानमुद्रः, सर्वतथागतबन्धज्ञानमुद्र इति। सर्वतथागतकर्मसमाधयः ॥

अथ भगवान् वज्रपाणिः पुनरपि सुसूक्ष्मज्ञाननिमित्तस्फरणयोगेन सर्वतथागतकायेभ्यो निःक्रम्य, वज्रपाणिमहाबोधिसत्वकायः संभूय, पुनरपि वज्रसत्वादिमहाबोधिसत्वविग्रहाणि भूत्वा, स्वानि स्वानि चिह्नानि हृदयेषु प्रतिष्ठाप्य, वज्रधातुमहामण्डलसन्निवेशयोगेन चन्द्रमण्डलान्याश्रित्य स्वहृदयसमाधयः समापद्यावस्थिता इति ॥

Delineation of the maṇḍala

अथ वज्रपाणिः पुनरपि सर्वतथागतसमाधिज्ञानाभिज्ञानिष्पादनार्थमिदं वज्रसूक्ष्मज्ञानमण्डलमभाषत्।

अथातः संप्रवक्ष्यामि धर्ममण्डलमुत्तमं ।
वज्रधातुप्रतीकाशं वज्रसूक्ष्ममिति स्मृतं ॥ १ ॥
महामण्डलयोगेन महासत्वान्निवेशयेत् ।
वज्रमध्ये लिखेद्बुद्धं बुद्धमण्डलकेष्वपि ॥ २ ॥
महासत्वाः समालेख्याः स्वमुद्राहृदयन्तथा ।
समाधितो निषण्णास्तु वज्रबन्धकरद्वया ॥ ३ ॥ इति ॥

Mudrā

अथात्र वज्रसूक्ष्मधर्ममण्डल आकर्षणादिविधिविस्तरो, महामण्डलयोगेन प्रवेशादिविधिविस्तरं ज्ञानचिह्नं पाणिभ्यां दत्वा, स्वचित्तपरिकर्ममहामुद्राज्ञानं शिक्षयेत् ।

जिह्वां तालुगतां कृत्वा नासिकाग्रं तु चिन्तयेत् ।
सूक्ष्मवज्रसुखस्पर्शाद् भवेच्चितं समाहितं ॥ १ ॥
सूक्ष्मवज्रसुखस्पर्शनिमित्तं जायते यदा ।
स्फरयेत् तन्निमित्तन्तु तच्चित्तं सर्वतः स्फरेत् ॥ २ ॥
यथेच्छास्फरणाच्चित्तं त्रैधातुकमपि स्फरेत् ।
पुनस्तु संहरेत् तत् तु यावन्नासाग्रमागतं ॥ ३ ॥
ततः प्रभृति यत्किञ्चद् भावयेत् सुसमाहितः ।
सर्वं चैतद् दृढीकुर्यात् समाधिज्ञानकल्पितं ॥ ४ ॥

अथैषां हृदयानि भवन्ति ।

सूक्ष्म वज्र ॥
स्फर वज्र ॥
संहर वज्र ॥
वज्र दृढ तिष्ठ ॥

मैत्री यस्य सत्वस्य सह भूयात् महादृढा ।
चित्तस्फरणयोगेन सर्वसत्वेषु तां स्फरेत् ॥ १ ॥
मैत्रीस्फरणयोगेन कारुण्यं यस्य कस्यचित् ।
सर्वसत्वार्थयुक्तस्तु स्फरेद्वै प्रतिपत्तितः ॥ २ ॥
प्रकृतिप्रभास्वराः सर्वे ह्यादिशुद्धा नभःसमाः ।
अधर्मोऽप्यथ वा धर्म् [अः स्फ] रं भावेन तुष्यति ॥ ३ ॥
दुर्दु रूटसममुख्या बुद्धबोधावभाजयाः ।
तेषां संशोधनार्थाय महोपेक्षां तु भावयेद् ॥ इति ॥ ४ ॥

तत्रैतानि हृदया [नि भव] न्ति ।

महामैत्र्या स्फर ॥
महाकरुणया स्फर ॥
सर्वशुद्ध प्रमोद स्फर ॥
सर्वसत्वान् संबोधय ॥

ततः सर्वतथागतानुस्मृतिज्ञानं शिक्षयेत् ।

आकाशे वान्यदेशे वा सूक्ष्मवज्रप्रयोगतः ।
उत्थितो वा निषण्णो वा वज्रबिम्बं तु भावयेत् ॥ १ ॥

तथैव सर्वस्थानेषु सूक्ष्मवज्रप्रयोगतः ।
हृद्वज्रं बोधिसत्वं तु भावयेत्सुसमाहितः ॥ २ ॥
वज्रपाणिमहाबिम्बं सर्वस्थानेषु भावयेत् ।
सूक्ष्मवज्रप्रयोगेण यथावदनुपूर्वशः ॥ ३ ॥
सर्वाकारवरोपेतं बुद्धबिम्बं तु सर्वतः ।
यथावदनुपूर्वेण भावयेत्सुसमाहित ॥ इति ॥ ४ ॥

तत्रैतानि हृदयानि भवन्ति ।

वज्रामुखीभव ॥
महाबोधिसत्वाविश ॥
वज्रपाणि दर्शय स्वं रूपं ॥
बुद्धानुस्मृत्याविश ॥

सूक्ष्मवज्रप्रयोगेण भावयेत्स्वयमात्मना ।
चन्द्रबिम्बं स्वमात्मानं बोधिचित्तस्य भावना ॥ १ ॥
चन्द्रमण्डलमध्ये तु भावयेत्स्वयमात्मना ।
वज्रबिम्बं स्वमात्मानं सत्ववज्रस्य भावना ॥ २ ॥
सूक्ष्मवज्रविधिं योज्य भावयेत्स्वयमात्मना ।
सत्ववज्रहृदात्मानं वज्रसत्वस्य भावना ॥ ३ ॥
सर्वाकारवरोपेतं भावयेत्स्वयमात्मना ।
बुद्ध बिम्बं स्वमात्मानं बुद्धबोधेस्तु भावना ॥ इति ॥ ४ ॥

तत्रेमानि हृदयानि भवन्ति ।

समन्तभद्राविश ॥
सत्ववज्राविश ॥
वज्रसत्वसमाधिज्ञानाविश ॥
तथागतोऽहं ॥

ततः सर्वतथागतधर्मतारहस्यमुद्राज्ञानं शिक्षयेत् ।

तथागतसमोऽहं हि वज्रवाचा सकृद्वदन् ।
द्वयेन्द्रियसमापत्त्या सर्वसत्वां स मारयेत् ॥ १ ॥
महावज्रसमोऽहं हि वज्रवाचा सकृद्वदन् ।
द्वयेन्द्रियसमापत्त्या लोकमाकर्षयेद्ध्रुवं ॥ २ ॥
वज्रधर्मसमोऽहं हि वज्रवाचा सकृद्वदन् ।
द्वयेन्द्रियसमापत्त्या सर्वलोकं स नाशयेत् ॥ ३ ॥
विश्ववज्रसमोऽहं हि वज्रवाचा सकृद्वदन् ।
द्वयेन्द्रियसमापत्त्या सर्वकर्म स साधयेद् ॥ इति ॥ ४ ॥

ततः सर्वतथागतज्ञानवज्राधिष्ठानसमाधिमुद्राज्ञानं शिक्षयेत् ।

सूक्ष्मवज्रप्रयोगेण भावयेद्वज्रमध्यतः ।
बुद्धबिम्बं स्वमात्मानं बुद्धत्वं सो ह्यवाप्नुयाद् ॥ इति ॥

ततो वज्रसत्वसमाधिमुद्राज्ञानं शिक्षयेत् ।

सूक्ष्मवज्रविधिं योज्य हृदि वज्रादयो गणाः ।
भावयं वज्रसत्वाद्याः प्रददन्ति स्वसिद्धये ॥ इति ॥

ततः सर्वतथागतकुलसमाधिसमयमुद्राज्ञानं शिक्षयेत् ।

वज्रबन्धसमुद्भूताः षोडशस्तु प्रकीर्तिताः ।
समाधिसमयाग्र्यस्तु तासां बन्धः प्रवक्ष्यते ॥ १ ॥

पर्यङ्कस्था समुत्ताना वलितोद्ववलिता तथा ।
हृदिस्था च चतुर्थी तु वज्रसत्वादिमण्डले ॥ २ ॥
ललातस्था शिरः पृष्ठे स्कन्धे हासप्रयोजिता ।
मुखधात्री हृदि खड्गा हृद्विकासा मुखस्थिता ॥ ३ ॥
मू(र्धन्)वक्षस्तु वक्त्रस्था ज्येष्ठस्था पुरतस्तथा ।
अतः परं समासेन धर्ममुद्रास्तु शिक्षयेद् ॥ इति ॥ ४ ॥

दृ क्कि । ग्र ग्र । म टः । अ ग्र ।
त्रं त्रं । अं अं । चं चं । त्र टः ।
धृ टः । भृ टः । क्ष सः । ह हः ।
व व । वं वं । फ टः । ग्र सः ॥

ततस्तु धर्मकर्माग्र्य शिक्षयेत्सूक्ष्मवज्रिणं ।
ज्ञानमुष्टिन्तु समयां द्विधीकृत्य प्रयोजयेद् ॥ इति ॥

सर्वतथागतमहायानाभिसमयान्महाकल्पराजाद् वज्रज्ञानधर्ममण्डलविधिविस्तरः परिसमाप्तः ॥

CHAPTER 4

VAJRA-KĀRYA-KARMA-MAṆḌALA-VIDHI-VISTARA

I.4 Emanation of deities from samādhi

अथ भगवान् पुनरपि सर्वतथागतानुत्तरपूजाविधिविस्तररस्फरणकर्मसमयवज्राधिष्ठानन् नाम समाधिं समापद्येमं स्वविद्योत्तममभाषत् **ओं सर्वतथागत वज्रधात्वनुत्तरपूजास्फरण समये हूं ॥**

अथ खल्वक्षोभयस्तथागताः सर्वतथागतवज्रसत्वानुत्तरपूजाविधिविस्तरस्फरणकर्मसमयवज्राधिष्ठानं नाम समाधिं समापद्येमं स्वविद्योत्तममभाषत् **ओं सर्वतथागतवज्रसत्वानुत्तरपूजास्फरणसमये हूं ॥**

अथ खलु रत्नसंभवस्तथागतः सर्वतथागतवज्ररत्नानुत्तरपूजाविधिविस्तरस्फरणकर्मसमयवज्राधिष्ठानं नाम समाधिं समापद्येमं स्वविद्योत्तममभाषत् **ओं सर्वतथागतवज्ररत्नानुत्तरपूजास्फरणसमये हूं ॥**

अथ खल्वमितायुस्तथागतः सर्वतथागतवज्रधर्मानुत्तरपूजाविधिविरतरस्फरणकर्मसमयवज्राधिष्ठानंनाम समाधिं सभापद्येमं स्वविद्योत्तममभाषत् **ओं सर्वतथागतवज्रधर्मानुत्तरपूजास्फरणसमये हूं ॥**

अथ खल्वमोघसिद्धिस्तथागतः सर्वतथागतवज्रकर्मानुत्तरपूजाविधिविस्तरस्फरणकर्मसमयवज्राधिष्ठानं नाम समाधिं समापद्येमं स्वविद्योत्तममभाषत् **ओं सर्वतथागतवज्रकर्मानुत्तरपूजास्फरणसमय हूं ॥**

अथ भगवान् वैरोचनः पुनरपि सर्वतथागतपूजाविधिविस्तरसकलधर्मधातुस्फरणकर्मसमयवज्रन्नाम समाधिं समापन्नः; समनन्तरसमापन्ने चाथ तावदेव सर्वतथागतहृदयेभ्यः स एव भगवां वज्रधरः सकलधर्मधातुस्फरणाः सर्वाकाशधातुसमवसरणाः सर्वविचि [त्र] पूजाव्यूहविधिविस्तरमेघसमुद्रदेवता भूत्वा विनिःसृत्य, सर्वलोकधातुप्रसर-मेघसमुद्रसर्वतथागतपर्षन्मडलेषु सर्वतथागतानुत्तरमहाबोधिचित्तोत्पादनसर्वतथागतकुलारागणसमन्तभद्रचर्या-निष्पादनमहो बोधिमण्डोपसंक्रमणसर्वमारधर्षणसर्वतथागत[समता]भिसंभुध्यनसर्वतथागतमहामण्डलोत्पादनसकल-त्रिलोकविजयसद्धर्मचक्रप्रवर्तनाशेषानवशेषसत्वधात्वर्थकरणादिनि सर्वबुद्धद्धिविकुर्वितानि सन्दर्शयन्तोऽवस्थिताः ॥

ताश्च पूजामेघसमुद्रदेवताः स्वमुद्राव्यग्रकरयुगलाः सर्वतथागतान् विधिवत्संपूज्य, वज्रधातुमहामण्डलयोगेन चन्द्रमण्डलाश्रितो भूत्वेदमुदानमुदानयामासुः ।

अहो हि बुद्धपूजाहं सर्वपूजाप्रवर्तिका ।
यद्बुद्धत्वमहत्वं तु सर्वबुद्धाददन्ति हि ॥

अथ वज्रपाणिः पुनरपि सर्वतथागतपूजादि कर्मविधिविस्तरं वज्रकार्यन्नाम कर्ममण्डलमभाषत् ।

ओं सर्वतथागतसर्वात्मनिर्यातनपूजास्फरण कर्मवज्रि अः ॥
ओं सर्वतथागतसर्वात्मनिर्यातनाकर्षणपूजास्फरण कर्माग्नि ज्जः ॥
ओं सर्वतथागतसर्वात्मानिर्यातनानुरागणपूजास्फरण कर्मवाणे हूं होः ॥
ओं सर्वतथागतसर्वात्मनिर्यातनसाधुकारपूजास्फरण कर्मतुष्टि अः ॥

सर्वतथागतसुखसुखा, सर्वतथागताकर्षणी, सर्वतथागतानुरागिणी, सर्वतथागतसंतोषणी चेति सर्वतथागत-महापूजाः ॥

ओं नमः सर्वतथागतकायाभिषेकरत्नेभ्यो वज्रमणि ओं ॥
ओं नमः सर्वतथागतसूर्येभ्यो वज्रतेजिनि ज्वाल ह्रीः ॥
ओं नमः सर्वतथागताशापरिपूरणचिन्तामणिध्वजाग्रेभ्यो वज्रध्वजाग्रे त्रं ॥
ओं नमः सर्वतथागतमहाप्रीतिप्रामोद्यकरेभ्यो वज्रहासे हः ॥

महाधिपतिनी, महोद्योता, महारत्नवर्षा, महाप्रीतिहर्षा चेति सर्वतथागताभिषेकपूजाः ॥

ओं सर्वतथागतवज्रधर्मतासमाधिभिः स्तुनोमि महाधर्माग्रिह्रीः ॥
ओं सर्वतथागतप्रज्ञापारमितानिर्हारैः स्तुनोमि महाघोषानुगे धं ॥
ओं सर्वतथागतचक्राक्षरपरिवर्तादिसर्वसूत्रान्तनयैः स्तुनोमि सर्वमण्डले हूं ॥
ओं सर्वतथागतसन्धाभाषबुद्धसंगीतिभिर्गायन् स्तुनोमि वज्रवाचे वं ॥

महाज्ञानगीता, महाघोषानुगा, सर्वमण्डलप्रवेशा, मन्त्रचर्या चेति । सर्वतथागतधर्मपूजाः ॥

ओं सर्वतथागतधूपमेघस्फरणपूजाकर्मे कर कर ॥
ओं सर्वतथागतपुष्पप्रसरस्फरणपूजाकर्मे किरि किरि ॥
ओं सर्वतथागतालोकज्वालस्फरणपूजाकर्मे भर भर ॥
ओं सर्वतथागतगन्धसमुद्रस्फरणपूजाकर्मे कुरु कुरु ॥

सत्ववती, महाबोध्यङ्गवती, चक्षुष्मती, गन्धवती चेति । सर्वतथागतकर्मपूजाः ॥

Delineation of the maṇḍala

अथात्र वज्रकार्यकर्ममण्डलं भवत्यशेषानवशेषतथागतपूजाप्रवर्तकमिति ॥

अथातः संप्रवक्ष्यामि कर्मण्डलमुत्तमं ।
वज्रधातुप्रतीकाशं वज्रकार्यमिति स्मृतं ॥
महामण्डलयोगेन बुद्धबिम्बान्निवेशयेत् ।
वज्रसत्वादियोगेन समुद्रा देवता लिखेद् ॥ इति ॥

Initiation into the maṇḍala

अथात्र वज्रकार्यकर्ममण्डलप्रवेशादिविधिविस्तरो भवति ॥

तत्रादित एव प्रवेशयेत् वज्रधातुप्रवेशयोगेन । प्रवेश्यैवं वदेत् । "सर्वतथागतपूजासमयोऽयं । तत्त्वया दिनेदिने एताः षोडशपूजा यथाशक्तितः कार्या" इति ॥

ततो मुखबन्धं मुक्त्वा, कर्ममण्डलं दर्शयित्वा, विश्वचिह्नं पाणिभ्यां दद्यात् ॥

ततः सर्वतथागतैरपि स पूज्यते, कः पुनर्वादोऽन्यैरिति ॥

Mudrā

ततो महबोधिचित्तनिष्पत्तिपूजामुद्राज्ञानं शिक्षयेत् ।

बोधिचित्तदृढोत्पादाद्बुद्धोऽहमिति चिन्तयन् ।
रत्या तु पूजयन्नात्मा लभेद् बुद्धसुखान्यपि ॥ १ ॥
बोधिचित्तदृढोत्पादाद् बुद्धोऽहमिति चिन्तयन् ।
मलादिभिः प्रपूजाभिः संपूज्यात्माभिषिच्यते ॥ २ ॥
बोधिचित्तदृढोत्पादाद्बुद्धोऽहमिति चिन्तयन् ।
गीतिसौख्यप्रपूजाभिः संपूज्यात्मा स रागयेत् ॥ ३ ॥
बोधिचित्तदृढोत्पादाद्बुद्धोऽहमिति चिन्तयन् ।
नृत्यतः पूजयन्नात्मा बुद्धैरपि स पूज्यते ॥ ४ ॥ इति ॥

तत्रेमानि हृदयानि भवन्ति ।

बुद्धात्माहं ॥
बुद्धमभिषिञ्चामि ॥
बुद्धस्तुतिङ्करोमि ॥
बुद्धपूजाङ्करोमि ॥

ततः सर्वबुद्धपूजामुद्राज्ञानं शिक्षयेत् ।

कायवाक्चित्तवज्राग्र्यप्रयोगैः प्रणमन्तथा ।
पूजयं सर्वबुद्धांस्तु वन्दनीयो भवेद् ध्रुवं ॥ १ ॥
सर्वबुद्धमहापुण्यकायवाक्चित्तवज्रजं ।
अनुमोदनपूजात्मा बुद्धत्वं क्षिप्रमाप्नुयात् ॥ २ ॥
आत्मनियतिनाद् दिव्यकायवाक्चित्तवज्रतः ।
सर्वपूजाभिः संबुद्धान् पूजयामीति पूज्यते ॥ ३ ॥
सर्वं कुशलसंभारङ्कायवाक्चित्तवज्रतः ।
परिणामनपूजाभिः सर्वबुद्धसमो भवेद् ॥ इति ॥ ४ ॥

तत्रैतानि भवन्ति ।

प्रणमामि ॥
अनुमोदे ॥
बुद्धपूज ॥
परिणाम ॥

ततो धर्मपूजामुद्राज्ञानं शिक्षयेत् ।

प्रकृतिप्रभास्वरा धर्मा ह्यादिशुद्धाः स्वभावतः ।
पूजितोऽनेन धर्मेण लभेद् रतिसुखानि तु ॥ १ ॥
अ-कारस्तु मुखं वाच्यं सर्वधर्मसमुच्चये ।
अनया धर्ममुद्रया सर्वदुःखांश्छिनत्ति सः ॥ २ ॥
सर्वेषामेव धर्माणां हेतुरत्र तथागतः ।
सद्धर्मचक्रपूजया पूज्य धर्मधरो भवेत् ॥ ३ ॥
प्रतिश्रुत्कोपमानुक्त्वा सर्वधर्मां स्वभावतः ।
अनया धर्मपूजया संपूज्य स्वरतां लभेत् ॥ ४ ॥

तत्रैतानि हृदयानि भवन्ति ।

सर्वशुद्ध ॥
समन्तभद्र ॥
धर्मचक्र ॥
निःप्रपञ्च ॥

ततः समाधिपूजामुद्राज्ञानं शिक्षयेत् ।

कायवाक्चित्तवज्रेषु स्वकीयाः परमाणवः ।
भावयन्वज्रविम्बानि वज्रात्मा भवे[त्क्षिप्रं] ॥ १ ॥

कायवाक्चित्तवज्रेषु स्वकीयाः परमाणवः ।
भावयन् सर्वबुद्धांस्तु धर्मकायो भवेल्लघु ॥ २ ॥
कायवाक्चित्तवज्रेषु स्व(कीयाःपरमा)णवः ।
भावयन्वज्रसत्वांस्तु वज्रसत्वसमो भवेत् ॥ ३ ॥
कायवाक्चित्तवज्रेषु स्वकीयाः परमाणवः ।
भावयन् बुद्धबिम्बानि संबुद्धत्वमवाप्नुयाद् ॥ इति ॥ ४ ॥

तत्रैतानि हृदयानि भवन्ति ।

वज्रकाय ॥
धर्मकाय ॥
सत्वकाय ॥
बुद्धकाय ॥

ततो रहस्यपूजामुद्राज्ञानं शिक्षयेत् ।

सर्वकायपरिष्वङ्गसुखपूजा स्वयंभुवा ।
निर्यातयं भवेच्छीघ्रं वज्रसत्वसमो हि सः ॥ १ ॥
दृढानुरागसंयोगकचग्रहसुखानि तु ।
निर्यातयंस्तु बुद्धानां वज्ररत्नसमो भवेत् ॥ २ ॥
दृढप्रतीतिसुखासक्तिचुम्बिताग्र्यसुखानि तु ।
निर्यातयंस्तु बुद्धानां वज्रधर्मसमो भवेत् ॥ ३ ॥
द्वयेन्द्रियसमापत्तियोगसौख्यानि सर्वतः ।
निर्यातयंस्तु पूजायां वज्रकर्मसमो भवेद् ॥ इति ॥ ४ ॥

तत्रैतानि गुह्यमुद्राहृदयानि भवन्ति ।

रतिवज्र ॥
रागवज्र ॥
प्रीतिवज्र ॥
कामवज्र ॥

ततः सर्वतथागतपूजाकर्ममहामुद्राज्ञानं शिक्षयेत् ।

हृत्पार्श्वपृष्ठतो योगाल्ललाटादेस्तथैव च ।
मुखकर्णशिरःपृष्ठमूर्धासासकटिस्थितेति ॥

ततः सर्वतथागतपूजाकर्मसमयमुद्राज्ञानं शिक्षयेत् ।

वज्रबन्धं दृढीकृत्य महामुद्राप्रयोगतः ।
हृदयादिस्थानयोगेन स्थापयन्पूजयेज्जिनान् ॥ इति ॥

ततः सर्वतथागतपूजाधर्मज्ञानं शिक्षयेत् ।

ओं ग्रयः य्यः सा । त्रि रं हं नः ।
खं षं हूं हि । श ण सिः सं ।

कर्ममुद्राः समासेन कर्ममुद्रा द्विधीकृता ॥ इति ॥

सर्वतथागतमहायानाभिसमयान्महाकल्पराजाद्वज्रकार्यकर्ममण्डलविधिविस्तरः परिसमाप्तः ॥

CHAPTER 5

EPILOGUE OF THE SARVA-TATHĀGATA-MAHĀYĀNĀBHISAMAYA NĀMA MAHĀ-KALPA-RĀJA

I.5 Emanation of deities

अथ भगवान् वैरोचनस्तथागतः सर्वतथागताधिष्ठानेन सर्वतथागतकुलमुत्पाद्य, अस्य सर्वतथागतकुलमहाकल्पविधिविस्तरस्य सर्वसिद्धिसंग्रहार्थमिदं सर्वतथागतमुद्राहृदयमभाषत् **ओं सर्वतथागतमुष्टि वं ॥**

अथ खल्वक्षोभयस्तथागतः सर्वतथागताधिष्ठानेन सर्वतथागतकुलमुत्पाद्यास्य सर्वतथागतकुलमहाकल्पविधिविस्तरस्य सर्वसिद्धिसंग्रहार्थमिमां सर्वतथागतमुद्रामभाषत् **ओं वज्रसत्वमुष्टि अः ॥**

अथ रत्नसंभवस्तथागतः सर्वतथागताधिष्ठानेन सर्वतथागतकुलमुत्पाद्यास्य सर्वतथागतकुलमहाकल्पविधिविस्तरस्य सर्वसिद्धिसंग्रहार्थमिमां सर्वतथागतमुद्रामभाषत् **ओं वज्ररत्नमुष्टि त्रं ॥**

अथामितायुस्तथागतः सर्वतथागताधिष्ठानेन सर्वतथागतकुलमुत्पाद्यास्य सर्वतथागतकुलमहाकल्पविधिविस्तरस्य सर्वसिद्धिसंग्रहार्थमिमां सर्वतथागतमुद्रामभाषत् **ओं वज्रधर्ममुष्टि खं ॥**

अथामोघसिद्धिस्तथागतः सर्वतथागताधिष्ठानेन सर्वतथागतकुलमुत्पाद्यास्य सर्वतथागतकुलमहाकल्पविधिविस्तरस्य सर्वसिद्धिसंग्रहार्थमिमां सर्वतथागतमुद्रामभाषत् **ओं वज्रकर्ममुष्टि हां ॥**

Delineation of the maṇḍala

अथ वज्रपाणिर्महाबोधिसत्वः स्वाधिष्ठानेन भगवतो वैरोचनस्य तथागतस्य सर्वतथागतकुलमुत्पाद्यास्य सर्वतथागतकुलमहाकल्पविधिविस्तरस्य सर्वसिद्धिसंग्रहायेदं वज्रसिद्धिन्नाम चतुर्मुद्रामण्डलमभाषत् ।

अथातः संप्रवक्ष्यामि मुद्रामण्डलमुत्तमं ।
वज्रधातुप्रतीकाशं वज्रसिद्धिरिति स्मृतं ॥ १ ॥
महामण्डलयोगेन सूत्रयेत विचक्षणः ।
बुद्धबिम्बन्निवेश्यादौ लिखेन्मुद्राचतुष्टयं ॥ २ ॥
चन्द्रमण्डलमध्येषु वज्रमुद्रादयो लिखेद् ॥ इति ॥ ३ ॥

Initiation into the maṇḍala

अथात्र वज्रसिद्धिमुद्रामण्डल आकर्षणादिविधिविस्तरङ्कृत्वा तथैव प्रवेश्यैवं ब्रूयात् । "न त्वया कस्यचिदिमं रहस्यपटलमुद्घाटयितव्यं । तत्कस्य हेतोः ? सन्ति सत्वा दुर्दृष्टयः पापकर्माणो हीनवीर्या वैकल्यरहिताः चित्रकर्मण्यनभिज्ञाः; ते वज्रधात्वादिषु सर्वतथागतकुलमण्डलेषु महत्स्विति कृत्वा हीनवीर्यतया न प्रविशन्ते । तेषामर्थायेदं वज्रसिद्धिमुद्रामण्डलं सर्वतथागतकुलमण्डलसमयभूतमशेषानवशेषसत्वधातुपरित्राणसर्वहितसुखसौमनस्यानुभवनार्थं यावत् सर्वतथागतवज्रोत्तम-सिद्धिनिमित्तमधिष्ठितमिति । न त्वयैषां सर्वतथागतकुलसमयमुद्रारहस्यानां न प्रत्यभिश्रद्धानीयं । मा ते नरकतिर्यक्प्रेतोपपत्तिः स्यात्, विषमापरिहारेण वाकालमरणं स्याद्" इत्युक्त्वा, मुखबन्धं मुक्त्वा मण्डलं दर्शयेत् ।

Mudrā

ततः सर्वतथागतमुद्रासमयं ब्रूयात् ।

यां यां मुद्रां तु बध्नीयाद्य [स्य य] स्य महात्मनः ।
जपंस्तु हृदयार्थेन भावयेत्तं स्वमात्मना ॥ १ ॥
अनेन ज्ञानयोगेन सिद्धिं यान्ति महात्मनां ।
सर्वमुद्रास्तु सर्वेषां वज्रपा [णेर्व] चो यथा ॥ २ ॥

ततः सर्वमुद्रारहस्यं ब्रूयात् ।

विदार्य स्वेन्द्रियं गृह्णेद्वज्रमुष्टिग्रहेण तु ।
तेन मुद्रां स्पृशेद्यां तु सा वशं याति तत्क्षणात् ॥

ततः सर्वमुद्राधर्मतां ब्रूयात् ।

सूक्ष्मवज्रविधिं योज्य ज्ञानमुद्रां तु बन्धयेत् ।
अनेन विधियोगेन ज्ञानमुद्रां वशन्नयेत् ॥

ततः सर्वमुद्राकर्म ब्रूयात् ।

गीतनृत्यरसाहारविहारादिसुखानि तु ।
निर्यातयंस्तु बुद्धेभ्यः कर्ममुद्रावशन्नयेद् ॥ इति ॥

ततः सर्वमण्डलसाधिकारहस्यमुद्राज्ञानं शिक्षयेत् ।

स्तब्धलिङ्गः स्वयंभूत्वा निपद्येत्पटके सिते ।
लिङ्गं चैत्यमधिष्ठाय वज्रधातुरहं स्वयं ॥ १ ॥
वज्रबन्धं दृढीकृत्य मध्यमोत्थसमाङ्कुरा ।
कन्यसाग्र्या मुखोत्थानान्समयः समयाग्रीणां ॥ २ ॥
सूक्ष्मवज्रप्रयोगेण भावयेत्स समाहितः ।
मण्डलं सूक्ष्मवज्रां तु समाधिवशितां नयन् ॥ ३ ॥
वज्रमुद्राद्विकं बध्वा गृह्णेद् वज्रान्तयोर्दृढम् ।
कनिष्ठाग्रा निबन्धेन वज्रकार्याग्रमण्डल ॥ ४ ॥ इति ॥

"ततो यथावद् वज्रसत्वादिमहामुद्राबन्धचतुष्टयं शिक्षयित्वा, यथावद् वज्रधातुमहामण्डलविधिविस्तर इति, यथावज्रसिद्धिचतुर्मुद्रामण्डलमेवमक्षोभ्यादीनि सर्वमण्डलानि चतुर्मुद्रामण्डलयोगेन लिखेत् । स्वाभिः स्वाभिर्मुद्राभिः सर्वसिद्धयो ददन्तीति । एवम्पटाकुड्याकाशसर्वस्थानाभिलिखितानि सर्वसिद्धयो ददन्तीति ॥

मण्डलकल्पनात्प्रभृति केषांचित्तस्मिन्नेव मण्डलप्रवेशे सिद्धिर्यथाभिरुचिता, केषांचित्तत आरभ्य दिवसेन, केषांचिद् दिवसचतुष्टयेन, केषांचिच्छोडशाहात्, केषांचित्पञ्चानन्तर्यकारिणामपि यथाकामं सुखतः सर्वकार्याणि कुर्वतां सर्वानुरागसर्वरसाहारविहारसुखान्यनुभवतां वर्षेणोत्तमा सिद्धिरिति भगवता निदिष्टेति ॥

I.6 Emanation of the deity from samādhi

अथ भगवान् वैरोचनः पुनरपि सर्वतथागतोत्तमसिद्धिसमयवज्रन्नाम समाधिं समापद्येमं सर्वतथागतमहायानाभिसमयन्नाम सर्वतथागतहृदयं स्वहृदयान्निश्चचार **वज्रसत्व** ॥

Delineation of the maṇḍala

अथ भगवान् वज्रपाणिर्महाबोधिसत्वः अशेषानवशेषसत्वधातुपरित्राणसर्वहितसुखसौमनस्यानुभवनार्थं

यावत्सर्वतथागतसर्वोत्तमसिद्धये इदं महायानाभिसमयमण्डलमभाषत् ।

अथातः संप्रवक्ष्यामि सत्वमण्डलमुत्तमं ।
वज्रधातुप्रतीकाश वज्रसत्वमिति [स्मृतं] ।। १ ।।
महामण्डलयोगेन सूत्रयेद्बाह्यमण्डलं ।
चन्द्रमण्डलमध्ये तु वज्रसत्वन्निवेशयेद् ।। २ ।। इति ।।

Initiation into the maṇḍala

ततो यथावदाकर्षण [प्रवेशादि कृ] त्वा सर्वतथागतसिद्धिज्ञानान्युत्पादयेत् ।।

तत्र प्रथमन्तावद्वक्तव्यं "न त्वया कस्यचिददृष्टसमयस्यैषां रहस्यानाम [कोवि] दस्य वक्तव्यं । मा ते सर्वापायोपपत्तये भवेयु, विषमापरिहारेणाकालमरणं वा स्याद्" इति ।।

ततो वज्रसत्वोत्तमसिद्धिसाधनज्ञानं शिक्षयेत् ।

पूर्णचन्द्रमण्डलारूढो महामुद्रापरिग्रहः ।
वज्रसत्वं स्वमात्मानं भावयं सिध्यते लघु ।। रिति ।।

ततः सर्वमण्डलगुह्यसमयज्ञानं शिक्षयेत् ।

विरागसदृशं पापमन्यन्नास्ति त्रिधातुके ।
तस्मात्कामविरागित्वं न कार्यं भवता पुनः ।।
महासमय हन फट् ।।

ततः शपथहृदयं दद्यादेवं । सर्वतथागतकुलमण्डलेषु विधिविस्तरेषु समयसंवरन्दातव्यं ।।

ततो वज्रसत्वमहामुद्रादिबन्धचतुष्टयं शिक्षयेत् । तथैव सिद्धय इति । एवं पटादिषु सर्वप्रतिमासु च मनीषितविधानेन सर्वसिद्धयो ददन्ति । एवं यथा वज्रधातुमहामण्डलविधिविस्तर इति ।।

Mudrā

अथ सर्वतथागताः पुनरपि समाजमागत्य, भगवते सर्वतथागताधिपतये महाबोधिचित्ताय वज्रसत्वाय महावज्रपाणये वज्रतुष्ट्यानेन हृदयेन साधुकारमददुः **ओं** ।।

साधु ते वज्रसत्वाय वज्ररत्नाय साधु ते ।
वज्रधर्माय ते साधु साधु ते वज्रकर्मणे ।। १ ।।
सुभाषितमिदं सूत्रं वज्रयानमनुत्तरं ।
सर्वतथागतं गुह्यं महायानाभिसंग्रहं ।। २ ।।
वज्रसत्वस्य नामापि सर्वसिद्धिकरं परं ।
साध्यमानस्तु शुद्धया वै सुखैर्बुद्धत्वमाप्नुयात् ।। ३ ।।
वज्रधर्मप्रयोगेण सर्वकामसुखैः सुखं ।
साधयेज्जन्मनीहैव सुखमक्षयमव्ययम् ।। ४ ।। इति ।।

सर्वतथागततत्वसंग्रहात्सर्वतथागतमहायानाभिसमयो नाम महाकल्पराजा समाप्तः ।।

PART II

Sarva-tathāgata-vajra-samaya nāma Mahā-kalpa-rāja

CHAPTER 6

TRILOKAVIJAYA-MAHĀ-MAṆḌALA-VIDHI-VISTARA

Hymn of 108 names of Mahācakravartin

अथ भगवन्तः सर्वतथागताः पुनः समाजमागम्य, भगवन्तं सर्वतथागतमहाचक्रवर्तिनमनेन नामाष्टशतेनाध्येषितवन्तः।

वज्रसत्व महावज्र वज्रनाथ सुसाधक ।
वज्राभिषेक वज्राभ वज्रकेतु नमो [ऽस्तु ते] ॥ १ ॥

हासवज्र महाधर्म वज्रकोश महावर ।
सर्वमण्डलराजाग्र्य निःप्रपञ्च नमोऽस्तु ते ॥ २ ॥

वज्रकर्म महारक्ष चण्डयक्ष महाग्रह ।
वज्रमुष्टि महामुद्र सर्वमुद्र नमोऽस्तु ते ॥ ३ ॥

बोधिचित्त महाबोधे बुद्ध सर्वतथागत ।
वज्रयान महाज्ञान महायान नमोऽस्तु ते ॥ ४ ॥

सर्वार्थ सर्वतत्वार्थ महासत्वार्थ सर्ववित् ।
सर्वज्ञ सर्वकृत्सर्व सर्वदर्शि नमोऽस्तु ते ॥ ५ ॥

वज्रात्मक सुवज्राग्र्य वज्रवीर्य सुवज्रधृक् ।
महासमय तत्वार्थ महासत्य नमोऽस्तु ते ॥ ६ ॥

वज्राङ्कुश महाकाम सुरते सुमहाप्रभ ।
वज्रप्रभ प्रभोद्योत बुद्धप्रभ नमोऽस्तु ते ॥ ७ ॥

वज्रराजाग्र्य वज्राग्र्य विद्याग्र्याग्र्य नरोत्तम ।
वज्रोत्तम महाग्र्याग्र्य विद्योत्तम नमोऽस्तु ते ॥ ८ ॥

वज्रधातो महागुह्य वज्रगुह्य सुगुह्यधृक् ।
वज्रसूक्ष्म महाध्यान वज्रकार्य नमोऽस्तु ते ॥ ९ ॥

बुद्धाग्र्य बुद्धवज्राग्र्य बुद्धबोधे महाबुध ।
बुद्धज्ञान महाबुद्ध बुद्धबुद्ध नमोऽस्तु ते ॥ १० ॥

बुद्धपूजा महापूजा सत्वपूजा सुपूजक ।
महोपाय महासिद्धे वज्रसिद्धि नमोऽस्तु ते ॥ ११ ॥

तथागतमहाकाय तथागतसरस्वते ।
तथागतमहाचित्त वज्रचित्त नमोऽस्तु ते ॥ १२ ॥

बुद्धाधिप जिनाज्ञाकृद्बुद्धमित्रे जिनाग्रज ।
महावैरोचन विभो[शास्ता]शान्तरौद्र नमोऽस्तु ते ॥ १३ ॥

तथागतमहातत्व भूतकोटे महानय ।
सर्वपारमिताज्ञान परमार्थ नमोऽस्तु ते ॥ १४ ॥

समन्तभद्र चर्याग्र्य मार मारप्रमर्दक ।
सर्वाग्र्य समताज्ञान सर्वत्रग नमोऽस्तु ते ॥ १५ ॥
बुद्धहुंकर हुंकर वज्रहुंकर दामक ।
विश्ववज्राङ्ग वज्रोग्र वज्रपाणे नमोऽस्तु ते ॥ १६ ॥
वन्द्यः पूज्यश्च मान्यश्च सत्कर्तव्यस्तथागतैः ।
यस्माद्वज्रदृढं चित्तं वज्रसत्वस्त्वमुच्यसे ॥ १७ ॥
त्वदधीना हि संबोधि पिता त्वं सर्वदर्शिनां ।
संभूताः संभविष्यन्ति त्वामासाद्य तथागताः ॥ १८ ॥
अनेन स्तोत्रराजेन स्तुयाद्वै सुभक्तितः ।
यो गायंस्तु स्तुयात्सोऽपि भवेद्वज्रधरोपमः ॥ १९ ॥
अध्येषयामस्त्वान्नाथ सर्वबुद्धवशङ्करं ।
सर्वसत्वार्थकार्यार्थमुत्पादय कुलं स्वकम् ॥ २० ॥ इति ॥

Subjugation of Maheśvara and his retinue

अथ वज्रपाणिः सर्वतथागताधिपतिः सर्वतथागताध्येषणवचनमुपश्रुत्य, तद्वज्रं स्वहृदि प्रतिष्ठाप्य, तान् सर्वतथागतान् आहूयैवमाह । "भगवन्तः सर्वतथागता न प्रतिपद्यामि" ॥ सर्वतथागता प्राहुः । "को हेतुः ?" ॥ वज्रधरः प्राह । "सन्ति भगवन्तः सत्वाः महेश्वरा दिदुष्टस] त्वा, ये युष्माभिरपि सर्वतथागतैरविनेयाः, तेषां मया कथं प्रतिपत्तव्यम् !" ॥

अथ भगवान् बैरोचनस्तथागतः [सर्वतथाग]ताधिष्ठानेन सर्वतथागतमहोपायज्ञानवज्रन्नाम समाधिं समापन्नः । समनन्तरसमापन्ने चाथ तावदेव स[र्वतथाग]ताः सकलाकाशधातुपरमाणुरजः समवसरण [स्फरण] ताय सुमेरुगिरिमूर्ध्नि वज्रमणिरत्नकूटागारे [पुनः] समाजमागम्य, सर्वतथागतसमतामध्यालम्भ्य, भगवतो वैरोचनस्य श्रीवत्सहृदये प्रविष्टाः ॥

अथ भगवान् वैरोचनस्तथागतः सर्वतथागतहृदयमात्मानमधिष्ठाय सर्ववज्रसमतया अशेषानवशेषसत्वधातुपरित्राणसर्वहितसुखोत्तमसिद्धिहेतोः सर्वदुष्टविनयाय च, सर्वतथागतमहाकरुणोपायसमाधिज्ञानमध्यालम्भ्य, सर्वतथागतमहाकरुणोपायक्रोधसमय वज्रं नाम समाधिं समापन्नः । समनन्तरसमापन्ने चात्रैतस्मिन्नेव क्षणे सर्वतथागतहृदयेभ्यः सर्वतथागतसमयन्नाम सर्वतथागतहृदयं निश्चचार हुं ॥

अथास्मिन् विनिःसृतमात्रे वज्रपाणिहृदयवज्रात्स एव भगवान् वज्रधरः समन्तज्वालागर्भाः सभ्रुकुटिभ्रूभङ्गोत्कुञ्चितललाटविकटदंष्ट्राकरालमुखाः वज्राङ्कुशकोषपाशादिवज्रज्वालाग्निप्रदीप्तप्रहरणव्यग्रकराः अनेकविधवर्णालङ्कारविचित्रवेषधराः वज्रपाणिविग्रहा विनिश्चरित्वा, सर्वलोकधातुषु सर्वदुष्टविनयङ्कृत्वा, भगवतो वैरोचनस्य सर्वतो वज्रधातुमहामण्डलयोगेन चन्द्रमण्डलाश्रिता भूत्वेदमुदानमुदानयिंसुः ।

अहो ह्युपायविनयं महोपायवतामहं ।
यत्सत्वोपायविनयात्क्रोधत्वं यान्ति निर्मला ॥ इति ॥

अथ भगवान् वैरोचनस्तथागतः सर्वतथागताप्रपञ्चधर्मतामध्यालम्भ्य, सर्वतथागतमहाक्रोधवज्रसमयवज्राधिष्ठानन्नाम समाधिं समापद्येमं सर्वतथागतवज्र-हुङ्-करन्नाम सर्वतथागतहृदयं विद्योत्तममभाषत् ।

ओं सुंभ निसुंभ हुं ।
गृह्ण गृह्ण हुं ।
गृह्णापय हुं ।
आनय हों भगवन् ।
वज्र हुं फट् ॥

अथास्मिन् विनि:सृतमात्रे सर्वतथागतहृदयेभ्यो भगवान्वज्रपाणिर्विनि:सृत्य, सर्वलोकधातुप्रसरमेघसमुद्रेभ्यो यावन्त: सर्वतथागता: सबोधिसत्वपर्षद्मण्डला: समाधिष्ठायाकृष्य, वज्रसमयमहामण्डले प्रवेश्य, समयैर्बध्वा, पुनरप्येकघनो महावज्रक्रोधकायो भूत्वा, भगवतो [वैरो]चनस्य हृदये स्थित्वेममुदानमुदानयामास।

अहो हि बोधिचैत्तस्य सर्वतो भद्रतानघा।
यत्सत्वविनयाद्याति क्रोधोऽपि रमणीय [ताम्॥ इति]॥

अथ स महावज्रक्रोधकायो भगवतो हृदयादवतीर्य, सर्वतथागतानां पुरतश्चन्द्रमण्डलाश्रितो भूत्वा, पुनरप्याज्ञां मार्गया [मास]॥

अथ भगवान् सर्वतथागतसमयाकर्षणवज्रन्नाम समाधिं समापद्येदं सर्वतथागतसमयाङ्कुशन्नाम सर्वतथागतहृदयं स्वहृ [दय] न् निश्चचार **हुं टक्कि ज्ज:॥**

अथास्मिन् विनि:सृतमात्रे सर्वलोकधातुप्रसरमेघसमुद्रेषु यावन्तस्त्रैलोक्याधिपतयो महेश्वरादयस्ते स[र्वे स]र्वलोकसन्निवेशगणपरिवृता: अशेषानवशेषा: सर्वतथागतसमयवज्राङ्कुशेनाकृष्टा: समाना येन सुमेरुगिरिमूर्धा [येन] च वज्रमणिरत्नशिखरकूटागारस्तेनोपसंक्रम्य, भगवतो वज्रमणिरत्नशिखरकूटागारस्य सर्वत: परिवार्यावस्थिता अभूवन्॥

अथ वज्रपाणिस्तद्वज्रं स्वहृदयादगृह्योल्लालयन् सर्वावन्तं सकलत्रैधातुकत्रिलोकचक्रमवलोक्यैवमाह। "प्रतिपद्यत [मार्षा] स्सर्वतथागतशासने, मम चाज्ञां पालयत!"। अथ त एवमाहु:।" कथम् प्रतिपद्याम: ?"। भगवान् वज्रपाणिराह।" बुद्धं धर्मं च सङ्घं च शरणगमनं प्रतिपत्तित:, सर्वज्ञज्ञानलाभाय प्रतिपद्यध्वं मार्षा!" इति॥

अथ योऽस्मिन् लोकधातौ सकलत्रैलोक्याधिपतिर्महादेव: सर्वत्रैलोक्याधिपत्यगर्वितो महाक्रोधतान्दर्शयन्नेवमाह। "अहं भो यक्ष त्रैलोक्याधिपतिरीश्वर: कर्ता विकर्ता सर्वभूतेश्वरो देवातिदेवो महादेव:; तत्कथमहं ते यक्षाज्ञाङ्करिष्यामी-?" ति॥

अथ वज्रपाणि: पुनरपि वज्रमुल्लालयन्नाज्ञापयति। "भो दुष्टसत्त्व शीघ्रं प्रविश मण्डलं, मम च समये तिष्ठ!"।

अथ महादेवो देवो भगवन्तमिदमवोचत्।" कोऽयं भगवन्नीदृश: सत्वो योऽयमीश्वरस्यैवमाज्ञान्ददाति ?"।

अथ भगवान् सर्वावन्तं महेश्वरादित्रैलोक्यगणमाहूयैवमाह।" प्रतिपद्यत मार्षास्त्रिशरणगमनसमयसंवरे; मायं वज्रपाणिर्यक्ष: क्रूर: क्रोधनश्चण्डो महाबोधिसत्वश्च वो दीप्तेन वज्रेण सकलमेव त्रैधातुकं नाशयेद्" इति।

अथ महेश्वर: सकलत्रैलोक्याधिपत्यतया स्वज्ञानवशितया च भगवतो वज्रपाणेर्भयसन्दर्शनार्थं महाचण्डक्रोधतां महाभैरवरूपतां महाज्वालोत्सृजनतां महा [रौ] द्राहासतां सहगणै: सन्दर्शयन्नेवमाह। "अहं भो: सकलत्रैलोक्याधिपस्त्वं ममाज्ञान्ददासी—" ति॥

अथ वज्रपाणिस्तद्वज्रं [सगर्वम्] उल्लालयन् विहसन्नेवमाह।" प्रतिपद्य भो कटपूतनमानुषमान्साहार चितिभस्मभक्ष्यभोज्य शय्यासनप्रावरण ममाज्ञा [म्पालय]!"। अथ महेश्वरो महादेव: सकलं त्रैलोक्यं महाक्रोधाविष्टमधिष्ठाय, एवमाह। "त्वमपि ममाज्ञां पालय, समये च प्रति [पद्य!" इ] ति॥

अथ वज्रपाणिर्महाक्रोधराजो भगवन्तमेतदवोचद्। "अयम्भगवन्महादेवो देव: स्वज्ञानबलगर्वात् महेश्वर्या [धिप] त्यात् च सर्वतथागतशासने न प्रणमति। तत्कथमस्य क्रियत ?" इति॥

अथ भगवान् सर्वतथागतहृदयसंभूतं महावज्रस [मयं] स्मारयति **ओं निसुम्भ वज्र हुं फट्॥**

अथ वज्रपाणिर्महाबोधिसत्व: स्ववज्रहृदयमुदाजहार **हुं॥** अथास्मिन् भाषितमात्र सकलत्रैधातुकसन्निपतिता महादेवादय: सर्वत्रैलोक्याधिपतय: अधोमुखा: प्रपतिता: आर्तस्वरं मन्वन्तो भगवतो वज्रपाणेश्च शरणं गता:। स च महादेवो देवो भूम्यां प्रपतितो निश्चेष्टीभूतो मृत:॥

अथ भगवान् जानन्नेव वज्रपाणिमेवमाह। "प्रतिपद्यस्व वज्रपाणे अस्य सकलत्रिलोकचक्रस्याभयाय, मा पञ्चत्वमापादय"। अथ वज्रपाणिर्महाक्रोधराजो भगवतो वचनमुपश्रुत्य तां सर्वदेवादीनाहूयैवमाह।" बुद्धं धर्मं सङ्घं

च शरणं प्रतिपद्यत, ममाज्ञाकारितायां च, यदीष्टं वः स्वजीवितम्" इति। अथ त एवमाहुः। "सबुद्धधर्मसङ्घसमुद्रांच्छरणं गच्छामः, त्वच्छासनाज्ञां न जानीम" इति ॥

अथ भगवान् वैरोचनस्तथागतस्तानाहूयैवमाह। "अयं भो देवोऽस्माकं सर्वतथागताधिपतिः सर्वतथागतपिता सर्वतथागताज्ञाकरः सर्वतथागतज्येष्ठपुत्रो भगवां समन्तभद्रो बोधिसत्वो महासत्वः सर्वसत्वविनयेन कार्यकरणतया महाक्रोधराज्यतायामभिषिक्तः। तत्कस्माद्धेतोः ?। सन्ति युष्मद्मध्ये महादेवादयो दुष्टगणास् ते सर्वतथागतैरपि न शक्याः शान्तया पापेभ्यो निवारयितुं। तेषां पापसत्वानां निग्रहाय अधितिष्ठितस्तद्युष्माभिरस्य समये स्थातव्यमित्याज्ञा" इति। त एवमाहुर्। "अस्माकं भगवन्तस्माज्जीवितविप्रलायात्परित्रायस्व। यामाज्ञान्दास्यति तत्करिष्यामह" इति। भगवानाह। "हं भो मार्षा एतमेव शरणं गच्छतायमेव वः परित्रास्यति, नान्य" इति ॥

अथ ते त्रिलोकसकलत्रैधातुकसन्निपतिताः त्रिभुव [नपत] यो येन भगवान् वज्रधरस्तेनाभिमुखा एककण्ठेन महार्तान् स्वरान्प्रमुञ्चत एवमाहुः। "परित्रायस्व भो भगवन् परित्रायस्व अतो मरणदुःखाद्" इति ॥

अथ वज्रपाणिर्महाबोधिसत्वस्तां देवादीनाहूयैवमाह। "हं भो दुष्टाः प्रतिपद्यत मम शासने। मा वो [दीप्तेना] नेन वज्रेण एकज्वालीकृत्य, सर्वानेव भस्मीकुर्याम्" इति। त एवमाहुः। "समन्तभद्रस्त्वं भगवन्सर्वतथागतचित्तोत्पाद [: शान्तविनीतः] सर्वसत्वहितैषी सर्वसत्वाभयप्रदः। तत्कथं भगवन्नस्माकन्निर्दहिष्यती—?" ति। अथ वज्रपाणिर्महाक्रोधराजस्तानेवमाह। "[अहं भो] मार्षाः समन्तभद्रो येन सर्वतथागताज्ञाकारित्वाद्युष्मद्विधानां दुष्टसत्वजातीयानां पापचित्तानां संशोधनार्थाय, विनाशयामि यदि मत्समये न तिष्ठत" इति। ते प्राहुर् "एवमस्त्व" ति ॥

अथ वज्रपाणिर्महाक्रोधराजो महेश्वरं मुक्त्वान्यान्देवानाश्वास्योत्थापनार्थमिदम् वज्रोत्तिष्ठन्नाम सर्वतथागतहृदयमभाषत् **वज्रोत्तिष्ठ** ॥ अथास्मिन् भाषितमात्रे महेश्वरं मुक्त्वा सर्वे ते त्रिधातुकसन्निपतितास्त्रिभुवनपतयः सपरिवाराः संमूर्च्छिताः समानाः समाश्वस्तहृदया अभूवन् दिव्यानि सुखान्यनुभवन्तो विगतभयच्छंभितरोमहर्षा भगवन्तं वज्रपाणिनमवलोकयन्तः समुत्थिता इति ॥

अथ भगवान् वज्रपाणिं बोधिसत्वमामन्त्रयामास। "अयं महासत्वो महादेवो देवाधिपतिर्नोत्थापितः, तत्किमस्य जीवितविप्रणाशेन कृतेन ? ; जीवापयैनं, सत्पुरुषोऽयं भविष्यती—" ति। अथ वज्रपाणिर् "एवमस्त्व्" इति कृत्वेदं मृत संजीवनहृदयमुदाजहार **वज्रायुः** ॥ अथास्मिन् भाषितमात्रे महादेवो देवो मृतः संजीव्योत्थातुमिच्छति, न शक्तो व्युत्थातुं। ततो भगवन्तमेतदवोचत्। "किमहं भगवता एवं शास्यामि ?"। भगवानाह। "न त्वं प्रतिपद्यस्वास्य महासत्पुरुषस्याज्ञाङ्कर्तुं। अयमेव तेन शास्ति, नाहं"। महेश्वरः प्राह। "किन्न त्वं भगवंच्छक्तोऽस्माद्दुष्टसत्वान्परित्रातुम् ?" इति। भगवानाह। "नाहमस्मात्समर्थः परित्रातुं"। आह। "तत्कस्माद्धेतोर्"। आह। "सर्वतथागताधिपतित्वात्"। आह। "नाहं भगवं भगवतो भाषितस्यार्थमाजाने। किन्तु यत्र हि नाम तथागतानामपि सर्वत्रैधातुकाधिपतीनामन्योऽधिपतिस्तन्न जाने कोऽयम्" इति ॥

अथ भगवान् वज्रपाणिर्महाबोधिसत्वः पुनरपि महादेवमाहूयैवमाह। "न प्रतिप[द्यसि किं] दुष्टसत्व ममाज्ञाङ्कर्तुम् ?" इति। अथ महादेवो वज्रसत्ववचनमुपश्रुत्य कुपितश्चण्डीभूतस्तथा पतित एव पुनरपि महारौद्ररूपतां दर्शय[न्ने]वमाह। "मरणमप्युत्सहामि; न च तवाज्ञाङ्करिष्यामि" ॥

अथ वज्रपाणिर्महाबोधिसत्वो महाकोपतां सन्दर्शयन्स्वक्रमतालादिद [मनुच] रन् निश्चचार **ओं पादाकर्षण वज्र हूं**।

अथ भगवतश्चरणतालात्समन्तज्वाला गर्भाकृतभ्रुकुटीदंष्ट्राकरालमहावक्त्रो वज्रा नुचरो भगवतो वज्रपा]णेः पुरतः स्थित्वाज्ञां मार्गयामास ॥

अथ वज्रपाणिर्महेश्वरसंशोधननिमित्तमेवमाह **ओं पादाकर्षाकर्षस्य सर्ववज्रधरानुचर [कण्ड कण्ड व] ज्र हूं जः** ॥

अथैवमुक्ते महादेव उमादेवीसहितः ऊर्ध्वपादो नग्नः सर्वजगद्भिरुपहस्यमानः पादाकर्षणवज्रानुचरेण भगव [तो वज्रपा]णेः पुरतः पादताले स्थापित इति।

अथ वज्रपाणिर्बोधिसत्वो भगवन्तमेतदवोचत। "अयं भगवन् दुष्टसत्वः सपत्नीकः किं करोमि ?" [इति]।

भगवानाह **ओं वज्राक्रम होः** ॥ अथैवमुक्ते वज्रपाणिर्महाबोधिसत्वो महादेवं वामपादाक्रान्तं कृत्वा, दक्षिणेन चोमा [याः स्तनौ पीड]यन्निदं स्वहृदयमुदाजहार **ओं वज्राविश हनय त्रं त्रट्** ॥

अथास्मिन् भाषितमात्रे महादेवः समाविष्ट्वा, स्वकरसहस्रेण मुख[सह]स्रमहनत्। अथ वज्रमणिरत्नशिखरकूटागारस्य बाह्यतः सर्वत्रिभुवनैर्महानादो मुक्तः। "अयं सोऽस्माकमधिपतिरनेन महात्मना [शास्यत" इति] ॥

अथ भगवान् महादेवस्योपरि महाकरुणामुत्पाद्य, इदं सर्वबुद्धमैत्रीहृदयमभाषत् **ओं बुद्ध मैत्री वज्र रक्ष हं** ॥

अथास्मिन् भाषितमात्रे महादेवस्य तदावेशदुःखमुपशान्तं। तच्च वज्रपाणिपादतलस्पर्शमनुत्तरसिद्धचभिषेकसमाधिविमोक्षधारणी ज्ञानाभिज्ञावाप्तये यावत् तथागतत्वाय संवृत्त इति। अथ महादेवो भगवत्पादतलस्पर्शात्सर्वतथागतसमाधिधारणीविमोक्षसुखान्यनुभवन्त महादेवकायं वज्रपाणिपादमूले निपातयित्वा, अधस्ताद् द्वात्रिंशद्गङ्गानदीवालुकोपमलोकधातुपरमाणुरजः समा लोकधातवोऽतिक्रम्य, भस्मच्छत्रा नाम लोकधातुस्तत्र भस्मेश्वरनिर्घोषो नाम तथागत उत्पन्नः। अथ तस्मान्महादेवकायादिदमुदानं नि.सृतवान्।

अहो हि सर्वबुद्धानां बुद्धज्ञानमनुत्तरं।
पातयित्वाक्षरपदे निर्वृत्तौ स्थापयन्ति हि ॥ इति ॥

अथ वज्रपाणिर्महाबोधिसत्वस्तानन्यान् नारायणादान् सर्वत्रिलोकाधिपतीनेवमाह। "प्रविशध्वं मार्षा अस्मिन्सर्वतथागतवज्रसमयमहामण्डले; प्रविष्ट्वा सर्वतथागतसमयमनुपालयत!"। त एवमाहुः। "यथा ज्ञापयसि तथा कुर्म" इति ॥

अथ वज्रपाणिर्महाबोधिसत्वस्तांस्त्रिभुवनसन्निवेशानाहूयैवमाह। "प्रतिगृह्णत मार्षाः पुनस्त्रिशरणगमनशिक्षासमयसंवरं, मम च समये तिष्ठत!"। त एवमाहुः "एवमस्त्विति। किन्तु वयं तव समयम्[अकोविदाः]"।

अथ वज्रपाणिः स्वसमयमनुप्रादात्। बोधिचित्तं समुत्पद्य यथा च क्रमतः पर[म्। बोध्यर्थाय यथाबलं यत]ध्वं सुसमाहिताः ॥

अथ वज्रपाणिर्महाबोधिसत्वः तेषां देवादीनां, "प्रवेशमहासमयमुद्रां बन्धान" इति कृत्वा, बन्धयन्ति स्म, अनेन [महासमय-] मुद्राहृदयेनेति।

ओं वज्र समय गृह्ण बन्ध समयं,
वज्रसत्व समयमनुस्मर सर्वतथागतसमयस्त्वं।
दृढो मे भव, स्थिरो मे भव, [आहार्यो मे भव, अप्रतिहा]र्यो मे भव,
सर्वकर्मसु च मे चित्तश्रेयः कुरु।
ह ह ह ह हूं ॥

अथास्मिन्नुच्चारितमात्रे सकलत्रैधातुकत्रिभुवनजनसनिवेशस्य [वज्रक्रोध-तेरिन्तिरि-मुद्रापाणिभ्यामाविश्य बन्धतो दृढीभूतेति ॥

New names of Śaiva deities

अथ वज्रपाणिर्यथावत्प्रवेशयित्वा, सर्वमहामण्डलं यथानुपूर्वेण देशयित्वा, वज्ररत्नाभिषेकैरभिषिच्य, वज्रचिह्नानि च करेभ्यो दत्वा, वज्रनामाभिषेकैरभिषिच्य, सर्वतथागतसत्वार्थतायां स्थापयामास। अथ सर्वत्रैलोक्याधिपतीनां कर्म भवति। तद्यथा, महेश्वराय क्रोधवज्रः, नारायणाय मायावज्रः, सनत्कुमाराय वज्रघण्टः, ब्रह्मणे मौनवज्रः, इन्द्राय वज्रायुधः, इति विद्याराज्यका इत्यभिषिक्ताः। ततोऽन्तरीक्षचराणां सर्वदेवाधिप [तीनामनुप्रादात्।] तद्यथा, अमृतकुण्डले वज्रकुण्डलिः, इन्दवे वज्रप्रभः, महादण्डाग्राय वज्रदण्डः, पिङ्गलाय वज्रपिङ्गलः, इत्येवमादाय वज्रक्रोधा इत्यभिषिक्ताः। तत आकाशचराणां सर्वदेवाधिपतीनामनुप्रादात्। तद्यथा, मधुमत्ताय वज्रशौण्डः, मधुकराय वज्रमाला, जयाय वज्रवशी, जयावहाय विजयवज्र, इत्येवमाद्या गणपतय इत्यभिषिक्ताः। ततो भौमानां सर्वदेवाधिपतीनामनुप्रादात्। तद्यथा, कोशपालाय वज्रमुसलः, वायवे वज्रानिलः, अग्नये वज्रानलः, कुबेराय वज्रभैरवः, इत्येवमादयो दूता इत्यभिषिक्ताः। ततः पातालाधिपतीनां सर्वदेवानामनुप्रादात्। तद्यथा, वराहाय वज्राङ्कुशः, यमाय वज्रकालः,

पृथ्वीचूलिकाय वज्र-विनायकः, वरुणाय नागवज्रः, इत्येवमाद्याश्चेटका इत्यभिषिक्ताः ॥

New names of Śaiva goddesses

ततस्त्रैलोक्याधिपतिः सर्वदेवीनां वज्ररत्नाभिषेकेणाभिषिच्य, स्वचिह्नेभ्यो वज्राधिष्ठाप्य, [वज्र] नामाभिषेकेणाभिषिच्य, सर्वतथागतसत्वार्थतायां प्रतिष्ठापयामास। तद्यथा, उमायै क्रोधवज्राग्निः, रुक्मिण्यै [वज्रसौवर्णी], षष्ठ्यै वज्रकौमारी, ब्रह्माण्यै वज्रशान्तिः, इन्द्राण्यै वज्रमुष्टिरि,त्येवमाद्या वज्रराजनिका इत्यभिषिक्ताः। ततोऽन्तरीक्षचरीणां [सर्वमा] तृणामनुप्रादात्। तद्यथा, अमृतायै वज्रामृता, रोहिण्यै वज्रकान्तिः, दण्डहारिण्यै दण्डवज्राग्रा, जातहारिण्यै वज्र[मेखला], इत्येवमाद्या वज्रक्रोधिन्य इत्यभिषिक्ताः। ततः खेचरीणां सर्वमातृणामनुप्रादात्। तद्यथा, मारण्यै वज्रविलया, [अशना] यै वज्राशना, वसनायै वज्रवसना, रत्यै वज्रवशा, इत्येवमाद्या गणिका इत्यभिषिक्ताः। ततो भूचरीणां सर्वमातृणामनुप्रादात्। तद्यथा, शिवायै वज्रदूती, वायव्यै वेगवज्रिणी, आग्नेध्र्यायै वज्रज्वाला, कुबेर्यै वज्रविकटा, इत्येवमाद्या वज्रदूत्य इत्यभिषिक्ताः। ततः पातालवासिनीनां सर्वमातृणामनुप्रादात्। वाराह्यै वज्रमुखी, चामुण्डायै वज्रकाली, च्छिन्ननासायै वज्रपूतना, वारुण्यै वज्रमकरी, इत्येवमाद्या वज्रचेट्य इत्यभिषिक्ताः ॥

अथ वज्रपाणिर्महाबोधिसत्वः तेषां सर्वप्रविष्टानाम्बुद्धज्ञानानि निष्पाद्य, सर्वमुद्राबन्धानि शिक्षयित्वा, वज्रसमयान्यनुप्रादात्, अनेन शपथहृदयेन।

अयं वज्रो महावज्रस्सर्वबुद्धैरधिष्ठितः ।
समयव्यतिक्रमात्क्षिप्रं भस्मीकुर्यात्कुलानि तु ॥
ओं हन समय हुं फट्

Mudrā

ततो हृदयग्रहणमुद्रामनुप्रादात्।

वज्रमुद्राद्विकं बध्वा तर्जन्यङ्कुशबन्धितं ।
वलितोद्वलितं कुर्याद्यस्तु कार्यार्थचिन्तकः ॥ १ ॥
तस्य युष्माभिः पुरतः स्थातव्यं कार्यसिद्धये ।
मा वो जीवितनाशाय भवेत्समयो ह्ययम् ॥ २ ॥
वज्रबन्धं दृढीकृत्य कुञ्चिताग्र्या सुयन्त्रितं ।
सन्धायाङ्गुष्ठयुगलं पीडयेन्मध्यमाद्वयं ॥ ३ ॥
अयं वः समयो हन्याद् यदि कश्चिदतिक्रमेत् ।
बन्धं समयमुद्राया वज्रविद्याधरस्य तु ॥ ४ ॥
कनिष्ठाङ्ग लिबन्धन्तु वज्रमुद्राद्विकस्य तु ।
पृष्ठतोऽग्राङ्ग ुलिग्रस्तं परिवर्त्य शिरे स्थितं ॥ ५ ॥
वज्रविद्याधराबन्धः समयाऽयं महात्मनः ।
यस्तु क्रोधो निरीक्षेत स्थेयन्तस्य पुरस्तथा ॥ ६ ॥
वज्ररक्षां दृढां बध्वा वज्रबन्धं तु पीडयेत् ।
भौमानां समयो ह्येष सर्वसत्वाभिरक्षकः ॥ ७ ॥
यस्तु कश्चित्परित्रार्थे बन्धेत्क्रोधसमन्वितः ।
रक्षायै[य]स्य सत्वस्य स्थातव्यं तस्य पृष्ठतः ॥ ८ ॥
वज्रमुद्राद्विकं बध्वा वामवज्राग्रपीडिता ।
वलितोद्वलितं कृत्वा स्फोटयेत्कन्यसाङ्ग लि ॥ ९ ॥

य[दि क्रोधं समाविशेत्] प्रयुञ्जेत् समयोह्य ।
तस्य युष्माभिः पुरतः स्थेयं सर्वाग्रसिद्धय ।। इति ।। १० ।।
ग्रन्थितं वज्रबन्धेन दृढन्तर्जनी [योगेन] ।
मध्यमाङ्गुष्ठमुखयोर्वज्रमुद्रां परिक्षिपेत् ।। ११ ।।
परिवर्त्य ललाटे तु स्थाप्य यस्तु समाह्वयेत् ।
तस्य स्थेयं पुरः शश्वद् यदि जीवि[तं स्थापयेद् ।। १२ इ]ति ।।

अथासां सकलत्रिलोकहृदयग्रहणसमयमुद्राणां समयग्रहणहृदयानि भवन्ति ।

ओं वलितोद्वलित वज्राकर्षस्य [**हुं ज्जः ।।**] वज्रवलितमुद्राया देवाकर्षणहृदयं ।

हुं वज्राग्र पीडय समय हुं ।। अन्तरीक्षचराणां ।

ओं वज्रमालाग्र वं ।। मालधारिणी [नां ।]

ओं वज्रबन्ध हं ।। भूचराणां ।

ओं वज्र पाताल भंज भंज हुं फट् ।। पातालनिवासिनां ।

ओं हेरूक वज्र समय सर्व-दुष्ट समय मुद्रा प्रभंजक हुं फट् ।। सर्वमातृणामिति ।।

अथ भगवान् वज्रपाणिर्भगवन्तमेतदवोचत् । "अहं भगवं सर्वतथागतैर्दुष्टदमक इत्यभिषिक्तः, तत्साध्वाज्ञापयैषां सर्वदुष्टमण्डलबन्धानां कथं प्रतिपद्यामि" ।

अथ भगवानिदमुपश्रुत्य एवमाह । **ओं वज्र सुंभ निसुंभ हुं फट्** ।।

अथ वज्रपाणिर्महाबोधिसत्वः सर्वसत्वपरित्राणार्थमिदं सर्वमण्डलाकर्षणहृदयमभाषत् ।

ओं वज्र समयाकर्षय सर्व-मण्डलान् वज्र-धर सत्यं मातिक्रम हुं फट् ।।

वज्राङ्कुशद्वयं हृदये परिवर्तितं ।
अर्गाङ्कुशीद्वया बाह्यमण्डलाकर्षणं परं ।।

अथास्मिन् भाषितमात्रे सर्वमण्डलानि सर्वतः सुमेरुगिरिमूर्ध्नि बाह्यतः परिवार्यावस्थितानि ।

अथ भगवान् वज्रपाणिस्तां सर्वमण्डलसन्निवेशानाहूयैवमाह । "प्रतिपद्यत मार्षाः प्राणातिपातवैरमण्यसमयसंग्रहणम् !" इति । अथ तैर्बाह्यमण्डलसमयसत्वैर्भगवां विज्ञप्तो, "वयं भगवन् मान्साहारा दुष्टसत्वतया ओजोहारेण जीविकां कल्पयामः; तदाज्ञापयतु भगवान् कथमस्माभिर्जीवितव्यम्" इति ।

अथ वज्रपाणिर्महाबोधिसत्व इमं दुष्टवज्रक्रोधमभाषत् । **ओं दुष्टवज्रक्रोध हन दह पच विध्वंसय विकिर सर्वदुष्टसमयमुद्रामण्डलान् भंज भंज मर्द मर्द खाद खाद परमन्त्रान् वज्र समय हुं फट्** ।।

वज्र क्रोधाङ्गुली सम्यग्नखसन्धानवेष्टिते ।
सन्धयेन्मुखतो गाढां मुद्रेयं दुष्टनाशनी ।। ति ।।

अथास्मिन् भाषितमात्रे सर्वदुष्टमण्डलानि एकध्यीभूत्वानेकानि विध्वन्सितानि विकीर्णानि, समयमुद्राबन्धाः स्फोटिताः । ते च दुष्टसमयसत्वा दह्यमानाः पच्यमाना महान्तो महारौरवान्तान्तान् खान् मुञ्चन्तो, येन भगवान् महावज्रधरस्तेनाञ्जलयो बध्वैवमाहुः । "परित्रायस्व भगवन्, येन वयं प्राणान् न परित्यजामः !" ।

अथ वज्रपाणिः पुनरपि भगवन्तमेतदवोचत् । "आज्ञापयस्व भगवन् कथमेषां दुष्टमण्डलानां प्रतिपद्यामि" ।

अथ भगवानिदमुवाच **ओं निसुंभ हन दह पच गृह्ण बन्ध हुं फट्** ।।

अथ वज्रपाणिर्महाबोधिसत्व इ[मं] वज्रक्रूरक्रोधमभाषत् **ओं महावज्रक्रूरक्रोध पातय सर्वदुष्टमण्डलान्, विनाशय सर्वदुष्टसमयान्, विकिर विध्वं[सय स्फो] टय भंजय सर्वदुष्टसमयमुद्राबन्धान्, गृह्ण हन दह पच सर्वदुष्टसमयसत्वान्, वज्र समय हुं फट्** ।।

अथास्मिन् भाषितमात्रे सर्वदुष्टसमयमुद्रामण्डलानि पुनरप्येकध्यीभूत्वा महासागरे प्रपतितानीति ।।

अथ वज्रपाणिर्महाबोधिसत्वः पुनरपि भगवन्तमेतदवोचत् । "अहं भगवता सर्वदुष्टदमनायाध्येषितः । तदेषां

डाकिनीग्रहादीनां सर्वग्रहाणां कथं प्रतिपद्यामि ? ।"

अथ भगवानिदमवोचत् **ओं हन हन वज्र हुं फट् ॥**

अथ वज्रपाणिर्महाबोधिसत्वः पुनरपि सर्वडाकिन्यादिदुष्टग्रहाकर्षणहृदयमभाषत् **ओं वज्राकर्षय शीघ्रं सर्व-दुष्टग्रहान् वज्रधरसत्येन हुं जः ॥**

अथास्मिन् भाषितमात्रे डाकिन्यादयः सर्वदुष्टग्रहाः सुमेरुगिरिमूर्ध्नि बाह्यतो मण्डलीभूत्वावस्थिता इति ॥

अथ वज्रपाणिर्महाबोधिसत्वः तां डाकिन्यादीन् सर्वदुष्टग्रहानाहूयैवमाह । "प्रतिपद्यत मार्षाः प्राणातिपातवैर-मण्यशिक्षासमयसंवरे; मा वो वज्रेणादीप्तेन प्रदीप्तेनैकज्वालीभूतेन कुलानि निर्दहेयम्" ।

अथ ते डाकिन्यादयः सर्वदुष्टग्रहा येन भगवान् तेनाञ्जलिम् बध्वा भगवन्तं विज्ञापयामासुः ।" वयं भगवन् मान्साशिनस्, तदाज्ञापयस्व कथं प्रतिपत्तव्यम्" इति ।

अथ भगवान् वज्रपाणिमेवमाह "प्रतिपद्यस्व वज्रपाणे एषां सर्वानां महाकरुणामुत्पाद्योपायन्दातुम्" इति ।

अथ वज्रपाणिर्महाकारुणिक इदम् सर्वसत्वमरणनिमित्तज्ञानमुद्राहृदयमभाषत् **ओं वज्र प्रतिगृह्ण हृदयमाकर्षय, यद्ययं सत्वो मांसादत्वेन म्रियते, तदस्य हृदयन्निष्क्रमतु, समय हुं ज्जः ॥**

अथास्य मुद्राबन्धो भवति ।

वज्रबन्धं समाधाय बाहुभ्यां सुहृदं हृदि ।
वज्राङ्गुलिमुखाभ्यान्तु स्वकक्षौ तु समुत्कर्षेद् ॥ इति ॥

अनया मुद्रया भवद्भिः सर्वसत्वहृदयान्यपकृष्य भोक्तव्यानी—" ति ।

अथ ते डाकिन्यादयः सर्वदुष्टग्रहा हुलुहुलुप्रक्ष्वेडितानि कृत्वा स्वभवनं गता इति ॥

अथ भगवान् वज्रपाणिः पुनरपि भगवन्तमेतदवोचत् । "अहं भगवद्भिः सर्वतथागतैः सर्वदुष्टदमक इति कृत्वाध्यिष्टः । तदाज्ञापयतु मे भगवान् ज्वरादीनां व्याधीनां किङ्करोमि ।" ।

अथ भगवानाह **ओं हुं फट् ॥**

अथ वज्रपाणिर्महाबोधिसत्वः सर्वज्वराद्याकर्षणहृदयमुदाजहार **ओं वज्र समयानय सर्व—[दुष्ट]—ज्वरा-दीन्नाशय हुं फट् ॥**

अथास्मिन् भाषितमात्रे ज्वरादयः सर्वे सुमेरुगिरिमूर्ध्नि बाह्यतः परिवार्यावस्थिता अभूवन् ।

अथ वज्रपाणिस्तान् ज्वरादीनाहूयैवमाह । "प्रतिपद्यत मार्षाः सत्वोपघातवैरमण्यशिक्षाग्रहणसंवरे !" । अथ त एवमाहुः । "वयं भगवन् सत्वौ [जोऽप] हृत्य जीविकां कल्पयामः । तत्साधु भगवनाज्ञापयतु कथं प्रतिपद्यामह" इति ।

अथ वज्रपाणिर्महाबोधिसत्व इदं स्वकर्मविशुद्धिज्ञानमुद्राहृदयमुदाजहार **ओं वज्रकर्म विशोधय सर्वावरणानि बुद्धसत्येन समय हूं ॥**

अथास्य मुद्राबन्धो भवति ।

वज्राञ्जलिं दृढीकृत्य तर्जनीद्वयकुञ्चितां ।
सुबन्धितसमाङ्गुष्ठ्ययन्त्रिता पापहारिणी ॥ इति ॥

इयं मुद्रा यस्य ज्वरादिसर्वव्याधिस्पृष्टस्य कर्मतो दर्शयेत्, तद्युष्माभिरपसर्तव्यं; मा वो जीवितनाशो भवेद्" इति । अथ त "एवमस्त्व्" इति कृत्वा प्रक्रान्ता इति ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतानेवमाह । "अहं भगवद्भिः सर्वावरणनीवरणकर्मावरणविशुद्धिहेतोः स्वहृदयेभ्यो विनिःसृष्टः । तदाज्ञापयतु मे भगवन्तः एषान्नरकादीनां सर्वापायानां कथं प्रतिपत्तव्यम्" इति ।

भगवानाह **ओं क्षपय वज्र स्वाहा ॥**

अथ वज्रपाणिर्महाबोधिसत्वः रौरवादिसर्वापायगतिचक्राकर्षणहृदमभाषत् **ओं सर्वापायकर्षण विशोधन वज्र-समय हुं फट् ॥**

अथास्मिन् भाषितमात्रे रौरवमहारौरवादयः सर्वापायसन्निवेशाः सुमेरुगिरिमूर्ध्नि बाह्यतः परिवार्यावस्थिताः ।

अथ वज्रपाणिर्महाबोधिसत्वः तानपायभूमिपतितान् सर्वसत्वानाहूयैवमाह ।" गृह्णत मार्षास्त्रिशरणगमन-समयसंवरं, सर्वापायगतिमोक्षमुद्राहृदयं च !"। अथ ते एककण्ठेनैवमाहुः ।" परित्रायस्व नो भगवन्नस्माद् व्यसन-सङ्कटात् ! । एष वयं बुद्धं धर्मं संघं त्वं च शरणं गच्छाम" इति ।

अथ वज्रपाणिः सर्वापायस्फोटनहृदयमुदाजहार **ओं वज्रपाणि विस्फोटय सर्वापायबन्धनानि प्रमोक्षय सर्वापाय-गतिभ्यः सर्वसत्वान् सर्वतथागतवज्र समय त्रट् ।।**

अथास्य मुद्राबन्धो भवति ।

वज्रबन्धं दृढीकृत्य मध्यमाद्वयसन्धिता ।
चतुरन्त्यमुखासक्ता पापस्फोटेति कीर्तिता ।।

अथ ते व्यपायगतिचक्रान्तरस्थिताः सर्वसत्वा वज्रपाणिसकाशादिमां मुद्रां दृष्ट्वा, सर्वदुर्गतिभ्यश्च्युत्वा, भगवतो वैरोचनस्य पादमूले उपपन्नाः । ते चापाया महासमुद्रे पतिता इति ।

अथ वज्रपाणिर्महाबोधिसत्वः पुनरपि भगवन्तमेतदवोचत् । "अहं भगवन्नशेषानवशेषसत्वधातुपरित्राणसर्व-हितसुखानुभवनार्थं यावत्सर्वतथागतत्वोत्तमसिद्धिफलावाप्तिहेतोः सर्वतथागतसिद्धिवज्रं दत्वा, सर्वतथागतैरध्यिष्टः । तत्साधु आज्ञापयन्तु मे भग [वन्तः] सर्वतथागता अथैषां सत्वानां मनुष्याणां किङ्करोमी—" ति ।

अथ सर्वतथागताः पुनः समाजमागम्येदमवोचन् **ओं वज्रपाणि महा[मण्डले]प्रवेशय, सर्वान् दुष्टरौद्रान् निवारय, पापेभ्यः प्रमोक्षय, दुर्दृष्टिपर्यापन्नान् विशोधय नाशय विनाशय ह ह ह ह हूं ।।**

अथ वज्रपाणिः सर्वतथागताज्ञावचनमुपश्रुत्य, अशेषानवशेषसत्वधातुपरित्राणसर्वहितसुखोत्तमसिद्धिनिमित्तं यावत् सर्वतथागतज्ञानाभिज्ञावाप्तिफलहेतोरिदं सर्वतथागतमहावज्रसमयभूतं त्रिलोकविजयन्नाम महामण्डलमभाषत् ।

अथातः संप्रवक्ष्यामि महामण्डलमुत्तमं ।
वज्रधातुप्रतीकाशं सर्वसिद्धिकरं परं ।। १ ।।
त्रिलोकविजयन्नाम समयं वज्रसंभवं ।
बुद्धबोधिप्रवर्तारं सर्वदुष्टविनाशनं ।। २ ।।

तत्रानेन मन्त्रण सूत्रयेत् **ओं वज्रसमय सूत्रं मातिक्रम ।।**

चतुरस्रं चतुर्द्वारं चतुस्तोरणशोभितं ।
चतुःसूत्रसमायुक्तं पट्टमालासुशोभितं ।। १ ।।
सर्वमण्डलकोणेषु द्वारनिर्यूहसन्धिषु ।
स्वचितं वज्ररत्नैस्तु सूत्रयेद्बाह्यमण्डलं ।। २ ।।
तस्याभ्यन्तरतः प्राज्ञो वज्ररत्नविभूषितं ।
चतुरस्रं चतुर्द्वारमष्टस्तम्भसतोरणं ।। ३ ।।
वज्रस्तम्भाग्रसंस्थेषु पञ्चमण्डलमण्डितं ।
सूत्रयेन्मण्डलस्तत्र सूत्रं रङ्गैः प्रपूरयेत् ।। ४ ।।

तत्रायं रङ्गजापः **ओं वज्रचित्र समय हूं ।।**

ततो मध्यस्थितो भूत्वा वज्राचार्यः समाहितः ।
मनसोद्घाटयेच्चैव वज्रद्वारचतुष्टयं ।।

तत्रायं द्वारोद्घाटनमन्त्रः **ओं वज्रोद्घाटय समय प्रवेशय हूं ।।**

सौवर्णे राजते वापि मृण्मये वा सुचित्रिते ।
इष्टके चतुरस्रे तु बुद्धबिम्बन्निवेशयेत् ।।

तत्रेदं सर्वतथागताकर्षणहृदयं भवति । **ओं वज्र ज्वालाग्निप्रदीप्ताकर्षय सर्वतथागतान् महावज्र समय हूं जः ।।**

बुद्धस्य पुरतो वज्रं ज्वालामध्ये निवेशयेत् ।
ज्वालामध्ये लिखेद् रत्नं पद्मं विश्वायुधन्तथा ।।

अथासां वज्रसमयमुद्राणां निवेशहृदयानि भवन्ति ।

हूं सत्ववज्र ज्वालामाल हूं फट् ।।
ओं रत्नवज्र ज्वालामाल हूं त्रः ।।
ओं धर्मवज्र ज्वालामाल हूं ह्रीः ।।
हूं कर्मवज्र ज्वालामाल हूं हः ।।
वज्रवेगेन निःक्रम्य बुद्धस्य पुरतस्तथा ।
संलिखेद्विधिवत्प्राज्ञो वज्रहुंकारमण्डलम् ।।

तत्रेदं वज्रवेगहृदयं भवति **ओं वज्रवेगाक्रम हूं ।।**
एवं वज्रधात्वादिषु सर्वमण्डलेषु सूत्रमाक्रम्य, सर्वतो गच्छेदिति ।।

अथास्य मुद्रा भवति ।

मनोत्क्षिप्य रेखात्तु वज्रसूत्रमथापि वा ।
प्रविशन्ति क्रमत्वापि भ्रम्यते समयान्न सः ।। १ ।।
तत्र मध्ये महासत्वं व [ज्रपा] णिं समालिखेत् ।
महानीलोत्पलरुचं वज्र-हूं-कारसंग्रहं ।। २ ।।
ईषद् दंष्ट्राकरालास्यं सरोषहसिताननं ।
प्रत्यालीढस[माक्रान्तं ज्वा]लामालाकुलप्रभं ।। ३ ।।
वामपादसमाक्रान्तंस्तेन कार्यं महेश्वरः ।
दक्षिणं तु लिखेत्पादमुमास्तनभरस्थितं ।। ४ ।।

तत्रास्य हृद[यं भवति हूं ।।]

तस्य पार्श्वेषु सर्वेषु वज्रक्रोधान्निवेशयेत् ।
क्रुद्धदंष्ट्राकरालांस्तु ज्वालामालाकुलप्रभान् ।।

अथैषां हृदयानि भवन्ति ।

[हूं ।।
ओं वज्रसत्व-] क्रोध हूं फट् ।।
ओं वज्रक्रोधाकर्षय हूं फट् ।।
ओं वज्रकाम क्रोध रागाय हूं फट् ।।
ओं वज्रतुष्टिक्रोध साधु साधु हूं फट् ।।

वज्रवेगे[न चा] क्रम्य द्वितीयं मण्डलोत्तमं ।
तत्र वज्राभिषेकं तु लिखेत्क्रोधैः परिवृतं ।।

अथैषां हृदयानि भवन्ति । **त्रः ।।**

ओं वज्रभृकुटि क्रोध हर हर हुं फट् ।।
ओं वज्रसूर्य महाज्वालामाल क्रोध ज्वालय सर्व हुं फट् ।।
ओं वज्र क्रोध केतु देहि हुं फट् ।।
ओं वज्राट्टहास क्रोध हः हः हः हः हुं फट् ।।

वज्रवेगेन चाक्रम्य तृतीयं मण्डलोत्तमं ।
वज्रसेनं समालेख्यं वृतं क्रोधैर्महात्मभिः ॥

अथैषां हृदयानि भवन्ति ।

ह्रीः ॥
ओं वज्रधर्म क्रोध विनाशय विशोधय हुं फट् ॥
ओं वज्रतीक्ष्ण क्रोध च्छिन्द च्छिन्द हुं फट् ॥
ओं वज्रहेतु क्रोध प्रविश प्रवेशय मण्डलं सर्वां हुं फट् ॥
ओं वज्रक्रोध भाष वद वद हुं फट् ॥

वज्रवेगेन चाक्रम्य चतुर्थं मण्डलोत्तमं ।
वज्रावेशं समालेख्यं वज्रक्रोधगणैर्वृतं ॥

तत्रैषां हृदयानि भवन्ति

अः ॥
ओं वज्रकर्म ॥
ओं वज्रकवच क्रोध रक्ष रक्ष हुं फट् ॥
ओं वज्रयक्ष क्रोध खाद खाद हुं फट् ॥
हुं वज्रक्रोध मुष्टि साधय समय हुं फट् ॥

मण्डलस्य तु कोणेषु यथावदनुपूर्वतः ।
वज्रधातुप्रयोगेण गुह्यपूजां समालिखेत् ॥

अथासां हृदयमुद्रा भवन्ति ।

ओं वज्रलास्ये रागय हूं फट् ॥
ओं वज्रमालेऽभिषिञ्च हुं फट् ॥
ओं वज्रगीते गाद गाद हूं फट् ॥
ओं वज्रनृत्ये वशीकुरु हुं फट् ॥

वज्रवेगेन निःक्रम्य बाह्यमण्डलमुत्तमं ।
तत्र कोणेषु कर्तव्यं पूजादेवीचतुष्टयं ॥

अथासां हृदयमुद्रा भवन्ति ।

ओं वज्रधूपपूजास्फरणसमये हुं फट् ॥
ओं वज्रपुष्पपूजास्फरणसमये हुं फट् ॥
ओं वज्रालोकपूजास्फरणसमये हुं फट् ॥
ओं वज्रगन्धपूजास्फरणसमये हुं फट् ॥

अङ्कुशाद्यास्तु कर्तव्या द्वारमध्यचतुष्टये ।
बाह्यमण्डलसंस्थेषु बाह्यवज्रकुलानि तु ॥

अथासां हृदयमुद्रा भवन्ति ।

ओं वज्राङ्कुश महाक्रोधाकर्षय सर्वसमयान् हूं ज्जः ॥
ओं वज्रपाश महाक्रोध प्रवेशय सर्वसमयान् हुं हूं ॥
ओं वज्रस्फोट महाक्रोध बन्ध बन्ध सर्वसमयान् हुं वं ॥
ओं वज्रावेश महाक्रोधावेशय सर्वसमयान् हुं अः ॥

Initiation into the maṇḍala

अथात्र त्रिलोकविजयमहामण्डले प्रवेशविधिविस्तरो भवति।

तत्रादित एव तावत्स्वयं वज्रा [चार्यो व]ज्रक्रोधतेरिन्तिरिमुद्रां बध्वा प्रविशेत्। प्रविष्ट्वा सर्वतथागतां विज्ञापयेत्। "अहं भगवन्तस्तथागताः क्रोधवशं यास्यामि [निग्रहीतव्यां] निग्रहीष्यामि संग्रहीतव्यां संग्रहीष्यामि। तन्मे भगवन्त आज्ञापयन्तु, कथं प्रतिपद्यामी" ति कृत्वा, वज्रक्रोधतेरिन्तिरिमुद्रां स्व [हृदये य]थावत्स्थाप्य, वज्राङ्कुशादिभिः कर्माणि कृत्वा, पुनः सर्वसमयमुद्रां बन्धयेत्; ततः सर्वे सान्निध्यङ्कल्पयन्ति। ततो गुह्यपूजाचतुष्टयं कृत्वा तथा धूपादिभिश्च॥

ततो वज्रशिष्यां प्रवेशयेदनेन विधिना स्वयं वज्राचार्यो वज्रकोधतिरिन्तिरिमुद्रां बध्वा, शिष्याय बन्धयेदनेन हृदयेन **ओं गृह्ण वज्र समय हुं वं॥**

ततो नीलवस्त्रान्तरीयनीलोष्णीषावबन्धशिराः, नीलरक्तकेन मुखं बध्वा, प्रवेशयेदनेन मन्त्रेण **ओं वज्र समयं प्रविशामि॥** ततः प्रवेश्य वज्रावेशसमयमुद्रयास्यावेशमुत्पादयेदनेन हृदयेन **वज्रावेश अः॥**

ततः समाविशति। तेनावेशेन सर्वतथागतैरधिष्ठ्यते। सर्वं चातीतानागतप्रत्युत्पन्नन्निमिषादेव जानाति। अवध्यश्च भवति सर्वसत्वेभ्यः, अधृष्यः। हुंकारेण च सर्वसत्वनिग्रहानुग्रहसमर्थीभवति। वज्रपाणिश्चास्य नित्यं सर्वकार्याणि साधयतीति॥

ततः शपथहृदयं दद्यात्। ततो यथावत् मुखबन्धं मुक्त्वा, महामण्डलं दर्शयेत्। मण्डले दृष्टमात्रे तु सर्वपापैर्विमुच्यते, सकलत्रिलोकविजयसमर्थो भवति। हुंकारेण च महादेवादिसर्वदेवाकर्षणप्रवेशनबन्धनवशीकरणपातनक्षमो भवति। सर्वतथागताधिष्ठानाच्च वज्रपाणिर्महाबोधिसत्वः सततानुद्धः स्वकीयाः सिद्धीर्ददाति॥

ततोऽस्य वज्राभिषेकेणाभिषिच्य, तीक्ष्णस्ववज्रचिह्नं यथावत् पाणिभ्यां दातव्यमनेन मन्त्रेण **ओं वज्रपाणि बज्रकर्मकरो भव॥**

ततो वज्रनामाभिषेकन्दद्यादनेन मन्त्रेण। **ओं वज्रक्रोध त्वामभिषिंचामि वज्रनामाभिषेकतः हेवज्र नाम॥** ततो यस्य यन्नाम कुर्यात् तस्य हेशब्दः प्रयोक्तव्य इति॥

ततो ज्ञानान्युत्पादयेत्।

वज्रबिम्बं समालिख्य हृदि वालाकुलप्रभं।
वज्रक्रोधसमापत्त्या सर्वं आवेशयेज्जगत्॥ १॥
वज्ररत्नं ललाटे तु समालिख्य तथैव च।
वज्रक्रोधसमापत्त्या सर्वसत्वान् वशन्नयेत्॥ २॥
वज्रपद्मं गले कृत्वा ज्वालामालाकुलप्रभं।
वज्रक्रोधसमापत्त्या सर्वसत्वां स नाशयेत्॥ ३॥
सत्ववज्रं प्रतिष्ठाप्य मूर्ध्नि ज्वालाकुल[प्रभं]।
वज्रक्रोधसमापत्त्या रक्षेत् सर्वमिदं जगत्॥ ४॥

अथासां ज्ञानमुद्राणां हृदयानि भवन्ति।

हुं सत्व वज्र क्रोधाविश अः॥
हो रत्न [वज्रक्रोध] त्रः॥
हुं धर्म वज्रक्रोध फट्॥
हं कर्म वज्रक्रोध रक्ष॥

Mudrā

ततो देवाद्याकर्षणमुद्राज्ञानं शिक्षयेत्।

वज्राङ्कुशं समा[लिख्य ताले हूंक]रसंज्ञितं।
अङ्गुलीं चालयेत्क्रुद्धो देवाकर्षणमुत्तमं ॥ ॥

वज्राङ्कुशं समालिख्य स्वपादतलमध्यतः।
लिङ्गमाक्रम्य तेनैव दे[वा समाकर्षे]द् ध्रुवं ॥ २ ॥

वज्राङ्कुशं समालिख्य स्वमेढ्रे तु समुत्थिते।
चालयंस्तु समाकर्षेदुमाद्याः सर्वयोषितः ॥ ३ ॥

वज्राङ्कुशं समालिख्य गुदे [ ]कुदे तथा।
तेनाक्रमीत यं देवं तस्याकर्षणमुत्तमं ॥ ४ ॥

तत्रैषां हृदयानि भवन्ति।

ओं वज्र क्रोधाग्राकर्षय हुं फट् ॥
ओं वज्र क्रमाङ्कुशक्रोधाकर्षय हुं फट् ॥
ओं वज्र क्रोधदण्डाग्राकर्षय हुं फट् ॥
ओं वज्रक्रोधासनागच्छाकर्षयामि ते वज्र समयमनुस्मर हुं फट् ॥

ततश्चतुर्विधमुद्राज्ञानं शिक्षयेत्।

प्रत्यालीढं समास्थाय वज्रावेशप्रयोगतः।
क्षणाद्धुंकारमात्रेण सर्वमावेशयेज्जगत् ॥ १ ॥
वज्रवाचा वदेत्सम्यग् चतुर्हुंकारसंयुतं।
हृदयं सर्वबुद्धानां सर्वमप्यानयेद्ध्रुवं ॥ २ ॥
वज्रक्रोधसमापत्त्या वज्रक्रोधाग्रदृष्टितः।
मारयेत जगत्सर्वं वज्रहुंकारयोगतः ॥ ३ ॥
मनसा वर्मयेत्कायमात्मनस्तु परस्य वा।
महाकवचयोगेन रक्षेत्सर्वमिदं जगद् ॥ इति ॥ ४ ॥

अथैषां हृदयानि भवन्ति।

ओं वज्र क्रोध कायावेशय हुं अः ॥
ओं वज्र विद्योत्तम महाक्रोधानय हो भगवन् वज्र हुं फट् ॥
ओं वज्र क्रोध दृष्टि हन दह पच विनाशय हुङ्कारेण पातय वज्र समय हुं फट् ॥
ओं मनोट्ट वज्र कवच क्रोध रक्ष हुं फट् ॥

ततः सर्वसत्वमुद्रणमुद्राज्ञानं शिक्षयेत्।

वज्रक्रोधसमापत्त्या यस्य यस्य परिष्वजेत्।
वज्रहुंकारजापेन मुद्रितो भवते स तु ॥ १ ॥
संलपन्महता वाचा **ट्टक्कि हुं फट्** सकृद्वदेत्।
यस्य क्रुद्धः स दीप्तेन वज्रेणाभिहतो भवेत् ॥ २ ॥
वज्रदृष्ट्या निरीक्षेद्वै वज्रक्रोधसमाधिना।
यस्य यस्य तु सत्वस्य सो सो मरणमाप्नुयात् ॥ ३ ॥
मनसा मारयामीति वज्रं हृदि तु भावयेत्।
हुंकारेणैव सर्वेषां मुद्रयत्यभितः स्वयम् ॥ इति ॥ ४ ॥

यस्य सत्वस्य येनैव मनसा मुद्रयत्यसौ ।
आभिर्मुद्राभिरभ्यर्थं सर्वकर्माणि साधयेद् ॥ इति ॥ ५ ॥

अथैषां हृदयानि भवन्ति ।

टक्कि अः ॥
टक्कि ज्जः ॥
टक्कि हुं ॥
टक्कि हं ॥

एकैकया तु मुद्रया चतुर्षु कर्मसु चत्वारि मुद्राहृदयानि प्रयुञ्जेदिति ॥
ततो रहस्यक्रोधमुद्राज्ञानं शिक्षयेत् ।

सर्वाङ्गतः परिष्वज्य हुंकारमस्य योजयेत् ।
द्वयेन्द्रियसमापत्त्या तस्य नश्येत जीवितं ॥ १ ॥
चुम्बंस्तु दशनैरोष्ठं गृह्य हुङ्कारयोगतः ।
द्वयेन्द्रियसमापत्त्या यस्य तस्य मुखं पतेत् ॥ २ ॥
हुं-कारं यः प्रयुञ्जीत सुखं ह्यनुभवन्नसौ ।
द्वयेन्द्रियसमापत्त्या यस्य सो दुःखमाप्नुयात् ॥ ३ ॥
हुंकारं यः प्रयुञ्जीत सर्वाङ्गेन तु पीडयन् ।
द्वये[न्द्रियस]मापत्त्या तस्य सर्वतनुः पतेद् ॥ इति ॥ ४ ॥

अथात्र हृदयानि भवन्ति ।

हुं अः ॥
हुं ज्जः ॥
हुं होः ॥
हुं हं ॥

ततस्त्रिलोकविजयमहामण्डलसमयतत्वमुद्राज्ञानं शिक्षयेत् ।

वज्रधातुप्रयोगेण बुद्धानुस्मृतिमान् भवेत् ।
यस्तु सत्वहितार्थाय स तु बुद्धत्वमाप्नुयात् ॥ १ ॥
महेश्वरमुमांश्चैव भूमौ लिख्य तथाक्रमेत् ।
यथालेख्यानुसारेण सत्वमुद्रां समाधयेत् ॥ २ ॥
अनया बद्धमात्रया त्रिलोकविजयी स तु ।
सिद्धविद्यो भवेत्क्षिप्रं वज्रहुंकारसन्निभः ॥ ३ ॥
ज्वालामण्डलमध्यस्था यथा लेख्यानुसारतः ।
कायवाक्चित्तवज्रैस्तु सत्वमुद्रास्तु बन्धयेत् ॥ ४ ॥
अथासां कर्म वक्ष्यामि वज्रकर्ममनुत्तरं ।
बुद्धानुस्मृतिसंसिद्धः शीघ्रं बुद्धत्वमाप्नुयाद् ॥ इति ॥ ५ ॥
त्रिलोकविजयां बध्वा त्रिलोकविजयी भवेत् ।
वज्रायुः सर्वगामी तु वज्रहुंकारसन्निभः ॥ ६ ॥
वज्राभिषेका राज्यत्वं लोकैश्वर्यं सुधर्मिणी ।
कर्मवज्रमहाक्रोधा वज्रकर्मकरी भवेत् ॥ ७ ॥

सत्वक्रोधा महादार्ढ्यं क्रोधाङ्कुश्या समाह्वान।
रागयेत्क्रोधरागा तु साधुक्रोधा तु तुष्टिदा ।। ८ ।।
भृकुट्या नाशयेत्सर्वं क्रोधसूर्या सुतेजतां ।
केतुक्रोधा हरेदर्थान् अट्टहासा तु मारयेत् ।। ९ ।।
धर्मक्रोधा हरेद् धर्मान् च्छिन्देद्वै क्रोधवज्रया ।
हेतुक्रोधा हरेद् दुःखान् वाग्घरेत् क्रोधभाषया ।। १० ।।
कर्मक्रोधा सुकर्माणि कुर्याद् रक्षां तु रक्षया ।
क्रोधयक्षा रिपुं खादेत् क्रोधमुष्टिस्तु सिद्धिदा ।। इति ।। ११ ।।

अथ वज्रसमयमुद्राबन्धो भवति ।

वज्र[द्विकस]मुद्भूताः समयाग्र्यास्तु कीर्तिताः ।
तासां बन्धं प्रवक्ष्यामि क्रोधबन्धमनुत्तरं ।। १ ।।
बाहुवज्रं समाधाय कनिष्ठाङ्कुशं बन्धिता ।
त्रिलोकविजया नाम तर्जनीद्वयतर्जनी ।। २ ।।
तथैवाग्र्या मुखासंगान्मणिस्तु प्रविकुञ्चिता ।
समोत्थमध्यपद्मा तु मध्याग्र्यद्वयवर्जिते ।। ति ।। ३ ।।
तर्जनीद्वयवज्रा तु दक्षिणाङ्कुञ्चिताङ्कुशी ।
तयैव ग्रस्तहुंकारा साधुकारा तथव हि ।। ४ ।।
द्वयग्रा संस्था भृकुट्यान्तु हृदि सूर्याग्रमण्डला ।
प्रसारितभुजा मूर्ध्नि तर्जनीमुखहासिनी ।। ५ ।।
तर्जनीनखसंसक्ता कोशमुष्टिस्तु दक्षिणा ।
सममध्याग्र्योत्थचक्रा तु मुखतः प्रविनिःसृताः ।। ६ ।।
तर्जनीमध्यवज्रा च ग्रीवा वेष्टिततर्जनी ।
अग्र्याधिकमहादंष्ट्रा ग्रस्ताग्रा वज्रा मुष्टिने- ।। ति ।। ७ ।।
वज्रलास्यादिसन्धीनां मुद्रास्ता एव हुंकृताः ।
धर्ममुद्रास्तु ता एव हुंकारैः सहिताः पुनः ।। ८ ।।

अथ वज्रसमयधर्ममुद्रा भवन्ति ।

हुंकारो बुद्धवज्रिभ्यां त्रःकारो वज्रगर्भतः ।
ह्रीःकारो वज्रसेनस्य अःकारो वज्रविश्वन ।। इति ।।

[अतः परं धर्ममुद्राः समासत एवं भवन्ति ।]

हुं हेः त्रां तं, हि ह्रीः दें: हः, धिक् खीः हूं ग्रं, कृ वं दृ अः ।

धर्ममुद्रा सुसिद्धास्तु वज्रक्रोधगणस्य हि ।। इति ।।

ततो वज्रसमयकर्ममुद्रा भवन्ति ।

क्रोधमुष्टिं द्विधीकृत्य वज्रगर्वादियोगतः ।
कर्ममुद्राः समासेन महावज्रकुले स्मृताः ।। १ ।।
यस्या [य]स्यास्तु मुद्राया यद्यत्पार्श्वं च कर्मणः ।
तत्र तत्र तु वै वेष्ट्य तां तां मुद्रां प्रयोजयेत् ।। २ ।।

सर्वमुद्राविधिः ।।

अथात्र त्रिलोकविजयम[हामण्डल]साधारणमुद्राबन्धो भवति ।

त्रिलोकविजया मुद्रा वज्राग्रसमयस्य तु ।
वज्रहुंकारमन्त्रस्य सर्वसिद्धिप्रदा क्षणात् ॥ १ ॥

कनिष्ठाग्र्याङ्गुशैर्बन्धेद्वज्रौ द्वावधरोत्तरौ ।
समयाङ्गुशमुद्रेयं सर्वमाकर्षयेत्क्षणात् ॥ २ ॥

सर्वविद्योत्तमानां तु त्रिलोकविजया स्मृता ।
[घातनी चैव] सर्वस्य सर्वकर्मकरी तथा ॥ ३ ॥

द्विवज्राग्र्याङ्गुली सम्यक्सन्धाय सुसमाहितः ।
उत्थापयेन्मृतं सर्वं वज्रोत्तिष्ठेति संज्ञिता ॥ ४ ॥

द्विवज्राग्र्याङ्गुली सम्यक् वज्रबन्धेन बन्धयेत् ।
परिवर्त्य स्थापेन्मूर्ध्नि आयुरारोग्यवर्धनी ॥ ५ ॥

वज्रबन्धं दृढीकृत्य समाङ्गुष्ठप्रवेशिता ।
तर्जनी दृढं संकोचा वलिता पादकर्षणी ॥ ६ ॥

त्रिलोकविजयां बध्वा यस्य बिम्बं समाक्रमेत् ।
वामपादेन तं सत्वं मासादर्धेन सिद्ध्यति ॥ ७ ॥

वज्रमुद्राद्विकं बध्वा ताडयेत परस्परं ।
यस्य वै सत्वकायं तु समाविष्टस्तु ताडयेत् ॥ ८ ॥

वज्रमुद्राद्विकं बध्वा कवचं स्वं परस्य वा ।
ग्रन्थनन् तर्जनीभ्यां तु रक्षा भवती शाश्वती ॥ ९ ॥

वज्रबन्धं तले कृत्वाच्छादयेत्क्रुद्धमानसः ।
गाढमङ्गुष्ठ [वज्रेण] सिद्ध्येद्वज्रकुलं महत् ॥ १० ॥

सत्ववज्रं दृढीकृत्य द्वयङ्गुष्ठग्रस्तमध्यमे ।
कनिष्ठा वज्रमुखतो तीक्ष्ण[ान्तु समय]ग्रहां ॥ ११ ॥

वज्रमुद्राद्विकं बध्वा कुञ्चिताग्र्या निबन्धितं ।
वलितोद्वलितं कुर्वन् देवाकर्षणमुत्तमं ॥ १२ ॥

वज्रबन्धं दृढीकृत्य कुञ्चिताग्र्या सुयन्त्रितं ।
सन्धायाङ्गुष्ठयुगलं पीड्य मध्येऽन्तरीक्षिणां ॥ १३ ॥

कनिष्ठाङ्गुलिमध्यन्तु वज्रमुद्राद्विकस्य तु ।
पृष्ठतोऽग्र्याङ्गुलिग्रस्तं परिवर्त्य खचारिणां ॥ १४ ॥

वज्ररक्षां दृढीकृत्य वज्रबन्धं तु पीडयेत् ।
भौमानां समयो ह्येष सर्वकृद् दुरतिक्रमः ॥ १५ ॥

वज्रमुद्राद्विकं बध्वा वामवज्राग्र्यपीडिता ।
अन्त्याङ्गुलिसमास्फोटा पाताताकर्षणी त्वियं ॥ १६ ॥

ग्रन्थितं वज्रबन्धेन दृढन्तर्जनिकाद्वयं ।
मध्यमाङ्गुष्ठवज्रं तु दुष्टमुद्राप्रभञ्जकं ॥ १७ ॥

वज्रमुद्राद्वयं बध्वा हृदि स्थाप्य समाहितः ।
पीडयेत्क्रोधमुष्टिं तु बाह्यमण्डलनाशनी ॥ १८ ॥

वामवज्राङ्गुलिं गृह्य दक्षिणाकुञ्चिताग्रयया ।
आस्फोटयं सुसंक्रुद्धः सुमेरुमपि पातयेत् ॥ १९ ॥

वामवज्राङ्गुलिं गृह्य दक्षिणाग्र्याङ्गुशेन तु ।
आकर्षयत्सुसंक्रुद्धो ग्रहां सर्वान् वशन्नयेत् ॥ २० ॥

वज्रबन्धं समाधाय बाहुभ्यां सुदृढं हृदि ।
वज्राग्र्याभ्यां स्वकुक्षौ तु कुशंस्तु हृदयं हृदि ॥ २१ ॥

अ[ग्र्याङ्गु]लिमुखाभ्यां तु पीडयेत्क्रुद्धमानसः ।
अङ्गुष्ठद्वयमूलन्तु ज्वराकर्षणमुत्तमं ॥ २२ ॥

वज्राञ्जलिं दृढीकृत्य तर्जनीद्वय [कुञ्चिता] ।
सुसन्धितसमाङ्गुष्ठयन्त्रिता पापहारिणी ॥ २३ ॥

अग्र्याङ्गुलिद्वयं बध्वा वज्रमुद्राद्विकान्तरात् ।
समुत्क्षिपेत् क्षणादूर्ध्वं पतितोत्क्षे[पकोत्तमं] ॥ २४ ॥

वज्रबन्धं दृढीकृत्य मध्यमामुखसन्धिता ।
चतुरन्त्यमुखासङ्गात् पापं स्फोटयति क्षणात् ॥ २५ ॥

अथ सर्वतथागतमण्डल[साधन]मुद्राबन्धो भवति ।

सूत्रयन्मण्डलं पूर्वं वज्रमुद्राग्रहेण तु ।
सूत्रं तु धारयेत्पश्चात् यथावत् सूत्रणं स्मृतं ॥ १ ॥

सुसन्धितसमाग्र्यन्तु वज्रमुद्राद्विकस्य तु ।
कृत्वा तु सर्वरङ्गाणि दीप्तदृष्टया समाह्वयेत् ॥ २ ॥

द्विवज्राग्र्याङ्गुली सम्यक् सन्धायोत्तानतो दृढं ।
विवारयेत संक्रुद्धो द्वारोद्घाटनमुत्तमम् ॥ इति ॥ ३ ॥

अथ सर्ववज्रकुलसर्वमुद्रासाधनं भवति ।

प्रत्यालीढकृतिङ्कृत्वा क्रोधवाचा प्रवर्तयन् ।
क्रोधदृष्ट्या तु संक्रुद्धः सर्वकर्माणि साधयेद् ॥ इति ॥

सर्वतथागतवज्रसमयान्महाकल्पराजात् त्रिलोकविजयमहामण्डलविधिविस्तरः समाप्तः ॥

CHAPTER 7

KRODHA-GUHYA-MUDRĀ-MAṆḌALA-VIDHI-VISTARA

Emanation of deities from samādhi

अथ भगवान् पुनरपि वज्रधारणीसमयसंभववज्राधिष्ठानं नाम समाधिं समापद्येमां स्वविद्योत्तमामभाषत् **ओं सर्ववज्रिणि वज्रमाते आनय सर्वं वज्रसत्येन हूं ज्जः ।।**

अथास्यां भाषितमात्रायां वज्रपाणिहृदयात्स एव भगवान् वज्रपाणिः वज्रपाणिसदृशसर्वात्मभावाः समन्तज्वाला-गर्भां वज्रक्रोधसमयमुद्रां देवतां भूत्वा विनिःसृत्य, सर्वलोकधातुषु सर्वतथागतार्थान् निष्पाद्य, भगवतो वज्रसत्वस्य गुह्यभार्यताप्रच्छादनार्थं कायवाक्चित्तवज्रमुद्राबिम्बानि भूत्वा, भगवतो वैरोचनस्य त्रिलोकविजयमहामण्डलयोगेन चन्द्रमण्डलाश्रिता भूत्वेदमुदानमुदानयिसुः ।

अहो हि सर्वबुद्धानां गुह्यज्ञानमनुत्तरं ।
यत् तथागतसौख्यार्थं भार्यात्वमपि कुर्वते ।। ति ।।
हीः ।।

Delineation of the maṇḍala

अथ वज्रपाणिः पुनरपि स्वकुलसमयमुद्रामण्डलवज्रसमयगुह्यन्नाममभाषत् ।

अथातः संप्रवक्ष्यामि वज्रमण्डलमुत्तमं ।
वज्रधातुप्रतीकाशं क्रोधगुह्यमिति स्मृतं ।। १ ।।
महामण्डलयोगेन सूत्रयेत्सर्वमण्डलं ।
पञ्चमण्डलसंस्थेषु गुह्यमुद्रान्निवेशयेत् ।। २ ।।
वज्रमण्डलमध्येऽस्मिं बुद्धबिम्बन्निवेशयेत् ।
बुद्धस्य क्रोधसमयान् यथावत्तु लिखेद्बुधः ।। ३ ।।
वज्रवेगेन निःक्रम्य वज्रपाणेस्तु मण्डलं ।
तत्र मध्ये लिखेत् तिर्यक् शूलवज्रं प्रतिष्ठितं ।। ४ ।।
ज्वालामध्ये लिखेत् तस्य यथावदनुपूर्वशः ।
वज्रं वज्राङ्कुशं चैव वाणं तुष्टिस्तथैव च ।। ५ ।।
वज्र[वेगे]न चाक्रम्य द्वितीयं मण्डलोत्तमं ।
वज्ररत्नं लिखेत् चैव चक्रमध्ये प्रतिष्ठितं ।। ६ ।।
वज्रभृकुटिमध्ये [वज्रसूर्यं त]था ध्वजं ।
दन्तपंक्ती तथा वज्रैतस्य पार्श्वेषु संलिखेत् ।। ७ ।।
वज्रवेगेन चाक्रम्य तृतीयं मण्ड[लोत्तमं ।
वज्रपद्मं लिखेद् दिव्यं पद्ममध्ये प्रति]ष्ठितं ।। ८ ।।
ज्वालामध्ये लिखेत्पद्मं खड्गं चक्रन्तथैव च ।
वज्रजिह्वां यथावत् तु तस्याः पार्श्वेषु स[र्वेषु ।। ९ ।।

वज्रवेगेन चाक्रम्य चतुर्थं मण्डलोत्त]मं ।
तिर्यग्वज्रे लिखेद् वज्रं वृतं वज्रैर्महाप्रभैः ।। १० ।।
तस्याः पार्श्वेषु सर्वेषु सर्वज्वालाकुलप्रभाः ।
[विश्ववज्रं सुकवचं वज्रदंष्ट्रमुष्टि लिखेत् ।।] ११ ।।
कोणेषु बाह्यसंस्थेषु यथावत्तु लिखेन्नयं ।
अतः परं प्रवक्ष्यामि मुद्राविद्याः समासतः ।। १२ ।।

[सिः ।।
ओं वज्रक्रोधसमये सिः ।।
ओं वज्र]रोषाङ्कुश्यानय सर्वं सिः ।।
ओं वज्ररोषे कामवज्रिणि वशं मे आनय हि सिः ।।
ओं वज्रतुष्टि[क्रोधे तोष्य सर्वाणि सिः ।।
वज्रसिकारम]ण्डले ।।]

जिः ।।
ओं वज्रभृकुटिक्रोधे हर सर्वार्थं जिः ।।
ओं वज्रज्वालामालप्रभे महाक्रोधा[ग्नि ज्वालय सर्वं विरोषे जिः ।।
ओं वज्र]ध्वजाग्रकेयूरमहाक्रोधे देहि मे सर्वं जिः ।।
ओं वज्राट्टहासनि हस हसाट्टाट्टहासेन [मारय जिः ।।
वज्रजिकारमण्डले ।।]

दिः ।।
ओं वज्रशुद्धक्रोधे हन मारय दुष्टान् दिः ।।
ओं वज्रतीक्ष्णक्रोधेच्छिन्द वज्रक्रोधेन सर्वान् दिः ।।
ओं [वज्रहेतुमहा क्रोधे प्रवेश चक्र प्रवेशय सर्वान्] दिः ।।
ओं वज्रजिह्वे महाक्रोधभाषे वाचं मुञ्च दिः ।।
वज्रदिकारमण्डले ।।]

ह्रिः ।।
ओं सर्व मुखे [कर्मवज्रिणि महाक्रोधे कुरु सर्वान् ह्रिः ।।
ओं वज्र] कवचक्रोधे रक्ष मां ह्रिः ।।
ओं वज्रचण्डक्रोधे महायक्षिणि वज्रदंष्ट्राकरालभीषणि भीषा[पय ह्रिः ।।
ओं वज्रक्रोधे मुष्टिबन्ध ह्रिः ।।
वज्रह्रि]कारमण्डले ।।]

ततः कोणमण्डलेषु वज्रनृत्यगुह्यपूजाविद्याहृदयानि भवन्ति ।

वज्र हूं स्वें ।।
वज्र हूं घूं ।।
वज्र हूं तें ।।
वज्र हूं स्तें ।।

बहिःकोणेषु तूर्यपूजाहृदयानि भवन्ति ।

वज्र ती ते ।।
वज्र टं टः ।।

वज्र धा धू ॥
वज्र धौ धः ॥

द्वारपालानां पूजाहृदयानि भवन्ति ।

वज्र जः ज्जः ॥
वज्र हूं हूं ॥
वज्र वं वं ॥
वज्र अः अः ॥

Initiation into the maṇḍala

अथास्मिन् वज्रकुलगुह्यमण्डले प्रवेशविधिविस्तरो भवति ।

तत्रादित एव तावत् त्रिलोकविजयमहामण्डलप्रवेशविधिना प्रविश्य, **वज्रगुह्यवज्रकुलसमयमुद्राप्रतिमुद्रोपमुद्राज्ञानमुद्राभिः वज्रधरपूजार्थं** नृत्योपहारः कर्तव्य इति ।

तत्रेदं नृत्यप्रतिनृत्योपनृत्यज्ञाननृत्योपहारमुद्राज्ञानं भवति ।

[तत्रादित एव वज्रधातुसंग्रहहृदयं वज्रगीतेन गायन् सर्वतथागतानां स्तोत्रोपहारङ्कृत्वा, वज्राचार्येण सत्ववज्रिमुद्रा स्फोटयितव्या, ततो यथा प्र[विष्ट]मुद्राभिः समाविशन्ति ।

वज्रनृत्यप्रयोगेण वज्रक्रोधाङ्कुलिद्वयं ।
वज्रहुंकारमुद्रां तु हृदये तु निबन्धयेत् ॥ १ ॥
ततस्तु नृत्यविधि[ना वज्र]क्रोधाङ्कुशेन तु ।
आकर्षयत् सर्वबुद्धान् वज्रवाणां परिक्षिपेत् ॥ २ ॥
वज्रवाणपरिक्षेपाद् वज्रतुष्टचा तु साधयेत् ।
मुक्त्वा मुद्रां यथा[विधि] तालया चैव बन्धयेत् ॥ ३ ॥
अनेन पूजाविधिना वज्रपाणिन्तु तोषयेत् ।
तुष्टः सत् सर्वकार्याणि साधयेद् रुचितः क्षणात् ॥ ४ ॥

तत्रैतानि नृत्यहृदयानि भवन्ति ।

सिद्ध्य वज्र ॥
आनय वज्र ॥
रागय वज्र ॥
साधु वज्र ॥

ततः प्रतिनृत्योपहारः कर्तव्यः ।

तथैव नृत्यन् वामां तु गृह्य दक्षिणमुष्टिना ।
परिवर्त्य ललाटो तु निवेश्याग्र्या मुखेन तु ॥ १ ॥
तथैव नृत्यं सूर्यान्तु परिवर्तं समाह्वयेत् ।
वज्रकेतुं समुत्क्षिप्य हसेद् वज्राट्टहासया ॥ २ ॥
अनेन पूजाविधिना राजादीन् सर्वमानुषान् ।
वशित्वाच्च सुतेजस्त्वाद् दानाच्चाशाच्च तोषयेत् ॥ ३ ॥

तत्रैतानि प्रतिमुद्राहृदयानि भवन्ति ।

आहि वज्र ॥
ज्वालय वज्र ॥

देहि वज्र ॥
हस हस वज्र ॥

तथैव नृत्यं मुक्त्वा तु समकुड्मलसन्धिते ।
अग्राङ्गुली हृदि स्थाप्य नमेदाशयकंपितैः ॥ १ ॥

तथैव नृत्यं छिन्देद् वै वज्रकोशेन नाशकान् ।
अलातचक्रभ्रमया भ्रामयेच्चक्रमण्डलन् ॥ २ ॥

गायन् वै वज्रवाचा तु पूजयेद् वज्रपाणिनं ।
अनेन पूजाविधिना सर्वं भवति शाश्वतं ॥ ३ ॥

तत्रैतान्युपमुद्राहृदयानि भवन्ति ॥

कामय वज्र ॥
च्छिन्दय वज्र ॥
भ्रामय वज्र ॥
ब्रूहि वज्र ॥

वज्रक्रोधाङ्गुली सम्यगुत्तानमुखसन्धिता ।
परिवर्त्य तथोष्णीषे तर्जनी मुखसंस्थिता ॥ १ ॥

वज्रकर्मप्रयोगेण सर्वकार्याग्रमण्डलं ।
दर्शयन् नृत्यविधिना हृदये प्रतिशामयेत् ॥ २ ॥

तथैव नृत्यविधिना वज्ररक्षां तु बन्धयेत् ।
वज्रदंष्ट्रे समाधाय वज्रमुष्टया तु पीडयेत् ॥ ३ ॥

अनेन पूजाविधिना सर्वकर्मक्षमो भवेत् ।
कृत्वा चतुर्विधां पूजां मुद्रां मुञ्चेद् यथाविधिर् ॥ इति ॥ ४ ॥

तत्रैतानि हृदयानि भवन्ति ।

नृत्य वज्र ॥
रक्ष वज्र ॥
खाद वज्र ॥
बन्ध वज्र ॥

ततः क्रोधगुह्यमुद्राज्ञानं शिक्षयेत् ।

वज्रं गृह्य तु पाणिभ्यां स्फोटयेत् क्रुद्धमानसः ।
यस्य नाम्ना तु हृदयं स्फुटेत् तस्य जनस्य हि ॥ १ ॥

अधोष्ठं दशनैर्गृह्य यस्य नाम्ना तु पीडयेत् ।
शिरस्तस्य स्फुटेच्छीघ्रं यद्याज्ञां समतिक्रमेत् ॥ २ ॥

वज्रक्रोधमहादृष्टया चक्षुषी तु निमीलयेत् ।
निरीक्षत् यस्य नाम्ना तु स्फुटेत् एतस्य चाक्षिणी ॥ ३ ॥

वज्रक्रोधसमापत्त्या हृदयं स्वयमात्मना ।
पीडयेद् वज्रबन्धेन तस्य चित्तं परिस्फुटेद् ॥ इति ॥ ४ ॥

तत्रैतानि हृदयानि भवन्ति ।

वज्रस्फोट ठः ॥
मुखवज्र ठः ॥
वज्रनेत्र ठः ॥
मनोवज्र ठः ॥

ततो महावज्रकुलगुह्यमुद्राज्ञानं शिक्षयेत्। तत्र प्रथमं तावन्महामुद्राबन्धो भवति।

कनिष्ठाङ्कुशबन्धेन वज्रक्रोधान्निवेशयेत्।
वामत्रिशूलपृष्ठे तु त्रिलोकविजया स्मृता॥ १॥
सुप्रसारितवामाग्र्या तथैवोत्तानवारिजा।
परिवर्त्य तथा चैव वामवज्रा प्रतिष्ठिते॥ ति॥ २॥
वज्रबन्धन्तले कृत्वा च्छादयेत्क्रुद्धमानसः।
गाढमङ्गुष्ठवज्रेण क्रोधतेरिन्तिरिः स्मृता॥ ३॥
कुञ्चिताग्र्याङ्कुशी चैव तर्जनीमुखवज्रिणी।
साधुकारा तथाग्र्याभ्यां अग्रवज्रा मुखस्थिता॥ ४॥
हृदये सूर्यसंदर्शा समाग्र्या मूर्ध्नि संस्थिता।
परिवर्त्य स्मितस्था तु समाग्र्या कुड्मला तथा॥ ५॥
खड्गमुष्टिग्रहद्वाभ्यामग्र्या चक्रा निबन्धनः।
समाग्र्या मुखतोद्धान्ता तर्जनी संप्रसारिता॥ ६॥
तर्जनी गले बन्धा तु ताभ्यां दंष्ट्रा मुखस्थिता।
गाढमुष्टिनिबन्धाश्च महामुद्राः प्रकल्पिता॥ ७॥ **इति॥**

अथ वज्रकुलगुह्यसमयमुद्राबन्धो भवति।

गुह्यमुष्टिसमुद्भूताः समयाग्र्यः प्रकीर्तिताः।
तासां बन्धं प्रवक्ष्यामि वज्र[बन्ध]मनुत्तरं॥ १॥
हृदिस्था वलिता पार्श्वे वाणाकर्षा तु वामतः।
हृदयाच्च समुद्धान्ता भृकुटिः परिवर्त्य वै॥ २॥
सूर्यमण्डलसंदर्शा मूर्ध्नि बाहुप्रसारिता।
परिवर्त्य स्मितस्था तु मुखमध्यसुसंस्थिता॥ ३॥
कोशाग्रप्रहराकारा चक्रनिक्षेपदर्शिका।
मुखतश्च समुद्धान्ता मूर्ध्नि कायाग्रमण्डला॥ ४॥
स्कन्धयोर्हृदि पार्श्वाभ्यां वज्ररक्षाकृतिस्तथा।
दंष्ट्रासंस्थानयोगाच्च गाढमुष्टिनिपीडिता॥ ५॥
बाह्यमण्डलमुद्रास्तु बन्धेच्चिह्नानुसारतः।
समया वज्रबन्धेन तथास्या वज्रमुष्टिना॥ ६॥ **इति॥**

अथ वज्रकुलगुह्यधर्ममुद्रा भवन्ति।

फ ट्रः। श ट्रः। म ट्रः। स ट्रः।
र ट्रः। त ट्रः। ध ट्रः। ह ट्रः।

प ट्टः । त्र ट्टः । क ट्टः । ध ट्ट ः।
कु ट्टः । रि ट्टः । ख ट्टः । व ट्टः ॥

अथ वज्रकुलगुह्यकर्ममुद्राबन्धो भवति ।

कर्ममुद्राः समासेन वज्रमुष्टिर्द्विधीकृता ।
यथा स्थानेषु संस्थेया क्रोधदृष्टया सुरोषवान् ॥ इति ॥

सर्वतथागतवज्रसमयान्महाकल्पराजात् क्रोधगुह्यमुद्रामण्डलविधिविस्तरः परिसमाप्तः ॥

CHAPTER 8

VAJRA-KULA-DHARMA-JÑĀNA-SAMAYA-MAṆḌALA-VIDHI-VISTARA

Emanation of deities from samādhi

अथ भगवान् पुनरपि सर्वतथागतवज्रकुलसमाधिज्ञानमुद्राधिष्ठानं नाम समाधिं समापद्येमं सविद्योत्तममभाषत् **ओं सर्वतथागतसूक्ष्मवज्रक्रोध हूं फट्।**

अथ वज्रपाणिर्महाक्रोधराजा त्रिलोकविजयसूक्ष्मवज्रविद्योत्तममभाषत् **ओं सूक्ष्मवज्रक्रोधाक्रम हूं फट्॥**

अथ वज्रगर्भो [बोधि]सत्व इमं त्रिलोकविजयसूक्ष्मवज्रविद्योत्तममभाषत् **ओं सूक्ष्मवज्ररत्नाक्रम हूं फट्।**

अथ वज्रनेत्रो बोधिसत्व इमं त्रिलोकविजयसूक्ष्मवज्रविद्योत्तममभाषत् **ओं सूक्ष्मवज्रपद्मक्रोधाक्रम हूं फट्।**

अथ वज्रविश्वो बोधिसत्व इमं त्रिलोकविजयसूक्ष्मवज्रविद्योत्तममभाषत् **ओं सूक्ष्मवज्रकर्मक्रोधाक्रम हूं फट्॥**

अथ वज्रपाणिर्महाबोधिसत्वः पुनरपि स्वकुलमुत्माद्य, वज्रधातुमहामण्डलयोगेन सन्निवेश्यैतानि स्वहृदयान्यभाषत्।

ओं वज्रसत्व सूक्ष्मज्ञान क्रोध हूं फट्॥ १॥
ओं सूक्ष्मवज्राङ्कुशाकर्षय महा-क्रोध हूं फट्॥ २॥
ओं वज्रसूक्ष्मरागक्रोधानुरागय तीव्रं हूं फट्॥३॥
ओं सूक्ष्मवज्रतुष्टिक्रोध हूं फट्॥ ४॥
ओं सूक्ष्मवज्रभृकुटिक्रोध हर हर हूं फट्॥ ५॥
ओं वज्रसूक्ष्मज्वालामण्डलक्रोध सूर्य ज्वालय हूं फट्॥ ६॥
ओं सूक्ष्मवज्रध्वजाग्रक्रोध सर्वार्थान् मे प्रयच्छ शीघ्रं हूं फट्॥ ७॥
ओं वज्रसूक्ष्महासक्रोध ह ह ह ह हूं फट्॥ ८॥
ओं सूक्ष्मवज्रधर्मक्रोध शोधय हूं फट्॥ ९॥
ओं सूक्ष्मवज्रच्छेदक्रोध च्छिन्द भिन्द हूं फट्॥ १०॥
ओं सूक्ष्मवज्रक्रोध महाचक्र च्छिन्द पातय शिरः प्रविश्य हृदयं भिन्द हूं फट्॥ ११॥
ओं सूक्ष्मवज्रहूंकारक्रोध हन पातय वाङ्मात्रेण हूं फट्॥ १२॥
ओं सूक्ष्मवज्रकर्मक्रोध सर्वकर्मकरो भव सर्वकार्याणि साधय हूं फट्॥ १३॥
ओं वज्रसूक्ष्मकवचक्रोध रक्ष रक्ष हूं फट्॥ १४॥
ओं सूक्ष्मवज्रयक्षक्रोध हन भक्षय सर्वदुष्टान् चिन्तितमात्रेण वज्रदंष्ट्र हूं फट्॥ १५॥
ओं सूक्ष्मवज्रमुष्टिक्रोध बन्ध बन्ध हूं फट्॥ १६॥

Delineation of the maṇḍala

अथ वज्रपाणिः पुनरपीदं वज्रकुलसूक्ष्मज्ञानसमयमण्डलमुदाजहार।

अथातः संप्रवक्ष्यामि धर्ममण्डलमुत्तमं।
वज्रधातुप्रतीकाशं क्रोधज्ञानमिति स्मृतं ॥ १ ॥
महामण्डलयोगेन सूत्रयेत्सर्वमण्डलं।
तस्य मध्ये लिखेद्बुद्धं ज्ञानवज्रस्य मध्यगं ॥ २ ॥
बुद्धस्य सर्वपार्श्वेषु मुद्रास्ता एव संलिखेत्।
वज्रवेगेन निष्क्रम्य मण्डलानां चतुष्टये ॥ ३ ॥
त्रिलोकविजयाभ्यांस्तु यथावत् तु निवेशयेत्।
तेषां तु सर्वपार्श्वेभ्यो वज्रक्रोधान् यथाविधिर् ॥ ४ ॥ इति ॥

Initiation into the maṇḍala

अथात्र वज्रकुलसूक्ष्मज्ञानमण्डले यथावद् विधिविस्तरो भवति।

तत्रादित एव तावत्प्रवेश्य ब्रूयाद् "अद्य त्वं सर्वतथागतवज्रक्रोधतायां वज्रपाणिना भगवताभिषि[क्तं] तत्साधु; प्रतिपद्यस्वाशेषानवशेषसत्वधातुपरित्राण यावत् सर्वतथागतहितसुखोत्तमसिद्धयवाप्तिफलहेतोर्वज्रक्रोधे[ण सर्व]सत्वानपि संशोधननिमित्तं मारयितुं; कः पुनर्वादः सर्वदुष्टान्" इति। इदमुक्त्वा मुखबन्धं मुञ्चेत्। ततः सर्वमण्डलं दर्शयित्वा, [वज्रं] यथावत्पाणौ दत्वा, ततो वज्रक्रोधसूक्ष्मज्ञानानि शिक्षयेत्।

सूक्ष्मवज्रं दृढीकृत्य वज्रहुंकारयोगतः।
हुंकारं योजयेद्यस्य तस्य नश्यति जीवितं ॥ १ ॥
सूक्ष्मवज्रं दृढीकृत्य स्फरयेत यथाविधि।
यावत्तः स्फरते तं तु तावन्नश्यत्यसौ रिपुः ॥ २ ॥
सूक्ष्मवज्रविधिं योज्य वज्रहुंकारयोगतः।
स्फरयेत् क्रोधवान् यावत् तावत् सत्वान् विनाशयेत् ॥ ३ ॥
तथैव संहरेत् तत्तु यावदिच्छेत योगवान्।
सर्वं वापि हि निःशेषं पुनरदयात् तु जीवितम् ॥ ४ ॥ इति ॥

तत्रैषां हृदयानि भवन्ति।

हुं ॥
हुंनाशय वज्र ॥
हुं विनाशय सर्वान् वज्र ॥
ओं सूक्ष्मवज्र प्रत्यानय शीघ्रं हुं ॥

वज्रं तु यस्य सत्वस्य सहभूत्वा महादृढं।
मैत्रीस्फरणतायोगात्स्फरन् वैरेण नाशयेत् ॥ १ ॥
वैरस्फरणतायोगात् कारुण्यं यस्य कस्यचित्।
तेन कारुण्ययोगेन सर्वदुष्टान् स नाशयेत् ॥ २ ॥
अधर्मा यदि वा धर्माः प्रकृत्या तु प्रभास्वराः।
एवं तु भावयं सत्वां हुंकारेण तु नाशयेत् ॥ ३ ॥
दुर्दुरूटा हि ये सत्वा बुद्धबोधावभाजनाः।
तेषां तु संशोधनार्थाय हुंकारेण तु नाशयेत् ॥ ४ ॥

तत्रैषां हृदयानि भवन्ति।

वैर वज्रक्रोध हुं फट् ॥
करुणा वज्रक्रोध हुं फट् ॥
हुं विशुद्ध वज्रक्रोध हूं फट् ॥
हुं विशोधन वज्रक्रोध हूं फट् ॥

वज्रबिम्बं समालिख्य मनसा यस्य कस्यचित् ।
पातयेद् गृहमध्ये तु तस्य तन्नश्यते कुलं ॥ १ ॥
तथैव सूक्ष्मविधानेन हृद्वज्रं परिभावयेत् ।
बोधिसत्वमहाबिम्बं पातयेन्नाशयेत्कुलं ॥ २ ॥
वज्रपाणिमहाबिम्बं भावयन् यत्र पातयेत् ।
तद् राज्यं विविधैर्दोषै राज्ञैव सह नश्यति ॥ ३ ॥
सर्वाकारवरोपेतं बुद्धबिम्बं तु भावयन् ।
पातयेद्यत्र राज्ये तु तद् राज्यन्नश्यते ध्रुवम् ॥ ४ ॥ इति ॥

तत्रैतानि हृदयानि भवन्ति ।

हुं वज्र प्रपात ॥
हूं बोधिसत्त्व प्रपात ॥
हूं वज्रधर प्रपात ॥
हूं बुद्ध प्रपात ॥

सूक्ष्मवज्रप्रयोगेण चन्द्रबिम्बं स्वमात्मना ।
भावयं स्वयमात्मानं पतेद्यत्र पतेत्स तु ॥ १ ॥
चन्द्रे वज्रं स्वमात्मानं भावयं स्वयमात्मना ।
पतेद्यत्र सुसंक्रुद्धस्तत्कुलं पतति क्षणात् ॥ २ ॥
वज्रपाणिं स्वमात्मानं भावयं स्वयमात्मना ।
पतेद्यत्र हि तं देशमचिराद् विप्रणंक्ष्यते ॥ ३ ॥
बुद्धबिम्बं स्वमात्मानं भावयं स्वयमात्मना ।
पतेद्यत्र तु तद् राज्यमचिरेणैव नश्यति ॥ ४ ॥ इति ॥

तत्रैतानि हृदयानि भवन्ति ।

बोध्यग्र प्रपातय हुं ॥
सर्ववज्र प्रपातय हुं ॥
वज्रसत्व प्रपातय हुं ॥
बुद्ध प्रपातय हुं ॥

Mudrā

ततो वज्रकुलधर्मरहस्यमुद्राज्ञानं शिक्षयेत् ।

वज्र[क्रोधसमाप]त्या स्वकायं परिवेष्टयेत् ।
यस्य नाम्ना स म्रियते संवेष्टन् वज्रहुंकृतः ॥ १ ॥
सूक्ष्मवज्रं समापद्य सूक्ष्मनासिकया सकृत् ।
श्वासहुंकारयोगेन त्रलोक्यमपि पातयेत् ॥ २ ॥

सूक्ष्मवज्रविधिं योज्य क्रुद्धः सन् वज्रदृष्टितः ।
निरीक्षन्नन्धतां याति मरणं वातिगच्छति ।। ३ ।।
भगेन तु प्रविष्टचा वै मनसा यस्य कस्यचित् ।
हृदयाकर्षणाद्याति वशं स्वं वा यमस्य वे—।। इति ४ ।।

तत्रैषां हृदयानि भवन्ति ।

हुं वज्र वलित क्रोध मारय हुं फट् ।।
ओं वज्र सूक्ष्म श्वास विषं पातय हुं फट् ।।
ओं वज्र दृष्टि विषं नाशय हुं फट् ।।
हुं हृदयाकर्षण क्रोध प्रविश कायं हृदयं च्छिन्द भिन्द कड्ढाकड्ढ फट् ।।

ततो वज्रकुलधर्ममुद्राज्ञानं शिक्षयेत् ।
तत्र तावन्महामुद्राबन्धो भवति ।

वज्रज्ञानप्रयोगेण ज्वालामालाकुलप्रभान् ।
वज्रक्रोधान् स्वमात्मानं भावयं सिद्धयति क्षणाद् ।। इति ।।

ततो वज्रकुलधर्मसमयमुद्राज्ञानं शिक्षयेत् ।

समाधिज्ञानसमया द्वि-हुं-कारसमन्विता ।
यथा स्थानेषु संस्थेया सर्वसिद्धिप्रदावरम् ।। इति ।।

ततो वज्रकुलधर्मसमयधर्ममुद्राज्ञानं शिक्षयेत् ।

फट् सट् मट् सट् रट् तट् घुट् हट्
पट् त्रट् धट् भट् कुट् रिट् खट् वट्

इति च प्रोक्ता धर्ममुद्राः समासत इति ।।
ततो वज्रकुलधर्मसमयकर्ममुद्राज्ञानं शिक्षयेत् ।

धर्ममुष्टिं द्विधीकृत्य यथा स्थानप्रयोगतः
कर्ममुद्राः समासेन सिद्धिं यान्ति यथाविधिर् ।। इति ।।

सर्वतथागतवज्रसमयान्महाकल्पराजाद् वज्रकुलधर्मज्ञानसमयमण्डलविधिविस्तरः समाप्तः ।।

CHAPTER 9

VAJRA-KULA-KARMA-MAṆḌALA-VIDHI-VISTARA

Emanation of deities from samādhi

अथ भगवान् सर्वतथागतवज्रकर्मसमयसंभवाधिष्ठानन्नाम समाधिं समापद्येमां स्वविद्योत्तमामभाषत् **ओं सर्वतथागत कर्मेश्वरि हूं ॥**

अथवज्रपाणिर्महाबोधिसत्वः पुनरपीमां स्वविद्योत्तमामभाषत् **ओं सर्वतथागतधर्मधातुस्फरणमहापूजाकर्मविधि-विस्तरसमये त्रिलोकविजयंकरि सर्वदुष्टान् दामय वज्रिणि हूं ॥**

अथ वज्रगर्भो बोधिसत्वः पुनरपीमां स्वविद्योत्तमामभाषत् **ओं सर्वतथागताकाशधातुसमवसरणमहापूजाकर्म-विधिविस्तरसमये हूं ॥**

अथ वज्रनेत्रो बोधिसत्वः पुनरपीमां स्वविद्योत्तमामभाषत् **ओं सर्वतथागतधर्मधातुस्फरणमहापूजाकर्मविधि-विस्तरसमये हूं ॥**

अथ वज्रविश्वो बोधिसत्वः पुनरपीमां स्वविद्योत्तमामभाषत् **ओं सर्वतथागतसर्वलोकधातुविविधमहापूजाकर्म-विधिविस्तरसमये हूं ॥**

अथ वज्रपाणिर्महाबोधिसत्वः पुनरपि स्वकुलपूजाविधिविस्तरदेवताः स्वहृदयादुत्पाद्य, सर्वलोकधातुषु सर्व-तथागताकर्षणवशीकरणानुरागणसर्वकर्मसिद्धिकार्यकरणतासन्नियोजनादीनि सर्वतथागतर्द्धिविकुर्वितानि कृत्वा, पुनरपि भगवतो वैरोचनस्य वज्रधातुमहामण्डलयोगेन चण्द्रमण्डलान्याश्रित्यावस्थिता इति ।

Delineation of the maṇḍala

अथ वज्रपाणिर्महाबोधिसत्व इदं वज्रकर्मसमयविधिविस्तरकर्ममण्डलमभाषत् ।

अथातः संप्रवक्ष्यामि कर्ममण्डलमुत्तमं ।
वज्रधातुप्रतीकाशं कर्मवज्रमिति स्मृतं ॥ १ ॥
महामण्डलयोगेन सूत्रयेत्सर्वमण्डलं ।
मध्यमण्डलसंस्थेषु बुद्धबिम्बन् निवेशयेत् ॥ २ ॥
बुद्धस्य सर्वपार्श्वेषु समयाग्र्यो निवेशयेत् ।
वज्रवेगैः समाक्रम्य मण्डलानां चतुष्टये ॥ ३ ॥
चत्वारो वज्रनाथाद्या यथावत्तु निवेशयेत् ।
तेषां सर्वेषु पार्श्वेषु महासत्व्यो निवेशयेद् ॥ ४ ॥ इति ॥

अथात्र कर्ममण्डले वज्रकर्ममुद्रा भवन्ति ।

ओं वज्रसत्वसिद्धिज्ञानसमये हुं ज्जः ॥ १ ॥
ओं वज्राकर्षणकर्मज्ञानसमये हुं ज्जः ॥ २ ॥
ओं वज्ररतिरागकर्मज्ञानसमये हुं ज्जः ॥ ३ ॥
ओं वज्रसाधुकर्मज्ञानसमये हुं ज्जः ॥ ४ ॥

ओं वज्रभृकुटी वशीकुरु हुं ॥ ५ ॥
ओं वज्रसूर्यमण्डले वशीकुरु हुं ॥ ६ ॥
ओं वज्रध्वजाग्रकेयूरे वशीकुरु हुं ॥ ७ ॥
ओं वज्राट्टहासे वशीकुरु हुं ॥ ८ ॥
ओं वज्रपद्मरागे रागय हुं ॥ ९ ॥
ओं वज्रतीक्ष्णरागे रागय हुं ॥ १० ॥
ओं वज्रमण्डलरागे रागय हुं ॥ ११ ॥
ओं वज्रवाग्रागे रागय हुं ॥ १२ ॥
ओं वज्रकर्मसमये पूजय हुं ॥ १३ ॥
ओं वज्रकवचबन्धे रक्षय हुं ॥ १४ ॥
ओं वज्रयक्षिणि मारय वज्रदंष्ट्राया भिन्द हृदयममुकस्य हुं फट् ॥ १५ ॥
ओं वज्रकर्ममुष्टि सिद्ध्य सिद्ध्य हुं फट् ॥ १६ ॥

Ritual

अथात्र कर्ममण्डले यथावद् विधिविस्तरं कृत्वा, वज्रकुलकर्मज्ञानान्युत्पादयेत् ।
तत्रादित एव शान्तिकर्मादिज्ञानं शिक्षयेत् ।

समिद्भिर्मधुरैरग्निं प्रज्वाल्य सुसमाहितः ।
वज्रक्रोधसमापत्त्या तिलां हुत्वा अघान्दहेत् ॥ १ ॥
तैरेव तु समिद्भिस्तु प्रज्वाल्य तु हुताशनं ।
तण्डुलांस्तु जुह्वन् नित्यं गृहपुष्टिर्भवेद् ध्रुवं ॥ २ ॥
समिद्भिर्मधुरैश्चापि अग्निं प्रज्वाल्य पण्डितः ।
दूर्वाप्रवालां सघृतान् जुह्वन्नायुः प्रवर्धते ॥ ३ ॥
तैरेव तु समिद्भिस्तु प्रज्वाल्य तु हुताशनं ।
कुशप्रवालांस्तैलेन जुह्वन् रक्षा तु शाश्वतम् ॥ इति ॥ ४ ॥

अथैषां हृदयमन्त्राणि भवन्ति ।

ओं सर्वपापदहनवज्राय स्वाहा ॥
ओं वज्रपुष्टये स्वाहा ॥
ओं वजायुषे स्वाहा ॥
ओं अप्रतिहतवज्राय स्वाहा ॥

समिद्भिः कडकैः पूर्वं वज्रक्रोधसमाधिना ।
अग्निं [प्रज्वाल्य] कुञ्जैस्तु कण्टकैरभिकर्षितः ॥ १ ॥
तैरेव तु समिद्भिस्तु प्रज्वाल्याग्निं सुरोषवान् ।
रक्तपुष्पफलान् चापि जुह्वन् रागयते जगत् ॥ २ ॥
समि[द्भिरपि] कुपितो ह्यग्निं प्रज्वाल्य योगवान् ।
अयोरजांसि हि जुह्वन् वज्रबन्धो भविष्यति ॥ ३ ॥
तैरेव तु समिद्भिस्तु प्रज्वाल्याग्निं समाहितः ।
जुहेत् तिक्तफलं क्रोधान् मारिमुत्पादयेत्क्षणात् ॥ ४ ॥

तत्रैषां हृदयानि भवन्ति ।

हुं वज्राकर्षय स्वाहा ॥
हुँ वज्र रागय स्वाहा ॥
हुं वज्र बन्धाय स्वाहा ॥
हुं वज्र मारणाय स्वाहा ॥

समिद्भिरमलैः प्रज्वाल्य क्रुद्धो हुतभुजं बुधः ।
होममाम्लफलैः पुष्पैर्वशीकरणमुत्तमं ॥ १ ॥
तैरेव तु समिद्भिस्तु प्रज्वाल्याग्निं समाहितः ।
जुहुयात्कामफलां कुद्धः कामरूपित्वमाप्नुयात् ॥ २ ॥
समिद्भिस्तादृशैरेव प्रज्वाल्य तु हुताशनं ।
काण्डान्यदृश्यपुष्पाणां जुह्वं रुच्या न दृश्यते ॥ ३ ॥
तैरेव तु समिद्भिस्तु प्रज्वाल्याग्निं समाहितः ।
आकाशवल्लीपुष्पाणि जुह्वन्नाकाशगो भवेद् ॥ इति ॥ ४ ॥

तत्रैषां हृदयानि भवन्ति ।

ओं वज्रवशंकराय स्वाहा ॥
ओं कामरूपवज्राय स्वाहा ॥
ओं अदृश्यवज्राय स्वाहा ॥
ओं वज्रखचारिणी स्वाहा ।

समिद्भिस्तिक्तवीर्यैस्तु प्रज्वाल्याग्निं समाहितः ।
वज्रिपुष्पां जुहेत् क्रुद्धो वज्रमाज्ञाकरं भवेत् ॥ १ ॥
तैरेव तु समिद्भिस्तु प्रज्वाल्याग्निं सुरोषवान् ।
यस्य सौरे जुहेन्माल्यं सोऽप्याज्ञाकरतां व्रजेत् ॥ २ ॥
समिद्भिस्तैस्तु संक्रुद्धः प्रज्वाल्याग्निं समाहितः ।
वज्रपाणेर्जुहेन्माल्यं सोऽप्याज्ञाकरतां व्रजेत् ॥ ३ ॥
तैरेव तु समिद्भिस्तु प्रज्वाल्याग्निं सुरोषितः ।
चीवराणि जुहेत् बुद्धो यात्याज्ञाकरतां क्षणात् ॥ ४ ॥

तत्रैषां हृदयानि भवन्ति ॥

हुं वज्रवशंकराय स्वाहा ॥
हुं सौरिवशंकरवज्राय स्वाहा ॥
हुं वज्रपाणिवशंकराय स्वाहा ॥
हुं बुद्धवशंकरवज्राय स्वाहा ॥

Mudrā

ततो रहस्यकर्ममुद्राज्ञानं शिक्षयेत् ।

प्रियया तु स्त्रिया सार्धं संवसंस्तु भगेऽञ्जनं ।
प्रक्षिप्य घट्टयेत्तत्र तेनांज्याक्षी वशं नयेत् ॥ १ ॥
मनःशिलां भग विध्वा वज्रबन्धेन तां पिधेत् ।
चतुर्विधैर्निमित्तैस्तु सिद्धिश्चापि चतुर्विधा ॥ २ ॥

रोचनां तु भगे स्थाप्य गुह्यमुष्ट्या निपीडयेत् ।
[स्था]पितं ज्वालते तत्र भवेद्वज्रधरो समः ॥ ३ ॥
कुङ्कुमं तु भगे विध्वा तद्भ्रुगं सत्ववज्रया ।
च्छादितं ज्वालते तन्तु भवेद्वज्रधरो सम ॥ इति ॥ ४ ॥

तत्रैषां हृदयानि भवन्ति ।

ओं वज्रगुह्य रतिवशंकर सिध्य हुं ॥
ओं वज्रगुह्य सिध्य हुं ॥
ओं गुह्यवज्र सिध्य हुं ॥
ओं वज्रधरगुह्य सिध्य हुं ॥

ततो वज्रकुलकर्ममहामुद्राज्ञानं शिक्षयेत् ।

वज्रकार्यप्रयोगेण महामुद्राः समासतः ।
वज्रक्रोधसमापत्त्या वज्रमुष्टिप्रयोगतः ॥ १ ॥
समयाग्र्यस्तथैवेह हुंकाराङ्गुलियोगतः ।
धर्ममुद्रास्तथैवेह **ओं**काराद्यै **अ**-अक्षरैः ॥ २ ॥
कर्ममुद्राः समासेन कर्ममुष्टिद्विधीकृता ।
सर्वसिद्धिकरा शुद्धा वज्रकर्मप्रयोगतः ॥ ३ ॥

सर्वतथागतवज्रसमयात् महाकल्पराजाद् वज्रकुलकर्ममण्डलविधिविस्तरः समाप्तः ॥

CHAPTER 10

MAHĀ-KALPA-VIDHI-VISTARA

Emanation of deities from samādhi

अथ भगवान् पुनरपि सर्वतथागतवज्रसमयमुद्राधिष्ठानं नाम समाधिं समापद्येमां सर्वविद्योत्तममभाषत् **ओं सर्वतथागतवज्रसमये हूं ॥**

अथ वज्रपाणिर्महाबोधिसत्व इमां स्ववज्रसमयमुद्रामभाषत् **हुं वज्रि मट् ॥**

अथ वज्रगर्भो बोधिसत्व इमां स्वरत्नसमयमुद्रामभाषत् **हुं भृकुटिवज्रे रट् ॥**

अथ वज्रनेत्रो बोधिसत्वो महासत्व इमां स्वधर्मसमयमुद्रामभाषत् **हूं पद्मवज्रि त्रिट् ॥**

अथ वज्रविश्वो बोधिसत्वो महासत्व इमां स्वकर्मसमयमुद्रामभाषत् **हूं वज्रकर्माग्नि कुट् ॥**

Delineation of the maṇḍala

अथ वज्रपाणिर्महाबोधिसत्वः पुनरपीदं त्रिलोकविजयचतुर्मुद्रामण्डलमभाषत् ।

अथातः संप्रवक्ष्यामि मुद्रामण्डलमुत्तमं ।
वज्रधातुप्रतीकाशं क्रोधवज्रमिति स्मृतं ॥ १ ॥
महामण्डलयोगेन सूत्रयेत् सर्वमण्डलम् ।
त्रिलोकविजयाद्यांस्तु लिखेद्बुद्धस्य सर्वत ॥ इति ॥ २ ॥

Mudrā

अथात्र चतुर्मुद्रामण्डले महामण्डलयोगेनाकर्षणादिविधिविस्तरंकृत्वा प्रवेश्य चतुर्मुद्रामण्डलं गुह्यमुद्राज्ञानं शिक्षयेत् ।

स्वयं लिख्य चतुर्मुद्रामण्डलं शुद्धधर्मतां ।
उच्चारयं स्त्रिया सार्धं संवसं सिद्धिराप्यते ॥ १ ॥
स्वयं लिख्य चतुर्मुद्रामण्डलं शुद्धधर्मतां ।
उच्चारयन् रागेण स्त्रीं निरीक्षं सिद्धिराप्यते ॥ २ ॥
स्वयं लिख्य चतुर्मुद्रामण्डलं शुद्धधर्मतां ।
प्रवर्तयं स्त्रियं कान्तां परिचुम्बंस्तु सिध्यति ॥ ३ ॥
स्वयं लिख्य चतुर्मुद्रामण्डलं शुद्धधर्मतां ।
उच्चारयं समालिङ्गं त्सर्वसिद्धिरवाप्यते ॥ ४ ॥

तत्रैताः शुद्धधर्मतामुद्रा भवन्ति ।

ओं सर्वतथागतविशुद्धधर्मते होः ॥
ओं वज्रविशुद्धदृष्टि ज्जः ॥
ओं स्वभावविशुद्धमुखे हुं ॥
ओं सर्वविशुद्धकायवाङ्मनःकर्मवज्रि हन् ॥

ततश्चतुर्मुद्रामण्डलगुह्यरहस्यमुद्रां शिक्षयेत् ।

प्रविश्य मण्डलमिदं पञ्चभिः कामसद्गुणैः ।
रमयन् परदाराणि सुतरां सिद्धिमाप्नुते ।।

अथास्या हृदयं भवति **हो वज्रकाम ।।**

ततो यथावद् वज्राक्रान्तित्रिशूलमुद्राद्याः चतस्रः समयमुद्राः सविधिविस्तराः शिक्षयित्वा, तेन चतुर्मुद्राप्रयोगेण वज्रवाद्यतूर्यतालान् निर्यात्य, वज्रसत्वसंग्रहहृदयगीतिं गायता मुद्राप्रतिमुद्रोपमुद्राज्ञानमुद्राभिर्नृत्योपहारपूजा कार्यति ।

तत्रेयं नृत्योपहारपूजा भवति ।

वज्रनृत्यप्रयोगेण वज्रक्रोधाङ्गुलिद्वयं ।
वज्रहुंकारमुद्रां तु हृदये तु निबन्धयेत् ।। १ ।।

तथैव नृत्यन् वामां तु गृह्य दक्षिणमुष्टिना ।
परिवर्त्य ललाटो तु निवेश्याग्र्या मुखेन त ।। २ ।।

ततैव नृत्यन्मुक्त्वा तु समकुड्मलसन्धिते ।
अग्र्याञ्जलिं हृदि स्थाप्य नमेदाशयकम्पितैः ।। ३ ।।

वज्रक्रोधाङ्गुली सम्यगुत्तारमुखसन्धिते ।
परिवर्त्य तथोष्णीषे तु तर्जनी मुखसुस्थिता ।। ४ ।। इति ।।

II.6 Ekamudrā-maṇḍala

अ[थ वज्रपा]णिर्महाबोधिसत्वः पुनरपीमं स्ववज्रसमयक्रोधसमयमभाषत् हुं ॥

Delineation of the maṇḍala

अथास्य मण्डलं भवति ।

अथातः संप्रवक्ष्यामि गुह्यमण्डलमुत्तमं ।
वज्रधातुप्रतीकाशं वज्रहुंकारसंज्ञितं ॥ १ ॥
महामण्डलयोगेन बाह्यमण्डलमालिखेत् ।
तस्य मध्ये लिखेत्सम्यग्वज्रिणं चन्द्रमण्डले ॥ २ ॥
सवज्र वज्रहुंकारमहामुद्राकरग्रहं ।
प्रत्यालीढसुसंस्थानं यथावद् वर्णरूपिणम् ॥ इति ॥ ३ ॥

Mudrā

अथात्र गुह्यमण्डले सर्वसिद्धिविधिविस्तरं कृत्वा, वज्रहुंकारगुह्यमुद्राज्ञानमुदीरयेत् ।

प्रविश्य मण्डलमिदं त्रिलोकविजयाङ्गुलीं ।
साधये तु भगे विध्वा सर्वकर्म सुसिध्यति ॥

अथास्य साधनहृदयं भवति **हुं वज्रसमय कृत् ॥**

ततो वज्रहुंकाररहस्यसाधनमुद्राज्ञानं शिक्षयेत् ।

प्रविष्ट्वा मण्डलं सम्यग् महामुद्राग्रसंस्थितः ।
संवसन् वज्रहुंकारः सर्वकर्मकरो भवेद् ॥ इति ॥

तत्रास्याः साधनहृदयं भवति **हुं वज्रसमय हुं ॥**

ततो यथावन् मुद्राबन्धचतुष्टयं शिक्षयेत् । तथैव सिद्धयः संभवन्तीति ॥ यथा मण्डले एवं पटादिषु लिखितानां सर्वप्रतिमास्वपि सामान्या सिद्धिरिति ।

अथ वज्रपाणिः सर्वतथागतानाहूयैवमाह । "अधितिष्ठत भगवन्तः सर्वतथागता ममे[दं कुलं ये च] सर्वसत्वा यथाकामकरणीयतया सर्वसिद्धीः प्राप्नुयुर्" इति ॥

अथ भगवन्तः सर्वतथागताः पुनः सभाजमागम्यास्य त्रिलोकविजयकल्पस्याधिष्ठानायेदमूचुः ।

साधु ते वज्रसत्वाय वज्ररत्नाय साधु ते ।
वज्रधर्माय ते साधु साधु ते वज्रकर्मणे ॥
सुभाषितमिदं सूत्रं वज्रयानमनुत्तरं ।
सर्वतथागतं गुह्यं महायानाभिसंग्रहम् ॥ इति ॥

सर्वतथागतवज्रसमयान्महाकल्पराजान् महाकल्पविधिविस्तरः समाप्तः ॥

CHAPTER 11

TRILOKACAKRA-MAHĀ-MAṆḌALA-VIDHI-VISTARA

अथ भगवन्तः सर्वतथागताः पुनरपि समाजमापद्य जानन्नेव वज्रपाणिं महाबोधिसत्वमेवमाहुः। "प्रतिपद्यस्व वत्स सर्वतथागताज्ञाकारितयै इमं महेश्वरकायमतः स्वपादतालात् मोक्षुम्!" इति। अथ भगवां वज्रपाणिस्तांस्तथागतानेवमाह। "अहं भगवद्भिः सर्वदुष्टदमकः क्रोध इत्यभिषिक्तः। तन्मयायं व्यापादितः, तत्कथमस्य मोक्षामी?" ति।

अथ सर्वतथागता महेश्वरस्य सर्वत्रिलोकाधिपतेः शरीरस्य जीवितसंजननहेतोरिदं मृतविज्ञानाकर्षणहृदयं स्वहृदये[भ्यो निश्चरन्ति।] **ओं वज्रसत्व हूं ज्जः॥**

अथास्य मुद्राबन्धो भवति।

गुह्याङ्कुशीं दृढीकृत्य समान्त्यासु प्रसारिता।
मृतस्य मूर्ध्नि सन्धाय [पुनर्जीवितं प्राप्स्यत॥ इति॥]

अथास्मिन् विनिःसृतमात्रे स भगवान् [भस्मेश्वरनिर्घोषस्] तथागतो भस्मच्छत्राया लोकधातोर् [आगम्य, तस्य] महेश्वर[स्य काये प्रविष्ट्वा, इदमुदानमुदानयामास।]

अहो हि सर्वबुद्धानां बुद्धज्ञानमनुत्तरं।
यन्मृतोऽपि हि कायोऽयं जीवधातुत्वमागत॥ इति॥

[अथ वज्रपाणिर्] महाबोधिसत्व इदं पादोच्चारन्नाम हृदयमुदाजहार **ओं वज्र मुः॥**

अथास्य मुद्राबन्धो भवति।

वज्रक्रोधाङ्कुली[मुत्थापयित्वाग्रासङ्गं स्थिते।]
परिवर्त्य[द्वयोर्वज्रयोरधस्तात्समुद्धरेद्॥ इति॥]

अथास्मिन् भाषितमात्रे महावज्रधरपादमूलान् महादेवो [मुक्तयित्वा पुनः संजीवीकृतः।] अथ महेश्वर[कायं तेन तथागतेन सं]जीवमधिष्ठाय, स्वयौवराज्यतायामत्रैव लोकधातौ सर्वसत्व[हितार्थञ्च दुष्ट]विनयार्थं च प्रतिष्ठापितवानिति।

अथ ततो वज्रपाणि चरणतलादिमां चन्द्रपादान्नाम सर्वतथागतबोधिचित्तमुद्रां [विनिःसृतः।] **ओं चन्द्रोत्तरे समन्तभद्रकिरणी महावज्रिणि हूं॥**

अथास्य मुद्राबन्धो भवति।

वज्रबन्धं दृढीकृत्य कनिष्ठाङ्गुष्ठ [समोत्था।
समोत्थित्वा सुसारिता चन्द्रप्रभेति] कीर्तिता॥

अथास्यां विनिःसृतमात्रायां तत एव पादतलाच् चन्द्रोत्तर एव तथागतो [निश्चचार, तस्य महेश्वरस्य शिरे वज्रपाणि पादावक्रान्ते तदर्धचन्द्रमूर्धनभिषिक्तो, वज्रपाणेर्वामपार्श्वे स्थितः। ततः] सर्वतथागतै[र्वज्रपाणेर्मित्रस्य पाणौ] वज्रशूलं दत्वा, वज्रविद्योत्तमो वज्रविद्योत्तम इति वज्रनामाभिषेकेणाभिषिक्तः॥

अथ वज्रविद्योत्तमो बोधिसत्वो [महासत्वश्च] तेन वज्रशूलेन चक्रपरिवर्तनगत्या नृत्योपहारपूजां कुर्वन्निदमुदानमुदानयामास।

अहो हि सर्वबुद्धानां बोधिचित्तमनुत्तरं।
यत्पादाग्रस्पर्शेनापि बुद्धत्वं प्राप्यते मया ।। इति ।।

अथ वज्रपाणिर्महाबोधिसत्वः, ततो वज्रक्रोधसमाधेर्व्युत्थाय, भगवन्तमे[तां वाचमुवाच]। "अहं भगवं सर्वतथागतैर्वज्रं पाणिभ्यां दत्वा वज्रपाणित्वेनाभिषिक्तः। तदेषां देवादीनां बाह्यवज्रकुलानामस्मि त्रिलोकविजयमहामण्डले स्थानविनियोगङ्करिष्यामि। येन ते सत्वा अवैवर्तिका भविष्यन्ति अनुत्तरायां सम्यक्संबोधाव्" इति ।।

अथ भग[वान् वैरोचनस्] तथागतोऽर्हन् सम्यक्संबुद्ध इदं सर्वतथागतोष्णीषमुदाजहार **ओं वज्रसत्वोष्णीष हुं फट् ।।**

अथास्मिन् भाषितमात्रे सर्वतथागतोष्णी[षेभ्यो विनि:सृतो भगवद्वज्रपाणिविग्रहः, नाना]वर्णरश्मयो भूत्वा, सर्वलोकधातवोऽवभास्य, पुनरपि भगवतो वज्रपाणेर्मूर्धम् [अनुपरिवेष्टिताः, सर्वतथागतोष्णीषतेजोराशिं भूत्वा] स्थितः। अथ ततस्तेजोराशित इदं सर्वतथागतोष्णीषं निश्चचार। **ओं नमस्सर्वतथाग[तोष्णीष]तेजोराशि अनवलोकितमूर्ध हूं ज्वाल धक विधक दर विदर हुं फट् ।।**

अथ वज्रपाणिर्बोधिसत्वो महासत्व इदं स्वविद्योत्तममुदा[जहार] **ओं निसुंभ वज्र हुं फट् ।।**

ततः पुनरपि वज्रपाणिः स्वहृदयादिदं हृदयमुदाजहार **ओं ट्टक्कि ज्जः ।।**

अथ वज्रगर्भो बोधिसत्वो महासत्व इदं स्वविद्योत्तममभाषत् **ओं वज्र रत्नोत्तम ज्वालय हुं फट् ।।**

अथ वज्रनेत्रो बोधिसत्वो महासत्व इदं स्वविद्योत्तममभाषत् **ओं स्वभावशुद्ध वज्रपद्म शोधय सर्वान् विद्योत्तम हुं फट् ।।**

अथ वज्रविश्वो बोधिसत्वो महासत्व इमं स्वविद्योत्तममभाषत् **ओं वज्रकर्मोत्तम वज्रधर समयमनुस्मर सुंभनिसुंभाकर्षय प्रवेशयावेशय बन्धय समयं ग्रहय सर्वकर्माणि मे कुरु महासत्व हुं फट् ।।**

अथ वज्रविद्योत्तमो बोधिसत्वो महासत्व इदं स्वहृदयं भगवतो वज्रपाणेः पादवन्दनीयं निर्यातयामास **ओं सुंभ निसुंभ वज्रविद्योत्तम हुं फट् ।।**

अथ क्रोधवज्रो विद्याराजो भगवतश्चरणयोर्निपत्येदं स्वहृदयमदात् **हुं वज्रशूल ।।**

अथ मायावज्रो विद्याराजेदं स्वहृदयमभाषत् **ओं वज्रमाय विदर्शय सर्वं हुं फट् ।।**

अथ वज्रघण्टो विद्याराजः स्वहृदयमदात् **ओं वज्रघण्ट रण रण हुं फट् ।।**

अथ मौनवज्रः स्वहृदयमदात् **ओं वज्रमौन महाव्रत हुं फट् ।।**

अथ वज्रायुधः स्वहृदयमदात् **ओं वज्रायुध दामक हुं फट् ।।**

विद्याराजनकाः ।।

अथ वज्रकुण्डलिर्वज्रक्रोधो भगवते वज्रपाणये इदं स्वहृदयं पादवन्दनीयं निर्यातयामास। **ओं वज्रकुण्डलि महावज्रक्रोध गृह्ण हन दह पच विध्वंसय। वज्रेण मूर्धानं स्फालय भिन्द हृदयं वज्रक्रोध हुं फट् ।।**

अथ वज्रप्रभो वज्रक्रोध इदं स्वहृदयमदात्। **ओं वज्रप्रभ मारय सौम्यक्रोध हुं फट् ।।**

अथ वज्रदण्डो वज्रक्रोधः स्वहृदयमदात्। **ओं वज्रदण्ड तनुय सर्वदुष्टान् महाक्रोध हुं फट्।**

अथ वज्रपिङ्गलो वज्रक्रोध इदं स्वहृदयमदात्। **ओं वज्रपिङ्गल भीषय सर्वदुष्टान् भीमक्रोध हुं फट् ।।**

वज्रक्रोधाः ।।

अथ वज्रशौण्डो गणपतिर्भगवते वज्रपाणये इदं हृदयन्निर्यातयति स्म। **ओं वज्रशौण्ड महागणपति रक्ष सर्वदुष्टेभ्यो वज्रधराज्ञां पालय हुं फट्।**

अथ वज्रमाल इदं स्वहृदयमदात्। **ओं वज्रमाल गणपतये मालयाकर्षय प्रवेशयावेशय बन्धय वशीकुरु मारय हुं फट् ।।**

अथ वज्रवशी स्वहृदयमदात्। **ओं वज्रवशी महागणपते वशीकुरु हुं फट् ।।**

अथ विजयवज्रो गणपतिः स्वहृदयमदात्। **ओं वज्रविजय विजयं कुरु महागणपति हुं फट्॥**
गणप [तयः॥]

अथ वज्रमुसलो वज्रदूत इदं स्वहृदयं वज्रपाणये निर्यातयामास। **ओं वज्रमुसल कृट्ट कुट्ट सर्वदुष्टान् वज्रदूत हुं फट्॥**

[अथ वज्रा]निलो दूतः स्वहृदयमदात्। **ओं वज्रानिल महावेगानय सर्वदुष्टान् हुं फट्॥**
अथ वज्रानलो दूतः स्वहृदयमदात्। **ओं वज्रानल महादूत ज्वालय सर्वं भस्मीकुरु सर्वदुष्टान् हुं फट्॥**
अथ वज्रभैरवो दूतः स्वहृदयमदात्। **ओं वज्रभैरव वज्रदूत भक्षय सर्वदुष्टान् महायक्ष हुं फट्॥**
दूताः॥

अथ वज्राङ्कुशो वज्रचेट इदं स्वहृदयं भगवते वज्रपाणये निर्यातयामास। **ओं वज्राङ्कुशाकर्षय सर्वं महाचेट हुं फट्॥**
अथ वज्रकालः स्वहृदयमदात्। **ओं वज्रकाल महामृत्युमुत्पादय हुं फट्॥**
अथ वज्रविनायकः स्वहृदयमदात्। **ओं वज्रविनायकास्य विघ्नं कुरु हुं फट्॥**
अथ नागवज्र इदं स्वहृदयं भगवते वज्रपाणये पादवन्दनीयं निर्यातयामास। **ओं नागवज्रानय सर्वधनधान्यहिरण्य-सुवर्णमणिमुक्तालङ्कारादीनि सर्वोपकरणानि वज्रधर समयमनुस्माराकड्ढ गृह्ण बन्ध हर हर प्राणान् महाचेट हुं फट्॥**
चेटाः॥

अथ वज्रपाणिर्महाबोधिसत्व इदं सर्ववज्रकुलाकर्षणसमयमुदाजहार **ओं वज्राङ्कुशाकर्षय हुं॥**
ततः प्रवेशनसमयमुदाजहार **हुं वज्रपाशाकड्ढ हुं॥**
ततः समयबन्धमुदाजहार **हुं वज्रस्फोट वं॥**
ततः कर्महृदयमुदाजहार **ओं वज्रकर्म साधय कृत्॥**

Delineation of the maṇḍala

अथ वज्रपाणिरिदं सर्ववज्रकुलमहामण्डलमभाषत्।

अथातः संप्रवक्ष्यामि महामण्डलमुत्तमं।
धर्मचक्रप्रतीकाशं सूत्रये सर्वमण्डलं॥

तत्रेदं सूत्रणहृदयं भवति **ओं वज्रसूत्राकर्षय सर्वमण्डलान् हुं॥**

मण्डलस्य तु मध्ये वै विध्वा खदिरकीलकं।
ततस्तु सूत्रं द्विगुणं कृत्वा तेन प्रसूत्रयेत्॥

तत्रेदं कीलकहृदयं। **ओं वज्रकील कीलय सर्वविघ्नान् बन्धय हूं फट्॥**

चतुःसूत्रसमायुक्तं सूत्रयेच्चक्रमण्डलं।
बाह्यतस्तस्य निःक्रम्य द्विगुणं तु तथैव च॥१॥
तस्यापि त्रिगुणङ्कुर्यात् बाह्यमण्डलसूत्रणं।
विदिशाश्चारयोगेन कोणरेखास्तु सूत्रयेद्॥ इति॥२॥

सूत्रणविधिः।

ततस्तु सूत्रणं तत्तु रङ्गैः शुद्धैस्तु पूरयेत्।
वामवज्रमहामुष्ट्या प्राग्रेखां तु यथासुखं॥

तत्रेदं रङ्गहृदयं। **ओं वज्ररङ्ग समय हूं॥**

ततो मध्यस्थितो भूत्वा वज्राचार्यः समाहितः ।
मनसोद्घाटयेच्चैव वज्रद्वारचतुष्टयं ॥

तत्रेदं द्वारोद्घाटनहृदयं । **ओं वज्रोद्घाटनसमय प्रविश शीघ्रं स्मर वज्रसमय हुं फट् ॥**

सौवर्णराजते वापि मृण्मये वा सुचित्रिते ।
इष्टके तु चतुरश्रे तु बुद्धबिम्बं निवेशयेत् ॥

तत्रेदं सर्वबुद्धहृदयं [भ]वति । **ओं सर्वविद् ॥**

बुद्धस्य सर्वतः कुर्यान्महासत्वचतुष्टयं ।
त्रिलोकविजयं कुर्वन् वज्रपाणिं पुरःस्थितं ॥

तत्रैतानि महासत्वचतुष्टयहृदयानि भवन्ति ।

ओं सुंभ निसुंभ हुं गृह्ण गृह्ण हुं गृह्ण पय हुं आनय हो भगवन् वज्र हुं फट् ॥ १ ॥
ओं वज्रभृकुटि क्रोधानय सर्वरत्नान् हीः फट् ॥ २ ॥
ओं वज्रदृष्टि क्रोधदृष्टया मारय हुं फट् ॥ ३ ॥
ओं वज्रविश्व क्रोध कुरु सर्वं विश्वरूपतया साधय हूं फट् ॥ ४ ॥

प्रवेशेन्निष्क्रमेद्वापि सूत्राधस्तान्मनोगतं ।
वज्रवेग इति ख्यातस्तेन रेखां समाक्रमेद् ॥ इति ॥

तत्रेदं वज्रवेगहृदयं । **वज्रवेग ॥**

वज्रवेगेन निःक्रम्य प्रथमं मण्डलं तथा ।
यथावदनुपूर्वेण वज्रमायादयो लिखेत् ॥

तत्रैषां समयहृदयानि भवन्ति ।

ओं वज्रचक्र हूं ॥ १ ॥
ओं वज्रघण्ट हूं ॥ २ ॥
ओं वज्रदण्डकाष्ठ हूं ॥ ३ ॥
ओं वज्रायुध हूं ॥ ४ ॥

वज्रवेगेन चाक्रम्य द्वितीयं मण्डलं तथा ।
वज्रकुण्डलिपूर्वांस्तु वज्रकोधान्निवेशयेत् ॥

तत्रैषां हृदयानि भवन्ति ।

ओं प्रज्वलित प्रदीप्तवज्र हूं ॥ १ ॥
ओं वज्रसौम्य हूं ॥ २ ॥
ओं वज्रदण्ड हूं ॥ ३ ॥
ओं वज्रविकृत हुं ॥ ४ ॥

ततस्तु वज्रवेगेन लिखेद् द्वारचतुष्टये ।
वज्रशौण्डादयः सर्वे यथावदनुपूर्वशः ॥

तत्रैषां समयहृदयानि भवन्ति ।

ओं वज्रमद हुं ॥
ओं वज्रमाले हूं ॥

ओं वज्रार्थ हूं ॥
ओं वज्राशि हूं ॥

वज्रवेगेन चाक्रम्य तृतीये मण्डले लिखेत्।
यथावदनुपूर्वेण स वज्रमुसलादयः ॥

तत्रैषां हृदयानि भवन्ति।

ओं वज्रमुसल हूं ॥
ओं वज्रपट हूं ॥
ओं वज्रज्वाल हूं ॥
ओं वज्रग्रह हूं ॥

वज्रवेगेन चाक्रम्य चतुर्थे मण्डले लिखेत्।
वज्राङ्कुशादयश्चेटा यथावदनुपूर्वशः ॥

तत्रैषां हृदयानि भवन्ति ॥

ओं वज्रदंष्ट्र हूं ॥
ओं वज्रमारण हूं ॥
ओं वज्रविघ्न हूं ॥
ओं वज्रहरण हुं ॥

वज्रवेगेन निःक्रम्य बाह्यमण्डले संस्थिता।
यथावदनुपूर्वेण संलिखेत्सर्वमातरः ॥ १ ॥
वज्रद्वारेषु सर्वेषु द्वारपालास्त एव तु।
अतः परं प्रवक्ष्यामि यथावद्विधिविस्तरम् ॥ २ ॥ इति ॥

अथात्र त्रिलोकचक्रमहामण्डले आकर्षणादिकर्म कृत्वा, स्वयं वज्राचार्यो वज्रक्रोधतेरिन्तिरिमुद्रां बध्वा, एवं ब्रूयाद्, "अहन्ते वज्रसमयज्ञानमुत्पादयिष्यामि। तत्त्वया न कस्यचिद्वक्तव्यं। मा ते विषमा परिहारेण कालक्रियया नरकपतनं स्याद्," इदमुक्त्वेदं शपथहृदयं दद्यात्। वज्रक्रोधतेरिन्तिरिमुद्रां बध्वा दर्शयेत् "अयं वज्रक्रोधसमयस्ते सन्दहेत् कुलन्, मूर्धादारभ्य कायं तु नाशयेत्, यद्यतिक्रमेत् समयं बन्धय" ॥

ततो वज्रधारि कर्ममुद्रां बन्धयेदनेन हृदयेन **ओं सर्वतथागत वज्रधर गृह्ण बन्ध समय हूं ॥**

अथास्या मुद्राया बन्धो भवति।

कनिष्ठाङ्गुष्ठबन्धो तु हस्तौ द्वावधरोत्तरौ।
मुद्रेयङ्कर्मसमय[वज्रबन्धेति] कीर्तिता ॥

ततो वज्रोदकेनाभिषिञ्चेदनेन हृदयेन **ओं वज्राभिषेकाभिषिञ्च वज्रधरत्वे समय ग्र ग्र ॥**

ततो नक्तकेन मुखं बध्वा [प्रवेशयत्य] नेन हृदयेन **ओं प्रविश वज्र प्रवेशय वज्र आविश वज्र अधितिष्ठ वज्र हूं ॥**

ततः प्रवेश्य पुष्पाणि क्षिपेत् अनेन हृदयेन **ओं प्रतीच्छाधितिष्ठ वज्र होः ॥** ततो यत्र पतति सोऽस्य सिध्यति।

ततो मुखबन्धं मुक्त्वा, मण्डलं यथानुपूर्वतो दर्शयेत्। न चास्य वक्तव्यं किं देव इति। तत्कस्माद्धेतोः ? सन्ति सत्वा मिथ्यादृष्टयो ये न श्रद्धास्यन्ति, किमेतदमोघं बुद्धानां भगवतां ज्ञानं, यथा तथागता वज्रकुले वज्रपाणिनाभिषिक्तास्तथागता एवेति समयः। अन्यत्र ये देवे भक्तास्तेषां शपथहृदयं दत्वा वाच्यमिति।

ततो वज्ररत्नचिह्नमालाभिषेकं दत्वा, कर्मवज्रं पाणिभ्यामभिप्रयच्छच्य, वज्रनाम कुर्यात्, यथा वज्रसमयमहामण्डल इति ॥

Mudrā

ततो महामुद्राबन्धं शिक्षयेत् ।

वज्रबन्धं दृढ़ीकृत्य प्रविष्टाङ्गुष्ठसंचयं ।
कुञ्चिताग्र्याषु गच्छन्नं सत्वोष्णीषेति संज्ञिता ।। १ ।।
वज्रबन्धं समाधाय समाङ्गुष्ठात्म्यमध्यमा ।
तेजोराशीति विख्याता तेजोराशेर्महात्मनः ।। २ ।।
वज्रमुद्राद्विकं बध्वा कनिष्ठाङ्गुष्ठसन्धितं ।
गाढमङ्कुशबन्धेन महाविद्योत्तमस्य तु ।। ३ ।।
महाविद्योत्तममयीं मुद्रां बध्वा सुयन्त्रितां ।
हृद्यङ्गुष्ठमुखानां तु बन्धनाद्धृदया स्मृता ।। ४ ।।
तामेवानाममध्याभिरङ्गुलीभिः सुयन्त्रितां ।
वज्ररत्नप्रयोगेण परिवर्त्य मुखस्थिता ।। ५ ।।
तामेवोत्तानसंस्थां स्वहृदये परिवर्त्य वै ।
चतुःपुष्पा तु नामेन पद्मविद्योत्तमस्य तु ।। ६ ।।
तामेव मूर्धादारभ्य भ्रमत्कायाग्रमण्डला ।
वज्रविश्वस्य मुद्रेयं वज्रकर्मप्रसाधिके ।। ति ।। ७ ।।
सत्ववज्रां दृढीकृत्य कनिष्ठा वज्रसन्धिता ।
सर्वविद्धृदयस्यास्य मुद्रेयं सर्वसाधिका ।। ८ ।।
कनिष्ठाङ्गुष्ठबन्धे तु वाममध्याङ्गुलित्रिके ।
त्रिशूले मध्यशूलं तु वज्रमुद्रापरिग्रहं ।। ९ ।।
वज्रविद्योत्तमस्येयं वज्रशूलेति कीर्तिता ।
अतः परं प्रवक्ष्यामि मायावज्रादिसंज्ञिता ।। १० ।।

वज्रबन्धं दृढीकृत्य वामवज्रं तु बन्धयेत् ।
वज्रमुष्टिरिति ख्याता सर्ववज्रकुलेष्वियं ।। १ ।।
द्विधीकृत्य तु तद्वज्रं सर्वचिह्ननिवेशितं ।
सर्ववज्रकुलानां तु मुद्रासु च निवेशयेत् ।। २ ।।
प्रसारिताग्रा पृष्ठस्था ज्येष्ठाङ्गुष्ठग्रहाधगा ।
ओंकार मूर्ध्नि संस्था तु वज्र चैव प्रतिष्ठिता ।। ३ ।।
विद्याराजमहामुद्रागणः ।।

प्रसारिताश्रिता पाणौ हस्तपृष्ठे तथैव वा ।
मुष्टिसंस्था भुजा वा च मुखतः परिवर्तिता ।।
वज्रक्रोधमहामुद्रागणः ।।

वामाङ्गुष्ठसुसंस्था तु मालाबन्धप्रयोजिता ।
दक्षिणेनार्थदायी च खड्गमुद्राग्रमुष्टिमा ।।
गणपतिमहामुद्रागणः ।।

दक्षिणग्रस्तमुसला प्रसारितभुजा तथा।
दक्षिणज्वालसन्दर्शा वज्रमुष्टिप्रकम्पिता ।।
दूतमहामुद्रागणः ।।

सगर्वमुखदंष्ट्राग्रा दण्डाघातप्रपातिता।
बाहुसंकोचलम्बा च वामदक्षिणहारिणी ।। ति ।।
चेटमहामुद्रागणः ।।

कल्पनं मण्डले सर्वे [वाम]वज्रग्रहेण तु।
अतः परं प्रवक्ष्यामि साधनं कर्म एव च ।। १ ।।
यस्य सत्वस्य या मुद्रा भवेत्तस्य स्वमात्मना।
भावयन्तं स्वमात्मानं मुद्रासाधनमुत्तमं ।। २ ।।
मनोष्णीषमहारक्षा तेजोराशी सुसिद्धदा।
सर्वकृद्वज्रहुंकारा सर्वाकर्षा तु हृद्गते ।।ति ।। ३ ।।
बुद्धमुद्राः ।।

सर्ववित्सर्वसिद्धिस्तु वज्रविद्योत्तमा।
वज्रशूला महामुद्रा महासिद्धिप्रदायिका ।। १ ।।
मायावज्रसुसिद्धिस्तु समावेशा तु घण्टिका।
दण्डकाष्ठा तु नैर्वाणी वज्रवज्रा तु मारणी ।। २ ।।
विद्याराजनिकाः ।।

ज्वालाग्री दुष्टदमनी सौम्याग्री सर्वमारणी।
दण्डाग्रा घातनी चैव भीमाक्षी तु भयङ्करी ।।
वज्रक्रोधाः ।।

मदनी मदनी तीव्रं माला सर्वकरी स्मृता।
कामिनी प्रियकारी तु मारणी सर्वमारणी ।।
गणमुद्राः ।।

मुसला दुष्टनिर्घाता पटा सूत्रपटा तथा।
ज्वालाग्री दुष्टदमनी यक्षिणी ग्रहलायिका ।।
दूतमुद्राः ।

भक्षणी वज्रदंष्ट्रा तु मारणी सर्वमारणी।
सुविघ्ना विघ्नकर्त्री तु हारिणी सर्वहारिणी ।।
चेटमुद्राः ।।

सर्वतथागतवज्रसमयान् महाकल्पराजात् त्रिलोकचक्रमहामण्डलविधिविस्तरः परिसमाप्तः ।।

CHAPTER 12

SARVA-VAJRA-KULA-VAJRA-MAṆḌALA-VIDHI-VISTARA

Emanation of deities from samādhi

अथ भगवान् पुनरपि सर्वतथागतवज्रधारणीसमयसंभवाधिष्ठानन्नाम समाधिं समापद्येमां स्वविद्योत्तमामभाषत् **ओं वज्रसावित्रे स्वाहा ॥**

अथ वज्रपाणिर्महाबोधिसत्वः पुनरपीमं स्वविद्योत्तमामभाषत् **ओं वज्रधारि हूं ॥ वज्रविक्रमे हूं फट् ॥**

अथ वज्रगर्भो बोधिसत्वो महासत्व इमां स्वविद्योत्तमामभाषत् **ओं वज्ररत्नगोत्रे स्वाहा ॥**

अथ वज्रनेत्रो बोधिसत्वो महासत्व इमां स्वविद्योत्तमामभाषत् **ओं वज्रपद्मनेत्रे हुं फट् ॥**

अथ वज्रविश्वो बोधिसत्वो महासत्व इमां स्वविद्योत्तमामभाषत् **ओं वज्रकर्मकरि हूं ॥**

अथ वज्रविद्योत्तमो बोधिसत्व इमां स्वविद्योत्तमामभाषत् **ओं वज्रशूलाग्रे स्वाहा ॥**

अथ वज्रमायो विद्याराज इमां स्वमुद्रामभाषत् **ओं वज्रचक्रे हूं ॥**

वज्रघण्टोवाच **ओं वज्रघण्टिके हूं ॥**

मौनवज्रोवाच **ओं वज्रदण्डकाष्ठे हूं ॥**

वज्रायुधोवाच **ओं वज्रे हूं ॥**

विद्याराजसमयमुद्राः ॥

अथ वज्रकुण्डलिर्वज्रक्रोध इमां समयमुद्रामभाषत् **ओं ज्वालावज्रे हूं ॥**

अथ वज्रप्रभ उवाच **ओं वज्रसौम्ये हूं ॥**

वज्रदण्डोवाच **ओं वज्रदण्डे हूं ॥**

वज्रपिङ्गलोवाच **ओं वज्रभीषणे हूं ॥**

वज्रक्रोधसमयमुद्राः ॥

अथ वज्रशौण्डः स्वसमयमुद्रामभाषत् **ओं वज्रमदे हूं ॥**

वज्रमालोवाच **ओं वज्रमाले हूं ॥**

वज्रवश्युवाच **ओं वज्रवशे हूं ॥**

विजयवज्रोवाच **ओं वज्रापराजिते हूं ॥**

वज्रगणपतिसमयमुद्राः ॥

अथ वज्रमुसलः स्वसमयमुद्रामुदाजहार **ओं वज्रमुसल-ग्रहे हूं ॥**

वज्रानिलोवाच **ओं वज्रपटे हूं ॥**

वज्रानलोवाच **ओं वज्रज्वाले हूं ॥**

वज्रभैरवोवाच **ओं वज्रग्रहे हूं ॥**

वज्रदूतसमयमुद्राः ॥

अथ वज्राङ्कुशोवाच **ओं वज्रदंष्ट्रे हूं ।।**

वज्राकालोवाच **ओं वज्रमारणि हूं ।।**

वज्रविनायकोवाच **ओं वज्रविघ्ने हूं ।।**

नागवज्रोवाच **ओं वज्रहारिणि हूं ।।**

वज्रचेटसमयमुद्राः ।

Delineation of the maṇḍala

अथ वज्रपाणिः पुनरपीदं सर्ववज्रकुलवज्रमण्डलमभाषत् ।

अथातः संप्रवक्ष्यामि वज्रमण्डलमुत्तमं ।
चतुरश्रमुत्तरद्वारं सूत्रयेद् बाह्यमण्डलं ।। १ ।।
तस्याभ्यन्तरतस्तत्र पूर्वद्वारन्तथैव च ।
तस्य मध्ये यथायोगं बुद्धबिम्बन्निवेशयेत् ।। २ ।।
त्रिलोकविजयाद्यास्तु चतस्रस्तस्य सर्वतः ।
मण्डलस्य तथा श्रेष्ठ वज्रमुद्राः समालिखेत् ।। ३ ।।
तासां सर्वेषु पार्श्वेषु कुलमुद्राः समालिखेत् ।
वज्रशौण्डादयश्चैव चत्वारो द्वाररक्षकाः ।। ४ ।।
भीमां श्रियं सरस्वतीं दुर्गां कोणेषु वामतः ।
बाह्यकोणेषु मुद्रा वै आसामेव तु संलिखेत् ।। ५ ।।
बाह्यमण्डलेषु पुनर्यथावद्देवीः संलिखेत् ।
अतः परं प्रवक्ष्यामि यथावद्विधिविस्तरम् ।। इति ।। ६ ।।

Initiation into the maṇḍala

अथात्र वज्रमण्डले यथाकामकरणीयतया वज्राङ्कुशादिभिः समयकर्म कृत्वा, वज्रधारिमुद्रां यथावद् बध्वा, ब्रूयान् "न कस्यचित्त्वया अदृष्टसमयस्यैताः समयमुद्राः पुरतो वक्तव्याः, न च रहस्यभेदः कर्तव्यः" ।।

ततस्तत्कर्मवज्रं वज्रधारिमुद्रायामुपरि स्थाप्य, यथावत्प्रवेशयेत् । प्रवेश्य तद्वज्रं तथैव क्षिपेत् । यत्र पतति सास्य समयमुद्रा वश्या भवति **आ** ।। तया सर्वकर्माणि करोति ।।

ततो मुखबन्धं मुक्त्वा, मण्डलं यथावद् दर्शयित्वा, समयमुद्रारहस्यं ब्रूयात् ।

एताः समयमुद्रास्ते सर्वकर्मकराः शुभाः ।
मातरश्च भगिन्यश्च भार्या दुहितरोऽनुगा ।। इति ।।

तत्रास्या हृदयं भवति **ओं सर्ववज्रगामिनि सर्वभक्षे साधय गुह्यवज्रिणि हूं फट् ।।**

"अनया सकृज्जप्तया सर्वस्त्रियो वशीकृत्योपभोक्तव्याः, अधर्मो न भवति । यथाभिरुचितश्च सर्वभुज्त्व साध्याः । ततः सर्वशुद्धिचित्ततामवेत्य, सर्वमुद्रामनसोत्तमान्यपि सर्वकर्माणि कुर्वन्ती"त्याह भगवान् वज्रधरः ।।

Mudrā

अतः समयमुद्राः शिक्षयितव्याः ।।

समयक्रोधाङ्गुली मूर्ध्नि हृदये वज्रदृढीकृता ।
मुखोर्णा च मुखोद्धान्ता मूर्ध्नि स्थाप्य द्विधीकृते ।। ति ।। १ ।।
वामवज्राग्रबन्धेन त्रिशूलाङ्गन्तु पीडयेत् ।
अनया बन्धया सम्यक् सिध्येद् विद्योत्तमः स्वयम् ।। २ ।।

सर्ववज्रकुलानां तु वामवज्राग्रसंग्रहम् ।
मुद्राबन्धं प्रवक्ष्यामि समयानां यथाविधि ।। ३ ।।
चक्रा सर्वाङ्गसंपीडा घण्टा मुद्रा तथैव च ।
तथैवोङ्कारमुद्रा तु सिंहकर्णपरिग्रहा ।। ४ ।।
मुद्राराजनिकाः ।।

ज्वाला परिग्रहा चैव प्रभा संग्रहमेव च ।
दण्डमुष्टिग्रहा चैव मुखतः परिवर्तिता ।।
क्रोधसमयाः ।।

पानमुद्रा च माला च वज्रा च ष्टंभनामिता ।
मूर्धस्था चैव गणिका मण्डलद्वारपालिकाः ।।
गणिकासमयाः ।।

बाहुसंकोचचक्रा तु पृष्ठतः परिवर्तिता ।
ज्वाला स्फुलिङ्गमोक्षा च विदारितमुखस्थिता ।।
दूतीसमयाः ।।

द्वयन्तप्रवेशितमुखी पीड्य चैव प्रपातनी ।
बाहुवेष्टनवेष्टा च सहसा हारिणी तथे ।। ति ।।
चेटीसमयाः ।।

सर्वतथागतवज्रसमयान् महाकल्पराजात् सर्ववज्रकुलवज्रमण्डलविधिविस्तरः परिसमाप्तः ।।

CHAPTER 13

SARVA-VAJRA-KULA-DHARMA-SAMAYA-MAṆḌALA-VIDHI-VISTARA

Emanation of deities from samādhi

अथ भगवां पुनरपि सर्वतथागतधर्मसमयसंभववज्राधिष्ठानन्नाम समाधिं समापद्येमां स्वविद्योत्तमामभाषत् **ओं वज्र वित्** ॥

अथ वज्रपाणिः पुनरपीदं स्वधर्मसमयमभाषत् **ओं हन हन हुं फट्** ॥

अथ वज्रगर्भः स्वधर्मसमयमभाषत् **ओं हर हर हुं फट्** ॥

अथ वज्रनेत्रः स्वधर्मसमयमभाषत् **ओं मर मर हुं फट्** ॥

अथ वज्रविश्वः स्वधर्मसमयमभाषत् **ओं कुरु कुरु हुं फट्** ॥

अथ वज्रविद्योत्तमः स्वधर्मसमयमभाषत् **ओं हुं हुं फट्** ॥

अथ मायावज्र उवाच **ओं च्छिन्द च्छिन्द हुं फट्** ॥ **ओं आविशाविश हुं फट्** ॥ **ओं भूर्भुवः स्व हुं फट्** ॥ **ओं भिन्द भिन्द हुं फट्** ॥

विद्याराजनकाः ॥

ओं दम दम हुं फट् ॥
ओं मारय मारय हुं फट् ॥
ओं घातय घातय हुं फट् ॥
ओं भय भय हुं फट् ॥

क्रोधाः ॥

ओं मद मद हुं फट् ॥
ओं बन्ध बन्ध हुं फट् ॥
ओं वशीभव हुं फट् ॥
ओं जय जय हुं फट् ॥

गणपतयः ॥

ओं भ्यो भ्यो हुं फट् ॥
ओं घु घु हुं फट् ॥
ओं ज्वल ज्वल हुं फट् ॥
ओं खाद खाद हुं फट् ॥

दूताः ॥

ओं खन खन हुं फट् ॥
ओं मर मर हुं फट् ॥

ओं गृह्ण गृह्ण हुं फट् ॥
ओं विभ विभ हुं फट् ॥

चेटाः ॥

Delineation of the maṇḍala

अथ वज्रपाणिः पुनरपीदं सर्ववज्रकुलधर्मसमयमण्डलमभाषत्।

अथातः संप्रवक्ष्यामि महामण्डलमुत्तमम्।
[त्रिलोक]चक्रसंकाशं संलिखेत्सर्वमण्डलम् ॥ १ ॥
सर्वे चैव समापन्ना बुद्धवज्रधरादयः।
धर्ममण्डलयोगेन हृच्चिह्नास्तु समालिखेत् ॥

Initiation into the maṇḍala

अथात्र [धर्मसमय]मण्डले यथावत्कर्म कृत्वा, वज्रधारिमुद्रांसु वज्रघण्टां [बद्धं बध्यै]वं ब्रूयात् "न त्वया कस्यचिदसमयदृष्टस्यादृष्टदेवकुलस्य वक्तव्यम्" इति उक्त्वा, तां घण्टां रणापयेत् एवं च ब्रूयात्, शपथहृदयं दत्वा।

यथेयं रणितघण्टा शब्दश्चास्य यथा ध्रुवः।
तथेदं कर्मवज्रं ते नाशं कुर्यात्तथा ध्रुवं ॥ १ ॥
वज्राचार्यत्वगौरव्यं वज्रस्तातृष्वमित्रता।
दुष्टमैत्रीविरासश्च यदि कुर्याद्भवान् कदा ॥ इति ॥ २ ॥

Mudrā

ततो मुखबन्धं मुक्त्वा, मण्डलं दर्श्य, धर्मसमयमुद्राज्ञानं शिक्षयेत्।

Samādhis of Vidyārāja, Vajrakrodha, Gaṇa, Dūta and Ceṭa

बुद्धवज्रधरादीनां यथावद्धर्ममण्डले।
ध्यानं सर्वसमत्वं हि वज्रविद्योत्तमस्य तु ॥ १ ॥
मायोपमं जगदिदं दुःखं गण्ठोपमं तथा।
निर्वाणं सर्वदुःखानां वज्रं भेदिष्वनुत्तरम् ॥ इति ॥ २ ॥

विद्याराजसमाधयः ॥

क्रोधोऽग्र्यः सत्वविनये सौम्यत्वं मारणं ध्रुवम्।
दण्डात् समो न निर्घातो मिथ्यादृष्टिर्भयंकरः ॥ इति ॥

वज्रक्रोधसमाधयः ॥

मदात्तुल्यो न धैर्यास्ति मालातुल्यन्न बन्धनम्।
स्त्रियो हि रागो जगद्वशंकरः धैर्यमात्रा पराजिता ॥ इति ॥

गणसमाधयः ॥

प्रहारो निग्रहाग्र्यो हि स्पर्शानां तु समीरणः।
तेजसां हुतभुग् ज्येष्ठः भोजनानां तु लोहितम् ।। इति ॥

दूतसमाधयः ॥

दंष्ट्रा शुद्धः प्रविष्टस्तु मृत्युः सर्व पदे स्थितः।
भयात्तुल्यो न विघ्नास्ति जलात्तुल्यो न वै रस ॥ इति ॥

चेटसमाधयः ॥

सर्वतथागतवज्रसमयान् महाकल्पराजात् सर्ववज्रकुलधर्मसमयमण्डलविधिविस्तरः समाप्तः ॥

CHAPTER 14

SARVA-VAJRA-KULA-KARMA-MAṆḌALA-VIDHI-VISTARA

अथ भगवान् पुनरपि सर्वतथागतकर्मसमयोद्भववज्राधिष्ठानन्नाम समाधिं समापद्येमां स्वरि[द्योत्तमामभाषत्। **ओं वज्र]कर्मप्रवर्तनि समये हूं ॥**

अथ वज्रपाणिः पुनरपि स्वकर्मोत्तममभाषत् [**ओं वज्रविलासे पूजय हूं ॥**]

अथ वजगर्भः स्वकर्मोत्तममभाषत् **ओं वज्राभिषेकेऽभिषिञ्चे हूं ॥**

अथ वज्रनेत्रः स्वकर्मोत्तममभाष[त् **ओं वज्रगीते गाहि हूं ॥**]

अथ वज्रविश्वो बोधिसत्वः स्वकर्मविद्योत्तममभाषत् **ओं वज्रनृत्ये नृत्य हूं ॥**

अथ वज्रविद्योत्तम [इमां स्वकर्मसमयामभाषत्] ओं वज्रविद्योत्तम नृत्य नृत्य विकुर्व विकुर्व हुं फट् ॥

अथ वज्रक्रोधवज्राग्नि महादेवीमां स्वकर्मसम[यामभाषत् ओं वज्रक्रोध] वज्राग्ने ज्वालय त्रिशूलं भिन्द हृदयं वज्रेण हूं फट् ॥

अथ वज्रहेमा महादेवीमां स्वकर्मसमयामभाषत् [**ओं वज्रहेमे च्छिन्द चक्रेण**] **वज्रिणि हूं फट् ॥**

अथ वज्रकौमारीमां स्वकर्मसमयामभाषत् **ओं वज्रकौमारी शीघ्रमावेशय घण्[टाशब्देन] वज्रपाणिप्रिये वज्र-समयमनुस्मर रण रण हूं फट् ॥**

अथ वज्रशान्तिर्महादेवीमां स्वकर्मसमयामभाषत् **ओं वज्रशा[न्त जप ज]पाक्षमालया सर्वान् मारय शान्त दृष्ट्या हूं फट् ।**

अथ वज्रमुष्टिर्महादेवीमां स्वकर्मसमयामभाषत् **ओं वज्रमुष्टि [हन हन] वज्रेण भिन्द भिन्द पीडय पीडय सर्व-दुष्टहृदयानि ओं सुंभ निसुंभ हूं फट् ॥**

विद्याराजनिकाः ॥

अथ [वज्रामृतक्रोधा इमां स्वकर्मसमयामभाषत् **ओं वज्रामृते सर्वदुष्टान् गृह्ण बन्ध हन पच विध्वंसय विनाशय भिन्द च्छिन्द भस्मीकुरु मूर्धन्तानुय [वज्रेण ये केतु-माममुकस्य] विघ्नविनायकास्तान् दामय दीप्तक्रोधवज्रिणि हूं फट् ॥**

अथ वज्रकान्तिः स्वकर्मसमयामभाषत् **ओं वज्रकान्ति मा[रय सौम्य-रूपे प्र]दीप्तरागेण शीघ्रं स्फोटय हृदयं वज्रधरसत्येन महाज्योत्स्नाकराले शीतरश्मिवज्रिणि हूं फट् ॥**

अथ वज्रदण्डाग्रा स्वकर्मस[मयामभाषत्] **ओं वज्रदण्डाग्रे घातय हुं फट् ॥**

अथ वज्रमेखला महाक्रोधा इमां स्वकर्मसमयामभाषत् **ओं वज्रमेखले ख[न खन शब्देन वशीकु]रु दृष्ट्या मारय भीषणि हूं फट् ॥**

क्रोधविद्याः ॥

अथवज्रविलया स्वकर्मसमयामभाषत् **ओं वज्रवि[लये च्छिन्द सिन भिन्द व]ज्रिणि मादयोन्मादय पिव पिव हूं फट् ॥**

अथ वज्राशना स्वकर्मसमयामभाषत् ओं वज्राशने भ[क्षय सर्वदुष्टान् वज्रदशनि शक्तिधारि]णि मानुषमांसाहारे नररुधिराशुभप्रिये मज्जवसानुलेपनविलिप्तगात्रे आनय सर्वधनधान्यहिरण्यसुव[र्णादीनि संक्रामय बलदेवरक्षि]णि हूं फट् ॥

अथ वज्रवसना स्वकर्मसमयमभाषत् ओं वज्रवसने आनय सर्ववस्त्रान्नपानाद्यु प[करणानि शीघ्रं वशीकुरु एनं] मे प्रयच्छाविशाविश सत्यं कथय वज्रकोशधारिणि हूं फट् ।

अथ वज्रवशी स्वकर्मसमयामभाषत् ओं [वज्रवशी आनय वशीकुरु सर्वस्त्रिय] सर्वपुरुषान् दासीकुरु क्रुद्धान् प्रसादय व्यवहारेभ्योऽप्युत्तारय विजयकरि वज्रपताकाधारिणि हुं [फट् ॥

वज्रगणिकाः ॥

अथ वज्र] दूतीमां स्वकर्मसमयामभाषत् ओं वज्रदूति आनय सर्वान् मण्डलं प्रवेशयावेशय बन्धय सर्वकर्मा[णि मे कुरु शीघ्रं शीघ्रं लघु लघु] त्रासय मारय रावेण वज्रखड्गधारिणि हुं फट् ॥

अथ वेगवज्रिणि स्वकर्मसमयामभाषत् ओं वेगवज्रिणी घु घु] घु घु शब्देन मारय विकिर विध्वंसय वज्रपटधारिणि हुं फट् ॥

अथ वज्रज्वाला स्वकर्मसमयामभाषत् ओं वज्रज्वालय स]र्वं वज्र ज्वालय दह दह भस्मीकुरु हुं फट् ॥

अथ वज्रविकटा स्वकर्मसमयामभाषत् ओं वज्रविकटे प्रविकट[दंष्ट्राकरालभीषण]वक्त्रे शीघ्रं गृह्णावेशय भक्षय रुधिरं पिब महायक्षिणि वज्रपाशधारिणि हुं फट् ॥

वज्रदूत्यः ॥

अथ वज्रमु[खी वज्रचेटी स्व]कर्मसमयामभाषत् ओं वज्रमुखि आनय वज्रदंष्ट्रि भयानिके पातालनिवासिनि खन खन खाहि खाहि सर्व मुखे [प्रवेशय स्फोट]य मर्माणि सर्वदुष्टानां वज्रनिशितासिधारिणि हुं फट् ॥

अथ वज्रकाली स्वकर्मसमयामभाषत् ओं वज्रकालि [महाप्रेत]रूपिणि मानुषमांसरुधिरप्रिये एह्येहि गृह्ण गृह्ण भक्षय वज्रडाकिनि वज्रशङ्खले सर्वदेवगणमातृभूते हर हर [प्राणानमुकस्य] कपालमालालंकृतसर्वकाये किं चिरायसि वज्रखट्वाङ्गधारिणि प्रेतमानुषशरीरे शीघ्रमावेशय प्रवेशय बन्ध[य वशीकुरु मारय वज्रराक्षसि हूं हूं हूं हूं फट् ॥]

अथ वज्रपूतना स्वकर्मसमयामभाषत् अथ वज्रपूतने मानुषमांसवसारुधिरमूत्रपुरीषश्लेष्मसिंघाणकरे[तो गर्भकरिण्य याहि] शीघ्रमिदमस्य कुरु वज्रशोधनिकाधारिणि सर्वकर्माणि मे कुरु हुं फट् ॥

अथ वज्रमकरीमां स्वकर्मसमयामभाषत् [ओं वज्रमकरि ग्र]स ग्रस शीघ्रं शीघ्रं प्रवेशय पातालं भक्षय वज्रमकरधारिणि हुं फट् ॥

वज्रचेट्यः ॥

Delineation of the maṇḍala

अथ वज्रपाणिः पुनरपीदं सर्ववज्रकुलकर्ममण्डल[मभाषत् ॥

अ]थातः संप्रवक्ष्यामि कर्ममण्डलमुत्तमम् ।
वज्रमण्डलयोगेन सूत्रयेत् सर्वमण्डलम् ॥ १ ॥
मण्डलाग्राणि सर्वाणि बुद्धमध्यस्थितानि [वै ।
अनुपूर्वेण प]ङ्क्त्या वै महासत्वान्निवेशयेत् ॥ २ ॥
तस्य मध्ये सपत्नीकं वज्रविद्योत्तमं स्वयम् ।
वज्रलास्यादिभिर्गुह्यनृत्यपूजाभिरर्चयेत् ॥ ३ ॥

[तत्र देवी यथाक्रमं] चक्रमण्डलयोगतः ।
स्वमुद्राप्रतिमुद्राभिर्नृत्यमानास्तु संलिखेत् ॥ ४ ॥

पूजार्थं बुद्धवज्रिभ्यां वज्रनृत्यप्रयोगतः ।
[चतुरश्रद्वारेषु वै यथाक्रमं धू]पादिकम् ॥ इति ॥ ५ ॥

Mudrā

अथात्र कर्ममण्डले समाकर्षणादिकर्म कृत्वा, यथावद् वज्रधारिकर्मसमयमुद्रां बध्वैवं वदेत् ["न त्वया कस्यचिददृष्टदेवकुलस्या]ज्ञातकर्मस्येदं गुह्यकर्म वक्तव्यं, मा ते समयो व्यथेद् !" इति उक्त्वा, वज्राचार्यः स्वकर्मवज्रधारिसमयमुद्रां बन्धयेत्; क्रोधदृष्टचा निरीक्षन्निदमुत्तारयेत् **ओं वज्रधार्याविशय प्रवेशय नृत्यापय सर्वकर्मसिद्धिं प्रयच्छ हूं अ हूं अ ल ल ल ल वज्रि ॥**

ततः स्वयमाविश्य प्रविशेति, मुद्राप्रतिमुद्राभिर्नृत्योपहारपूजां करोति । ततः प्रभृति सर्वकर्माणि कायवाग्दृष्टिमनोवज्रमुद्राभिरीप्सितेन करोति ।

ततो मुखबन्धं मुक्त्वा, नृत्योपहारमुद्राज्ञानं शिक्षयेत् ।

बुद्धवज्रधरादीनां स्मयाग्र्यो द्विधीकृताः ।
वज्रलास्यादिपूजां तु वज्रविद्योत्तमस्य वै ॥ १ ॥

सर्वासां चैव विद्यानां यथावदनुपूर्वशः ।
नृत्योपहारपूजाभिः पूजयेत्कर्ममण्डलं ॥ २ ॥

वज्रनृत्यप्रयोगेण महामुद्रास्तु संक्षिपेत् ।
समयाग्र्य द्विधीकृत्य प्रतिमुद्राभिमोक्षयेत् ॥ ३ ॥

आभिर्नृत्योपहारेण पूजयं सर्वनायकान् ।
महावज्रधरादिश्च कर्मसिद्धिं भवेद् ध्रुवम् ॥ ४ ॥ इति ॥

सर्वतथागतवज्रसमयान्महाकल्पराजात् सर्ववज्रकुलकर्ममण्डलविधिविस्तरः परिसमाप्तः ॥

CHAPTER 15

EPILOGUE OF THE SARVA-TATHĀGATA-VAJRA-SAMAYA NĀMA MAHĀ-KALPA-RĀJA

अथ वज्रपाणिः सर्ववज्रकुलान् सर्वसत्त्वार्थं [स्थित्वा] यावन् सन्नियोज्यावैवर्तिकभूमौ प्रतिष्ठाप्य, जानन्नेव भगवन्तमेतदभाषत्। "अहं भगवद्भिः सर्वतथागतैस्तव गुह्यधारित्वेऽभिषिक्तः। [यदा]ज्ञापयस्व किन्तत् तथागत-गुह्यम्!" इति॥

अथ भगवान् सर्वतथागतगुह्यवज्रं नाम समाधिं समापद्येदं [सर्वतथागतगुह्यमभाषत्।

यथा यथा हि विनयाः सर्वसत्वाः] स्वभावतः।
तथा तथा हि सत्वार्थं कुर्याद्रागादिभिः शुचिः॥

अथ वज्रपाणिरिदं स्वगुह्यतामभाषत्।

[सर्वसत्वहितार्थाय बुद्धशासनहेतुतः।]
मारयेत्सर्वसत्वास्तु न स पापेन लिप्यते॥

अथ वज्रगर्भो बोधिसत्व इदं स्वमणिगुह्यमभाषत्।

सर्वसत्वहिता[र्थाय बुद्धकायप्र]योगतः।
हरस्तु सर्वचिन्तानि न स पापेन लिप्यते॥

अथ वज्रनेत्रो बोधिसत्व इदं स्वधर्मगुह्यमभाषत्।

रागशुद्धः सुखा[समः जिनगोचरदानतः।]
सहाय परदारा निषेवे स पुण्यमाप्नुते॥

अथ वज्रविश्वो बोधिसत्व इदं स्वकर्मगुह्यमभाषत्।

सर्वसत्वहितार्थाय बुद्धशासनहेतुतः।
सर्वकर्माणि कुर्वन् वं स बहुपुण्यमाप्नुते॥ इति॥

अथ भगवान् वैरोचनस्तथागतो भगवते गुह्यधारि[णे वज्र]धराय साधुकारैरभिष्टवेत्॥

साधु ते वज्रसत्वाय वज्ररत्नाय साधु ते।
वज्रधर्माय ते साधु साधु ते वज्रकर्मणे॥

सुभाषितमिदं सूत्रं वज्रयानमनुत्तरम्।
सर्वतथागतं गुह्यं महायानाभिसंग्रहम्॥ इति॥

सर्वतथागततत्वसंग्रहात् सर्वतथागतवज्रसमयो नाम महाकल्पराजः परिसमाप्तः॥

PART III

Sarva-tathāgata-dharma-samaya nāma Mahā-kalpa-rāja

CHAPTER 16

SAKALA-JAGAD-VINAYA-MAHĀ-MAṆḌALA-VIDHI-VISTARA

Hymn of 108 names of Avalokiteśvara

अथ सर्वतथागताः पुनः समाजमागम्य, [तमेव वज्रधरं] भगवन्तं सर्वधर्मेश्वरमवलोकितेश्वरमनेन नामाष्ट-शतेनाध्येषितवन्तः।

पद्मसत्व महापद्म लोकेश्वर महेश्वर।
अवलोकितेश धीराग्र्य वज्रधर्म नमोऽस्तु ते ॥ १ ॥

धर्मराज महाशुद्ध सत्वराज महामते।
पद्मात्मक महापद्म पद्मनाथ नमोऽस्तु ते ॥ २ ॥

पद्मो[द्भव] सुपद्माभ पद्मशुद्ध सुशोधक।
वज्रपद्म सुपद्माङ्ग पद्मपद्म नमोऽस्तु ते ॥ ३ ॥

महाविश्व महालोक महाकार्य महोपम।
महाधीर महावीर महाशौरे नमोऽस्तु ते ॥ ४ ॥

सत्वाशय महायान महायोग पितामह।
शम्भु शङ्कर शुद्धार्थ बुद्धपद्म नमोऽस्तु ते ॥ ५ ॥

धर्मतत्वार्थ सद्धर्म शुद्धधर्म सुधर्मकृत्।
महाधर्म सुधर्माग्र्य धर्मचक्र नमोऽस्तु ते ॥ ६ ॥

बुद्धसत्व सुसत्वाग्र्य धर्मसत्व सुसत्वधृक्।
सत्वोत्तम सुसत्वज्ञ सत्वसत्व नमोऽस्तु ते ॥ ७ ॥

अवलोकितेश नाथाग्र्य महानाथ विलोकित।
आलोकलोक लोकार्थ लोकनाथ नमोऽस्तु ते ॥ ८ ॥

लोकाक्षराक्षरमहा अक्षराग्र्याक्षरोपम।
अक्षराक्षर सर्वाक्ष चक्राक्षर नमोऽस्तु ते ॥ ९ ॥

पद्महस्त महाहस्त समाश्वासक दायक।
बुद्धधर्म महाबुद्ध बुद्धात्मक नमोऽस्तु ते ॥ १० ॥

बुद्धरूप महारूप वज्ररूप सुरूपवित्।
धर्मालोक सुतेजाग्र्य लोकालोक नमोऽस्तु ते ॥ ११ ॥

पद्मश्रीनाथ नाथाग्र धर्मश्रीनाथ नाथवान्।
ब्रह्मनाथ महाब्रह्म ब्रह्मपुत्र नमोऽस्तु ते ॥ १२ ॥

दीप दीपाग्र्य दी[पोग्र दीपा]लोक सुदीपक।
दीपनाथ महादीप बुद्धदीप नमोऽस्तु ते ॥ १३ ॥

बुद्धाभिषिक्त बुद्धाग्र्य बुद्धपुत्र महाबुध ।
बुद्धाभिषेक मूर्धाग्र्य बुद्धबुद्ध [नमोऽस्तु] ते ॥ १४ ॥

बुद्धचक्षोर्महाचक्षोर्धर्मचक्षोर्महेक्षण ।
समाधिज्ञान सर्वस्व वज्रनेत्र नमोऽस्तु ते ॥ १५ ॥

यैवं सर्वात्मना गौणं नाम्नामष्टशतं तव ।
भावयेत्स्तुनुयाद् वापि लोकैश्वर्यमवाप्नुयात् ॥ १६ ॥

अध्येषयाम त्वां वीर प्रकाशय महामुने ।
स्वकं तु कुलमुत्पाद्य धर्ममण्डलमुत्तमम् ॥ १७ ॥ इति ॥

अथार्यावलोकितेश्वरो बोधिसत्वो महासत्वः सर्वतथागताध्येषणवचनमुपश्रुत्य, येन भगवांच्छाक्यमुनिस्तथागतः तेनाभिमुखं स्थित्वा, तद्वज्रपद्मं स्वहृदि प्रतिष्ठाप्येदमुदानमुदानयामास ।

अहो हि परमं शुद्धं वज्रपद्ममिदं मम ।
पिताहमस्य च सुतोऽधितिष्ठ कुलं त्विदम् ॥ इति ॥

Emanation of the deities from samādhi

अथ भगवान् वैरोचनस्तथागतः सर्वतथागतवज्रधर्मसमयसंभवाधिष्ठानपद्मन्नाम समाधिं समापद्येदं सर्वतथागतधर्मसमयं नाम सर्वतथागतहृदयं स्वहृदयान्निश्चचार **ह्रीः** ॥

अथास्मिन् विनिःसृतमात्रे सर्वतथागतहृदयेभ्यः पद्माकारा अनेकवर्णरूपलिङ्गैर्यथा रश्मयो विनिःसृत्य, सर्वलोकधातुषु रागादीनि विशुद्धधर्मताज्ञानानि संशोध्य, पुनरप्यागत्यार्यावलोकितेश्वरस्य हृदये प्रविष्टा इति ॥

अथ भगवान् सर्वतथागतधर्मसमयन्नाम स्वविद्योत्तममभाषत् **ओं वज्रपद्मोत्तम ह्रीः** ॥

अथ वज्रपाणिर्महाबोधिसत्व इदं स्वविद्योत्तममभाषत् **ओं वज्र हुं फट्** ॥

अथ वज्रगर्भो बोधिसत्व इदं स्वविद्योत्तममभाषत् **ओं वज्ररत्नोत्तम त्रः** ॥

अथ वज्रनेत्रो बोधिसत्व इदं स्वविद्योत्तममभाषत् **ओं वज्रविद्योत्तम ह्रीः** ॥

अथ वज्रविश्वो बोधिसत्व इदं स्वविद्योत्तममभाषत् **ओं वज्रविश्वोत्तम अः** ॥

अथ खल्ववलोकितेश्वरो बोधिसत्वो महासत्वः सर्वरूपसंदर्शनं नाम समाधिं समापद्येदं सर्वजगद्विनयसमयन्नाम स्वहृदयमभाषत् **ओं हुं ह्रीः होः** ॥

अथास्मिन् भाषितमात्रे आर्यावलोकितेश्वरहृदयात् स एव भगवां वज्रधरः आर्यावलोकितेश्वररूपधारिणः पद्मप्रतिष्ठाः पद्ममुद्राचिह्नधारिविचित्रवर्णरूपवेषालङ्काराः तथागतादिसर्वसत्वमूर्तिधारा महाबोधिसत्वविग्रहा भूत्वा विनिःसृत्य, सर्वलोकधातुषु सर्वसत्वानां यथा वैनेयतया स्वरूपाणि सन्दर्श्याशेषानवशेषसत्वधातुविनयं कृत्वा, पुनरप्यागत्य, वज्रधातुमहामण्डलयोगेन भगवतः शाक्यमुनेस्तथागतस्य सर्वतश्चन्द्रमण्डलाश्रिता भूत्वेदमुदानमुदानयिंसुः ।

अहो हि सर्वबुद्धानामुपायः करुणात्मनां ।
यत्र ह्यु पायविनयाद् देवा अपि भवन्ति हि ॥

Delineation of the maṇḍala

अथ भगवानवलोकितेश्वरो बोधिसत्वो महासत्वः स्वकुलमुत्पाद्य, सर्वतथागतेभ्य सर्वसत्वाभयार्थप्राप्त्युत्तमसिद्धिवज्रधर्मताज्ञानाभिज्ञावाप्तिफलहेतोर्निर्या[त्य, सर्वजग]द्विनयं नाम महामण्डलमभाषत् ।

अथातः संप्रवक्ष्यामि महामण्डलमुत्तमम् ।
वज्रधातुप्रतीकाशं जगद्विनयं संज्ञितं ॥ १ ॥
चतु[रश्रं] चतुर्द्वारं चतुस्तोरणशोभितं ।
चतुःसूत्रसमायुक्तं पट्टस्रग्दामभूषितं ॥ २ ॥
सर्वमण्डलकोणेषु द्वारनिर्यूहसन्धिषु ।
खचितं वज्ररत्नैस्तु सूत्रयेद्बाह्यमण्डलं ॥ ३ ॥
तस्याभ्यन्तरतः सूत्रं चतुरश्रं परिक्षिपेत् ।
द्वितीयं द्वारकोणं तु पद्माकारं प्रकल्पयेत् ॥ ४ ॥
अष्टस्तम्भप्रयोगेण पद्ममष्टदलं लिखेत् ।
तस्य केसरमध्ये तु बुद्धबिम्बन्निवेशयेत् ॥ ५ ॥

तत्रेदं बुद्धप्रवेशहृदयं भवति बुद्ध हूं ॥

बुद्धस्य सर्वतो लेख्याः पद्ममध्ये प्रतिष्ठाः ।
वज्रं रत्नं तथा पद्मं विश्वपद्मं तथैव च ॥

तत्रैषां हृदयानि भवन्ति ।

ओं ॥
हुः ॥
धीः ॥
कृः ॥

वज्रवेगेन निष्क्रम्य जगद्विनयमण्डलं ।
तत्र लोकेश्वरः कार्यः सर्वरूपान्समुत्सृजन् ॥ १ ॥
तस्य पार्श्वेषु सर्वेषु वज्रगर्वादियोगतः ।
बुद्धादयो महासत्वां पद्मचिह्नधरां लिखेत् ॥ २ ॥

तत्रैषां हृदयानि भवन्ति ।

आः ॥
ओं तथागतधर्म हूं ।
ओं वज्रपद्माङ्कुश कोशधर वज्रसत्व हूं फट् ॥
ओं मारय मारय पद्मकुसुमायुधधरामोघशर होः ॥
ओं पद्मसंभव पद्महस्त साधु हूं ।

वज्रवेगेन चाक्रम्य द्वितीयं मण्डलन्तथा ।
तत्र मध्ये समालेख्यं जटामध्ये तथागतं ॥ १ ॥
तस्य पार्श्वेषु सर्वेषु भृकुट्यादिप्रयोगतः ।
पद्मचिह्नधरा लेख्य यथावदनुपूर्वशः ॥ २ ॥

तत्रैषां हृदयानि भवन्ति ।

हूं ॥
ओं पद्मभृकुटि त्रः ॥
ओं पद्मसूर्य ज्वल हूं ॥
ओं पद्ममणि केतुधर चन्द्र प्रह्लादयावलोकितेश्वर देहि मे सर्वार्थान् शीघ्रं समय हूं ॥
ओं पद्माट्टहासैकादशमुख हः हः हः हः हूं ॥

वज्रवेगेन चाक्रम्य तृतीयं मण्डलन्तथा।
समापन्नं महासत्वं लिखेत् पद्मप्रतिष्ठितम् ॥ १ ॥
तस्य पार्श्वेषु सर्वेषु यथावदनुपूर्वशः।
पद्मालोकादियोगेन महासत्वान् निवेशयेत् ॥ २ ॥

तत्रैषां हृदयानि भवन्ति।

ध ॥

ओं तारा पद्मवलोकय मां समयसत्व हूं ॥

ओं पद्मकुमार पद्मशक्तिधर खड्गेन च्छिन्द च्छिन्द हूं फट् ॥

ओं पद्म नीलकण्ठ शंखचक्रगदापद्मपाणि व्याघ्रचर्मनिवसन कृष्णसर्पकृतयज्ञोपवीताजिनचर्मवामस्कन्धोत्तरीय नारायण[रूपध]र त्रिनेत्र मुंचाट्टहासं प्रवेशय समयान् देहि मे सिद्धिमवलोकितेश्वर हूं ॥

ओं ब्रह्म पद्मसंभव जप जप पद्मभाष हूं ॥

वज्रवेगेन चाक्रम्य चतुर्थमण्डलं तथा।
तत्र पद्मं चतुर्वक्त्रं पद्मशूलधरं लिखेत् ॥ १ ॥
तस्य पार्श्वेषु सर्वेषु वज्रनृत्यादियोगतः।
पद्मचिह्नधरा लेख्या महासत्वा यथाविधि ॥ २ ॥

तत्रैषां हृदयानि भवन्ति।

त्रीः ॥

ओं पद्मनट्टेश्वर नट्ट नट्ट पूजय सर्वतथागतान् वज्रकर्मसमयाकर्षय प्रवेशय बन्धयावेशय सर्वकर्मसिद्धिं मे प्रयच्छावलोकितेश्वर हूं ॥

ओं अभयंददावलोकितेश्वर रक्ष बन्ध पद्मकवचं समय हूं ॥

ओं महाप्रचण्ड विश्वरूप विकटपद्मदंष्ट्राकराल भीषणवक्त्र त्रासय सर्वान् पद्मयक्ष खाद खाद धिक् धिक् धिक् धिक् ॥

ओं पद्ममुष्टि समय[स्त्व] बन्ध हूं फट् ॥

वज्रवेगेन चाक्रम्य सर्वकोणेषु संलिखेत्।
वज्रलास्यादियोगेन पद्मलास्यादिदेवताः ॥

तत्रैता मुद्रा भवन्ति।

ओं पद्मलास्ये रागय महादेवि रागपूजासमये हूं ॥

ओं पद्ममालेऽभिषिञ्चाभिषेकपूजासमये हूं ॥

ओं पद्मगीते गाद गीतपूजासमये हूं ॥

ओं पद्मनृत्ये नृत्य सर्वपूजाप्रवर्तनसमये हूं ॥

वज्रवेगेन निःक्रम्य बाह्यमण्डलसन्निधौ।
चतस्रः पद्मधूपाद्याः पूजादेव्यः समालिखेत् ॥

तत्रैताः पूजामुद्रा भवन्ति।

ओं पद्मधूपपूजासमये प्रह्लादय पद्मकुलदयिते महागणि पद्मरति हूं ॥

ओं पद्मपुष्पपूजासमये पद्मवासिनि महाश्रिये पद्मकुलप्रतीहारि सर्वार्थान् साधय हूं ॥

ओं पद्मदीपपूजासमये पद्मकुलसुन्दरि महादूत्यालोक संजनय पद्मसरस्वति हूं ॥
ओं पद्मगन्धपूजासमये महापद्मकुलचेटि कुरु सर्वकर्माणि मे पद्मसिद्धि हूं ॥

ततो गणादयः सर्वे पद्मद्वारचतुष्टये।
समालेख्या यथावत्तु तेषां च हृदयार्थत ॥ इति ॥

तत्रैषां हृदयानि भवन्ति ।

ओं हयग्रीव महापद्माङ्कुशाकर्षय शीघ्रं सर्वपद्मकुलसमयान् पद्माङ्कुशधर हूं ज्जः ॥
ओं अमोघपद्मपाश क्रोधाकर्षय प्रवेशय महापशुपतियमवरुणकुबेरब्रह्मवेषधर पद्मकुल समयान् हूं हूं ॥
ओं पद्मस्फोट बन्ध सर्वपद्मकुलसमयान् शीघ्रं हूं वं ॥
ओं षड्मुख सनत्कुमारवेषधर पद्मघण्टयावेशय सर्वपद्मकुलसमयान् सर्वमुद्रां बन्धय सर्वसिद्धयो मे प्रयच्छ पद्मावेश अः अः अः अः अः ॥

Initiation into the maṇḍala

अथात्र सर्वजगद्विनयपद्ममण्डलविधिविस्तरो भवति ।

तत्रादित एव पद्माचार्यो वज्रपद्मसमयमुद्रां बध्वा यथावत्प्रविश्य, वज्रधातुमहामण्डलयोगेन कर्म कुर्यादिमैर्हृदयैः **ओं पद्मस्फोटाधितिष्ठ** अः ॥

ततस्तथैवाज्ञामाज्य, तथैव समयमुद्रया स्वयमभिषिच्य, पद्मविग्रहं गृह्य, स्वपद्मनामोच्चार्य, पद्माङ्कुशादिभिश्च कर्म कृत्वा, ततस्ताभिरेव धर्ममुद्राभिर्महासत्वां साधयेत् । ततस्तथैव सिद्धिरिति ॥

ततः पद्मशिष्यान् प्रवेशयेत् । तत्रादितः पद्मशिष्याय शपथहृदयं दद्यात् । "पद्मसत्वः स्वयन्तेऽद्य इति कर्तव्यम्" ।

ततो [आज्ञाप]यात् । "न कस्यचित्त्वयेदं गुह्यविधिविस्तरमाख्येयं; मा ते नरकपतनं भवेत्, विषमापरिहारेण च कालक्रिये" ति ॥

ततः समय[मुद्रां बन्धये]द् अनेन हृदयेन **ओं वज्रपद्मसमयस्त्वं** ॥

ततः श्वेतवस्त्रोत्तरीयः श्वेतरक्तकेन मुखं बध्वा प्रवेशयेदनेन हृदयेन **ओं पद्मसमय हूं** ॥

ततो यथावत्कर्म कृत्वा, पद्मविग्रहं पाणौ दातव्यं **ओं पद्महस्त वज्रधर्मतां पालय** ॥ तेन वक्तव्यं "कीदृशीमा वज्रधर्मते—" ति । ततो वक्तव्यं ।

यथा रक्तमिदं पद्मं गोत्रदोषैर्न लिप्यते।
भावयेत् सर्वशुद्धिं तु तथा पापैर्न लिप्यते॥

इयमत्र धर्मता ॥

Mudrā

ततः पद्मकुलमुद्राज्ञानं शिक्षयेत् ।

पद्मं तु हृदये लिख्य पद्मभावनया हृदि ।
पद्मश्रियं वशीकुर्यात् किं पुनः स्त्रीजनोऽवरः ॥ १ ॥
बुद्धबिम्बं ललाटे तु लिख्याभीक्ष्णं तु भावयेत् ।
तया भावनया शीघ्रमभिषेकमवाप्नुते ॥ २ ॥
बुद्धबिम्बं मुखे विध्वाजिह्वायां तु प्रभावयेत् ।
स्वयं सरस्वती देवी मुखे तिष्ठत्यभीक्ष्णशः ॥ ३ ॥

पद्ममुष्णीषमध्ये तु स्थापयित्वा समाहितः।
भावयन् पद्ममुष्णीषे खेगामी स वशन्नयेद्॥ इति॥ ४॥

तत्रैतानि हृदयानि भवन्ति।

पद्मश्रियं वशमानय होः॥
पद्माभिषेकं प्रयच्छ वम्॥
पद्मसरस्वती शोधय हूं॥
पद्मोर्ध्वगान् वशीकुरु ज्जः॥

इमानि पद्मकुलमुद्राज्ञानानि॥

कुड्ये वाप्यथ वाकाशे भावयन् पद्ममुत्तमं।
अनया सर्वसत्वानां वशीकरणमुत्तमम्॥ १॥
आकाशे वान्यदेशे वा भावयन् पद्ममुत्तमं।
यदा पश्येत् तदा गृह्णेद् रुच्यानदृश्यतां व्रजेत्॥ २॥
कुड्ये वाप्यथ वाकाशे विश्वपद्मं समाधयेत्।
पश्यं गृह्णेद्यथा तं तु विश्वरूपी तदा भवेत्॥ ३॥
आकाशे वान्यदेशे वा वज्रपद्मं तु भावयेत्।
तं तु गृह्णं क्षणाच्चैव पद्मविद्याधरो भवेत्॥ ४॥

तत्रैषां हृदयानि भवन्ति।

ओं सर्वजगद्वशिता ज्ञानपद्माविश अः॥
ओं ज्ञानपद्म तिष्ठादृश्यं कुरु वं॥
ओं समाधि विश्वपद्म तिष्ठ वैश्वरूप्यं दर्शय भगवन् ढः।
ओं समाधि वज्रपद्म तिष्ठोत्तिष्ठ शीघ्रं ह्रीः॥

लोकेश्वरं समालिख्य मण्डलादिषु सर्वतः।
पुरस्तस्य समाकर्षेत् हयग्रीवाग्र्यमुद्रया॥ १॥
लोकेश्वरं समालिख्य मण्डलादिषु तस्य वै।
अमोघपाशमुद्रया वशीकुर्याज्जगत्स तु॥ २॥
लोकेश्वरं समालिख्य मण्डलादिषु सर्वतः।
पुरस्तस्य बन्धनीयात् पद्मस्फोटाग्रमुद्रया॥ ३॥
लोकेश्वरं समालिख्य मण्डलादिषु तस्य वै।
पुरतः पद्मघण्टया सर्वावेशनमुत्तमम्॥ इति॥ ४॥

तत्रैषां हृदयानि भवन्ति।

ओं पदमाङ्कुशाकर्षय सर्वमहासत्वान् हूं जः॥
ओं अमोघपाश क्रोध हूं होः॥
ओं पद्मस्फोट वं॥
ओं पद्मघण्टावेशय सर्वं अः॥

चतुःपद्ममुखं सत्वं भावयेत्स्वयमात्मना ।
स्वमात्मानन्ततः सिद्धो बहुरूपी भवेत्क्षणात् ॥ १ ॥
भावयन् पद्मपद्मन्तु स्वमात्मानन्तथात्मना ।
वज्रधर्मसमाधिस्थः प्राप्नोति पद्ममक्षरं ॥ २ ॥
लोकेश्वरजटामध्ये भावयन् स्वयमात्मना ।
बुद्धबिम्बं स्वमात्मानममितायुसमो भवेत् ॥ ३ ॥
भावयन् स्वयम्[आत्मना विश्व]रूपसमाधिना ।
विश्वरूपसमाधिस्थो लोकेश्वरसमो भवेद् ॥ इति ॥ ४ ॥

तत्रैषां हृदयानि भवन्ति ।

पद्मविश्व ॥
धर्मकायपद्म ॥
बुद्धाभिषे[क ॥
लोकेश्व]र ॥

ततो महामण्डलसर्वमुद्राज्ञानं शिक्षयेत् ।
तत्र प्रवेशं तावन् महामुद्राज्ञानं भवति ।

चन्द्रमण्डलमध्यस्थां यथा लेख्यानुसारतः ।
पद्म[प्रति]ष्ठां सत्वान्स्वं भावयेत्स्वयमात्मने ॥ ति ॥

अथासां कर्म भवति ॥

बध्वा बुद्धमहामुद्राममितायुसमो भवेत् ।
वज्रपद्मं समाधाय लोकेश्वर[समो] भवेत् ॥ १ ॥
बुद्धाभिषेकां बध्वा वै सुगतैः सोऽभिषिच्यते ।
पद्मपद्मा समाधिं तु दद्याद् विश्वा सुविश्वतां ॥ २ ॥
वैश्वरूप्यं वैनेयांस्तु बुद्ध रत्नाभिषेकदा ।
पद्मसत्वि समाधिन्तु पद्मक्रोधेश्वरीं श्रियं ॥ ३ ॥
वज्रलोकेश्वरी सिद्धिमुत्तमां पद्मरागिणी ।
बुद्धेश्वरी तु बुद्धत्वं वज्रपद्मा सुसिद्धिदा ॥ ४ ॥
कामेश्वरी सुरागित्वं दद्यात्तुष्टिन्तु साधुता ।
भृकुटिः क्रोधशमनी पद्मसूर्या सुतेजदा ॥ ५ ॥
पद्मचन्द्रा महाकान्तिं दद्याद् हासा सुहासतां ।
तारया चोत्तरा सिद्धिः सौभाग्यं पद्मखड्गया ॥ ६ ॥
नीलकण्ठा महाकर्षा सिद्धि पण्डरवासिनी ।
पद्मनर्तेश्वरी सिद्धिमभया अभयन्ददा ॥ ७ ॥
प्रचण्डा दुष्टदमनी पद्ममुष्टिः सुसाधिका ।
लास्या रतिं धनं माला सर्वं गीता सुखं नृत्या ॥ ८ ॥
धूपा ह्लादं शुभं पुष्पादीपा दृष्टिं गन्धा सुगन्धतां ॥ ९ ॥

हयग्रीवा समा[कर्षणा]मोघा तु वशङ्करी।
पद्मस्फोटा महाबन्धा सर्वावेशा तु घण्टिके-॥ १०॥ ति॥

ततः पद्मकुलसमयमुद्राज्ञानं भवति।

वज्रबन्धं समाधाय समाङ्गुष्ठान्त्यसन्धानात्।
मुद्रेयं धर्मसमया बुद्धधर्मप्रदायिका॥ १॥

वज्रबन्धं समाधाय समाग्र्यानाममध्यमा।
बुद्धविद्योत्तमस्येयं मुद्रा बुद्धत्वदायिका॥ २॥

वज्रबन्धं समाधाय मध्यमा वज्रसंयुता।
वज्रविद्योत्तमस्येयं मुद्रा वज्रत्वदायिका॥ ३॥

सा एव मणिमध्या तु वज्ररत्नप्रदायिका।
मध्यकुड्मलयोगेन पद्मसिद्धिप्रदायिका॥ ४॥

वज्राञ्जलिन्तु सन्धाय वज्रकर्मकरी भवेत्।
धर्मवज्रां समाधाय समयः सिध्यते क्षणात्॥ ५॥

वज्रबन्धं समाग्रन्तु बुद्धसिद्धिप्रदायिका।
अतः परं प्रवक्ष्यामि सत्वमुद्रा विशेषतः॥ ६॥

वज्राञ्जलिं समाधाय सममध्योत्थिता तथा।
कनिष्ठाङ्गुष्ठविकचा विश्वपद्मेति कीर्तिता॥ ७॥

सा एवाङ्गुष्ठपर्यङ्का कुञ्चिताग्राग्र्यविग्रहा।
मध्यवज्रजटा मूर्ध्नि जटाबुद्धेति कीर्तिता॥ ८॥

वज्रबन्धं दृढीकृत्य समाङ्गुष्ठमधस्तनं।
तर्जनीद्वयसंकोचा समुद्गता समाधितः॥ ९॥

समाञ्जलिं समाधाय तर्जनी वज्रपीडिता।
विकसिताङ्गुष्ठमुखयोर्मुद्रामोघेश्वरस्य तु॥ १०॥

वज्रबन्धं दृढीकृत्य समुत्तानं तु बन्धयेत्।
समाङ्गुष्ठकृता पद्मे पद्मबुद्धेति कीर्तिता॥ ११॥

अङ्गुष्ठवज्राग्राभ्यामङ्कुशं खड्गमेव च।
अन्त्यद्वयविकासा च मध्यानामाग्रकुड्मला॥ १२॥

समाञ्जलिं समाधाय वलिताङ्गुष्ठकुञ्चिता।
तर्जन्या तर्जनीङ्गृह्याकर्षयेत् पद्मवाणया॥ १३॥

समाञ्जलिन्तथोत्तानां बन्धयेत्साधुमुद्रया।
साधुकारां [प्रददाति] साधुपद्मेति कीर्तिता॥ १४॥

समाञ्जलिं दृढीकृत्य कुञ्चिताग्र्या मुखस्थिता।
कनिष्ठाभ्यां तु विकचा पद्मभृकुटिरुच्यते॥ १५॥

वज्रबन्धं दृढीकृत्य हृद[ये तु] प्रसारयेत्।
पद्मसूर्येति विख्याता सर्वाङ्गुलिसुमण्डला॥ १६॥

समाञ्जलिं दृढीकृत्य तर्जनीभ्यां मणीकृता।
पद्मरत्नध्वजाग्री तु मूर्ध्नि बाहुप्रसारिता॥ १७॥

वज्रबन्धं शिरोमूर्ध्नि प्रसार्याग्रमुखैः सह ।
स्वमुखेनाट्टहासेन एकादशमुखी भवेत् ।। १८ ।।

समाधिपद्मां सन्धाय समाङ्गुष्ठसमुत्थिता ।
पद्मतारस्य मुद्रेमं सर्वसिद्धिप्रदायिका ।। १९ ।।

पद्मतारस्य मुद्रा तु पद्म योगाग्र्यबन्धनात् ।
पद्मखड्गस्य मुद्रेयं खड्गाकारनियोजनात् ।। २० ।।

कुड्मलान्त्यमहापद्मास्तच्चाङ्गुष्ठगदा तथा ।
कुञ्चिताग्र्यमहाशङ्खा वज्रबन्धेन चक्रिता ।। २१ ।।

वज्राञ्जलिं दृढीकृत्य दक्षिणौंकारवेष्टिता ।
वामाग्र्याङ्गुष्ठजापा तु सर्वाग्रविकचाम्बुजा ।। २२ ।।

वज्राङ्गुलिं समाधाय वामदक्षिणतस्तथा ।
नृत्यं सलीलवलिता मूर्ध्निस्था नृत्यपद्मिनी ।। २३ ।।

वज्राञ्जलिं दृढीकृत्य सर्वाग्रकवचा तथा ।
परिवर्त्य तु पद्मेन हृदि स्थाप्य दृढंकरी ।। २४ ।।

वज्राञ्जलिं दृढीकृत्य गुह्ययक्षप्रयोगतः ।
प्रसारिताञ्जलिपुटा मुखस्था पद्मयक्षिणी ।। २५ ।।

वज्रमुष्टिं द्विधीकृत्य कुञ्चयित्वा तु मध्यमे ।
स्वाङ्गुष्ठपृष्ठनिहिते पद्ममुष्टिरुदाहृता ।। २६ ।।

वज्रधातुप्रयोगेण वज्राञ्जलिसमुत्थिता ।
सर्वपूजाग्र्यदेवीनां समयाग्र्यस्तु बन्धयेत् ।। २७ ।।

वज्रबन्धं दृढीकृत्य सन्धयेत्तर्जनीद्वयं ।
संकोचात्पुरतः सन्धेत् हयग्रीवेति कीर्तिता ।। २८ ।।

पद्माञ्जलिं समाधाय तर्जनीग्रन्थिबन्धना ।
अमोघपाशमुद्रेयं तर्जन्यङ्गुष्ठशङ्खला ।। २९ ।।

पद्माञ्जलिं समाधाय वज्रावेशप्रयोगतः ।
अङ्गुष्ठाभ्यां तु संपीड्य कनिष्ठानामिकान्तराव् ।। ३० ।। इति ।।

अथ पद्मकुलधर्ममुद्राज्ञानं भवति ।

ह्रीं । ग्रीं । प्रीं । हीं । श्रीं । सीं । दीं । हीः ।
गीं । धीं । क्रीं । वीं । विं । रीं । ष्ट्रीं । अः ।

पद्ममुष्टिं द्विधीकृत्य कर्ममुद्राः समाधयेद् ।। इति ।।

सर्वतथागतधर्मसमयान् महाकल्पराजात् सकलजगद्विनयमहामण्डलविधिविस्तरः समाप्तः ।।

CHAPTER 16

PADMA-GUHYA-MUDRĀ-MAṆḌALA-VIDHI-VISTARA

Emanation of deities from samādhi

अथ भगवान् पुनरपि सर्वतथागतधर्मधारणीसमयसंभवमुद्राधिष्ठानपद्मन्नाम समाधिं समापद्येमां स्वविद्योत्तमामभाषत् **ओं सर्वतथागतधर्मसमये हूं ॥**

अथ वज्रपाणिर्महाबोधिसत्वः इमां स्वकुलसंभवां विद्योत्तमामभाषत् **ओं वज्रसमये हूं ॥**

अथ वज्रगर्भो बोधिसत्व महासत्व इमां स्वविद्योत्तमामभाषत् **ओं मणिरत्नसमये हूं ॥**

अथ वज्रनेत्रो बोधिसत्व इमां स्वविद्योत्तमामभाषत् **ओं पद्मसमये हूं ॥**

अथ वज्रविश्वो बोधिसत्व इमां स्वविद्योत्तमामभाषत् **ओं कर्मसमये हूं ॥**

अथ भगवानार्यावलोकितेश्वरो बोधिसत्व इदं स्वकुलसमयमुद्रामण्डलमभाषत् ॥

अथातः संप्रवक्ष्यामि मुद्रामण्ड[लानुत्तरं ।]
वज्रधातुप्रतीकाशं पद्मगुह्यमिति स्मृतं ॥ १ ॥
महामण्डलयोगेन सूत्रयेत्सर्वमण्डलं ।
तस्य मध्ये सुपद्मे वै वज्रधात्वीश्वरीं लिखेत् ॥ २ ॥
[तस्य] सर्वपार्श्वेषु समयाग्र्यो यथोपरि ।
धर्मवज्र्यादयो लेख्याः स्वविद्याभिः समन्विताः ॥ ३ ॥

तत्रासां मुद्रा भवन्ति ।

ओं सर्व-तथागत धर्मेश्वरि हूं ॥
ओं धर्म समये वज्र-पद्मिनि हूं ।
ओं बुद्धाभिषेक रत्न समये हूं ॥
ओं तारा समये हूं ॥
ओं विश्वमुखे हूं ॥

वज्रवेगेन निष्क्रम्य विश्वरूपाग्र्यमण्डलं ।
तत्र मध्ये लिखेत्पद्मं पद्मैस्तु परिवारितं ॥ १ ॥
तस्य पार्श्वेषु सर्वेषु पद्ममुद्रा प्रतिष्ठिताः ।
पद्मचिह्नः समालेख्याः स्वमुद्राः सुगतात्मनां ॥ २ ॥

तत्रासां मुद्रा भवन्ति ।

ह्रीः ॥
ओं पद्मतथागते ॥
ओं समन्तभद्र पद्मवज्राङ्कुशकोशधारिणि हूं ॥

ओं पद्मरति ॥
ओं पद्मतुष्टि ॥

वज्रवेगेन चाक्रम्य द्वितीये मण्डले तथा।
बुद्धाभिषेका समालेख्या जटामध्ये महाम्बुजं ॥ १ ॥
तस्य पार्श्वेषु सर्वेषु यथावदनुपूर्वशः।
पद्मचिह्नसमोपेताः समयाग्र्यो निवेशयेत् ॥ २ ॥

तत्रासां हृदयानि भवन्ति।

श्रीः ॥
ओं भृकुटि तटि वेतटि पद्मे हूं ॥
ओं पद्मज्वाले हूं ॥
ओं सोमिनि पद्मे हूं ॥
ओं पद्महासिनि एकादशवक्त्रे दिरि दिरि इट्टे वट्टे चले प्रचले कुसुमधरे इलि प्रविश सिद्धि मे प्रयच्छ हूं ॥

वज्रवेगेन चाक्रम्य तृतीयं मण्डलं तथा।
तत्र मध्ये सुपद्मे तु पद्ममुद्रां निवेशयेत् ॥ १ ॥
तथैव सर्वपार्श्वेषु यथावदनुपूर्वशः।
पद्मचिह्नसमोपेताः पद्मसंस्थास्तु संलिखेत् ॥ २ ॥

तत्रासां मुद्रा भवन्ति।

धीः ॥
ओं तारे तुत्तारे हूं ॥
ओं धी हूं ॥
ओं पद्मचक्रगदाधारिणि नीलकण्ठे सिध्य सिध्य हुं ॥
ओं पण्डरवासिनि पद्मसंभवे वद वद हूं ॥

वज्रवेगेन चाक्रम्य चतुष्ठे मण्डलोत्तमे।
पद्ममध्ये लिखेत्पद्मं ज्वालमालाकुलप्रभं ॥ १ ॥
तस्य पार्श्वेषु सर्वेषु यथावदनुपूर्वशः।
पद्मचिह्नाः समालेख्याः पद्ममध्यप्रतिष्ठिताः ॥ २ ॥

तत्रासां मुद्रा भवन्ति।

स्त्रीः ॥
ओं पद्मनर्तेश्वरि पूजय सर्वतथागतान् नट्ट नट्ट हूं।
ओं अभये पद्मकवचबन्धे रक्ष मां हूं हं ॥
ओं महाप्रचण्डि पद्मयक्षिणि विश्वरूपधारिणि भीषापय सर्वदुष्टान् खाद खाद हुं फट् ॥
ओं पद्ममुष्टि अः मुः ॥

वज्रवेगेन चाक्रम्य बुद्धपूजाः समालिखेत्।
पद्माङ्कुश्यादयो मुद्राः पद्मचिह्नः समासत ॥ इति ॥

अथासां मुद्रा भवन्ति ।

ओं पद्मरतिपूजे होः ॥
ओं पद्माभिषेकपूजे रट् ॥
ओं पद्मगीतपूजे गीः ॥
ओं पद्मनृत्यपूजे कृट् ॥
ओं धूपपद्मिनि हुं ॥
ओं पद्मपुष्पि हूं ॥
ओं पद्मकुलसुन्दरि धर्मालोके पूजय हूं ॥
ओं पद्मगन्धे हूं ॥

पूजादेव्यः ।

ओं पद्माङ्कुश्याकर्षय महापद्मकुलान् हयग्रीवसमये हुं जः ॥
ओं अमोघपाशक्रोधसमये प्रविश प्रवेशय सर्वसमयान् हूं ॥
ओं पद्मशङ्खले वं ॥
ओं पद्मघण्टाधारि शीघ्रमावेशय समयान् षण्मुखि अः ॥

अथात्र मुद्रामण्डले आकर्षणादिविधिविस्तरं कृत्वा, पद्मशिष्यान् यथावत् [प्रवेश्य,] एवंवदेत् "न त्वया कस्यचिद् वक्तव्यं यदत्र गुह्यं, मा ते नरकपतनं भवेत्, दुःखानि चात्रजन्मनी—" ति ।

ततः समावेश्यैवं वदेत् । "[ति चक्षुःपये] कीदृशोऽवभासः ? तद्यथा वदति तथा सिद्धिर्" इति । "तद्यदि श्वेतालोकं पश्येत् तस्योत्तमसिद्धिज्ञानं शिक्षयेत् । अथ पीतं पश्येत् तस्यार्थोत्पत्तिज्ञानं शिक्षयेत् । अथ रक्तं पश्येत् ततोऽनुरागणज्ञानं शिक्षयेत् । अथ कृष्णं पश्येत् ततोऽभिचारकज्ञानं शिक्षयेत् । अथ विचित्रं पश्येत् ततः सर्वसिद्धिज्ञानं शिक्षयेद्" इति ज्ञात्वा, यथावन्मुखबन्धं मुक्त्वा, यथाभाजनतया ज्ञानान्युत्पादयेत् । मुद्राज्ञानं च शिक्षयेत् ।

एवं वज्रधात्वादिष्वपि सर्वमण्डलेषु यथाभाजनतया मुद्राज्ञानानि शिक्षयेदियं परीक्षा ॥

Four Jñāna

अथोत्तमसिद्धिनिष्पत्तिज्ञानं भवति ।

लोकेश्वरमहासत्वं विश्वरूपं स्वमात्मना ।
भावयंस्तु महामुद्रामग्र्यां सिद्धिमवाप्नुयात् ॥ १ ॥
बुद्धाभिषेकसमयां दृढीकृत्वा समाहितः ।
भावयंस्तु स्वमात्मानमग्र्यां सिद्धिमवाप्नुते ॥ २ ॥
पद्मपद्ममहासत्वं भावयेत् स्वयमात्मना ।
आत्मानमुत्तमां सिद्धि प्राप्नोति सुसमाहितः ॥ ३ ॥
अमोघेश्वरमयीङ्कर्ममुद्रां स्वयम्भुवः ।
साधयन् विधिवच्छीघ्रमग्र्यां सिद्धिमवाप्नुयाद् ॥ ४ ॥ इति ॥

अथैषां हृदयानि भवन्ति ।

ओं पद्मसत्वोऽहं सिध्य होः ॥
ओं बुद्धाभिषेकोऽहं सिध्य मां ॥

ओं धर्मसमाधिरहं सिध्य होः ॥
ओं अमोघेश्वरोऽहं सिध्य मां ॥

ततोऽर्थनिष्पत्तिज्ञानं भवति ।

हिरण्यं तु मुखे विध्वा भावयेत्स्वयमात्मना ।
विश्वेश्वरमहामुद्रामेकं भूयात्सहस्रशः ॥ १ ॥
सुवर्णतोलकं गृह्य समयाख्या महादृढं ।
भाव[यन् स्व]यमात्मानमेको भूयात्सहस्रशः ॥ २ ॥
मुक्ताफलं मुखे विध्वा भावयेत्स्वयमात्मना ।
लोकेश्वरं स्वमात्मानमेको भूयात्सहस्रशः ॥ ३ ॥
सर्वरत्नानि संगृह्य पाणिभ्यां कर्ममुद्रया ।
भावयन् स्वयमात्मानमेको भूयात्सहस्रश ॥ इति ॥ ४ ॥

तत्रैषां हृदयानि भवन्ति ।

ओं पद्महिरण्यप्रद हुं ज्जः ॥
ओं पद्मसुवर्णप्रद हुं ज्जः ॥
ओं पद्ममुक्ताप्रद हुं ज्जः ॥
ओं पद्मसर्वरत्नप्रद हुं ज्जः ॥

अथानुरागणज्ञानं भवति ।

विश्वेश्वरमहामुद्रां भावयन् स्वयमात्मना ।
पद्मं गृह्य पुरः स्थाति यस्य सोऽस्यानुरज्यति ॥ १ ॥
रक्तपद्मं दृढं गृह्य महासमयमुद्रया ।
भावयन् स्वयमात्मानं रागयेत्सर्वयोषितः ॥ २ ॥
भावयेत्स्वयमात्मानं पद्मं गृह्य यथा तथा ।
निरीक्षेद् वज्रदृष्टया वै सर्वलोकं स रागयेत् ॥ ३ ॥
कर्ममुद्राप्रयोगेण पद्मं गृह्य यथाविधि ।
कराभ्यां भ्रामयन् तन्तु रागयेत् सर्वयोषित ॥ इति ॥ ४ ॥

तत्रैषां हृदयानि भवन्ति ।

ओं विश्वेश्वर महापद्म होः ॥
ओं समयपद्म होः ॥
ओं योगपद्म होः ॥
ओं कर्मपद्म होः ॥

अथाभिचारज्ञानं भवति ।

विश्वेश्वरमहामुद्रां भावयन् आत्मना ।
च्छिन्देद्यस्य पुरःपद्मं तस्य मृत्युः क्षणाद्भवेत् ॥ १ ॥
पद्मं गृह्य दृढं सम्यक् समयाख्या तयैव हि ।
स्फोटयेत् तन्तु सुदृढं यस्य नाम्ना स नश्यति ॥ २ ॥
समाधिमुद्रां सन्धाय पद्मं गृह्य यथा तथा ।
यस्य नाम्ना तु पद्मं वै च्छिन्देत्स तु विनश्यति ॥ ३ ॥

कर्ममुद्राप्रयोगेण पद्मं गृह्य यथाविधि।
स्फोटयेद्यस्य संक्रुद्धः स्फुटेत्तस्य तु जीवितम् ॥ इति ॥ ४ ॥

तत्रैषां हृदयानि भवन्ति।

ओं महापद्म च्छेद मारय हो: फट् ॥
ओं समयपद्म स्फोट नाशय रट् फट् ॥
ओं धर्मपद्म च्छेद विनाशय धूट् फट् ॥
ओं कर्मपद्म स्फोट स्फोटय जीवितमस्य कुट् फट् ॥

Mudrā

ततो धर्मसमयरहस्यमुद्राज्ञानं भवति।

पद्मं तु योषितां चिन्त्य वज्रन्तस्योपरि स्वयं।
रामयन् वज्रपद्माख्या समापत्त्या तु सिध्यति ॥ १ ॥
पद्मं तु योषितां चिन्त्य बुद्धन्तस्योपरि स्वयं।
रामयन् बुद्धमुकुटां भावयन् सोऽस्य सिध्यति ॥ २ ॥
पद्मं तु योषितां चिन्त्य पद्मं तस्योपरि स्वयं।
रामयन् पद्मपद्माग्री शुद्धां सिद्धिमवाप्नुते ॥ ३ ॥
पद्मं तु योषितां चिन्त्य विश्वन्तस्योपरि स्वयं।
रामयन् विश्वपद्माग्री विश्वां सिद्धिमवाप्नुयाद् ॥ इति ॥ ४ ॥

तत्रैषां हृदयानि भवन्ति।

ओं वज्रपद्म संयोग साधय ह्रीः ॥
ओं बुद्धमुकुट संयोग साधय श्रीः ॥
ओं पद्म-पद्म संयोग साधय धीः ॥
ओं विश्वपद्म संयोग साधय स्त्रीः ॥

ततो यथावत् पद्मकुलगुह्यमहामुद्राज्ञानं भवति।

कुड्मलाञ्जलिरग्रस्य वज्रक्रोधाङ्कुली द्विके।
द्व्यग्रा मणिस्तथा पद्मं वज्रबन्धन्तथैव ॥ १ ॥
वज्रबन्धां समानीय सममध्याङ्कुरो स्थितो।
तर्जन्यानामसंकोचा मुद्रा शाक्यमुनेर्दृढा ॥ २ ॥
धर्मवज्रा हृदिस्था तु परिवर्त्य ललाटगा।
समाधियोगा चोत्सङ्गे परिवर्त्य तु मूर्धगा ॥ ३ ॥
वज्रधात्वीश्वरीम्बध्वा चैत्यं पद्मप्रयोगतः।
संधयेन्मध्यमाभ्यां तु बुद्धपद्मेति कीर्तिता ॥ ४ ॥
सा एवाङ्गुष्ठवज्रा तु द्व्यग्रखड्गाङ्कुशी तथा।
पद्वज्रधरस्यैता गुह्यमुद्राः प्रकीर्तिताः ॥ ५ ॥
सा एवाङ्गुष्ठमुक्ता तु तर्जन्या तर्जनीग्रहा।
वलिता सुरतिः प्रोक्ता साधुकार्या तथैव च ॥ ६ ॥

वज्रबन्धं दृढीकृत्य समाङ्गुष्ठप्रवेशिता।
कुञ्चिताग्रमुखस्था तु भृकुट्यां मध्यपद्मिनी ॥ ७ ॥
सा एव हृदये चैव सूर्यमण्डलदर्शिका।
ध्वजबन्धेन सा एव शिरःपृष्ठे प्रसारिता ॥ ८ ॥
वज्रबन्धं दृढीकृत्य कुञ्चिताग्र्याग्रविग्रहा।
तथैव पद्मखड्गा तु पद्मयोगाग्र्यसन्धनात् ॥ ९ ॥
वज्रबन्धं दृढीकृत्य वामाङ्गुष्ठप्रवेशनात्।
शङ्खमङ्गुष्ठदण्डोत्थाङ्गुल्यग्रोत्थान्त्यपद्मिनी ॥ १० ॥
सा एव सर्वसंकोचा कनिष्ठा पद्मसंयुता।
अक्षमालाग्रगणनी दक्षिणाङ्गुष्ठयोगतः ॥ ११ ॥
वज्रबन्धं दृढीकृत्य कनिष्ठा पद्मसंयुता।
समाग्र्या पद्मनेत्रा तु प्रनर्तन् परिवर्तिता ॥ १२ ॥
वज्रबन्धं दृढीकृत्य कनिष्ठा पद्मसंयुता।
कुञ्चिता[ग्र्यं पीडयन्तु] द्वयङ्गुष्ठकवचीकृते—॥ ति ॥ १३ ॥
सा एवाङ्गुष्ठदंष्ट्रा तु समाङ्गुष्ठप्रवेशिता।
अतः परं प्रवक्ष्यामि समयाग्र्यो निरुत्तराः ॥ १४ ॥
वज्रबन्धन्तले कृत्वा तर्जनीपद्मसन्धिता।
अङ्गुष्ठा बन्धपर्यङ्का गुह्यविश्वेश्वरी स्मृता ॥ १५ ॥
तथैव वज्रबन्धेन कनिष्ठा मध्यसन्धिता।
अङ्गुष्ठमुखयोर्वज्रन् पट्टमध्ये तथागतं ॥ १६ ॥
तथैव वज्रबन्धे तु पद्ममङ्गुष्ठसन्धितं।
कृत्वा तु मुखतोद्धान्तं स्थितोत्सङ्गे समाधिना ॥ १७ ॥
तथैव वज्रबन्धे तु मुखतः समसन्धिता।
सर्वाङ्गुल्या दृढीकृत्य तर्जनी वज्रसंयुता ॥ १८ ॥
तथैव वज्रबन्धे तु तर्जनी पद्मसन्धिता।
अङ्गुष्ठा बन्धपर्यङ्का मध्यसंकोचविग्रहा ॥ १९ ॥
तथैव वज्रबन्धे तु वज्रमङ्गुष्ठसन्धिता।
खड्गाङ्कुशी तथाग्राभ्यां कनिष्ठा पद्मसंयुता ॥ २० ॥
तथैव वलितां कृत्वा तर्जन्यङ्गुष्ठसंग्रहां।
उत्थितान् तर्जनीं वामां कर्षयेत् सुदृढन्तथा ॥ २१ ॥
सा एव तु समीकृत्वा तर्जन्यङ्गुष्ठयोगतः।
साधुकारप्रदात्रो तु पद्मतुष्टेर्महात्मनः ॥ २२ ॥
तथैव वज्रबन्धं तु सर्वाग्रमुखसन्धितं।
द्वयङ्गुष्ठमुखपीडन्तु समाग्र्या सन्निवेशितं ॥ २३ ॥
सा एव हृदि सूर्या तु मूर्ध्नि पद्मध्वजीकृता।
परिवर्त्य च हासा तु स्थिता पद्माट्टहासिनी ॥ २४ ॥
वज्रबन्धन्तले कृत्वा धर्मवज्राग्रयोगतः।
कनिष्ठाङ्गुष्ठसन्धी तु तारायाः समयो ह्ययं ॥ २५ ॥

तथैव वज्रबन्धे तु ज्येष्ठाभ्यां खड्गपद्मिनी।
तलचक्रा तथैवेह जापदात्री तथैव च ॥ २६ ॥
तथैव वज्रबन्धा तु खटकद्वयमोक्षिता।
पुनश्च हृदये बन्धे गुह्यरक्षेति कीर्तिता ॥ २७ ॥
तथैव वज्रबन्धे तु कनिष्ठा पद्मसंयुता।
तर्जनी दृढसंकोचा विकचाङ्गुष्ठदंष्ट्रिणी ॥ २८ ॥
सा एव मुष्टियोगेन द्वयङ्गुष्ठमुखपीडिता।
पद्मगुह्यमहामुष्टि समयाग्री प्रकीर्तिता ॥ २९ ॥
सर्वासामेव चान्यासां पद्मलास्यादिसंज्ञिनां।
वज्रबन्धं तले कृत्वाबन्धस्तादृश एव ही—॥ ३० ॥ ति ॥

ततः पद्मकुलगुह्यधर्ममुद्रा भवन्ति।

ह्राः। ग्रा। प्रा। हा। स्त्र। सा। दः। हः।
गा। धा। क्रा। वा। व। रा। ष्ट्र। मः।

कर्ममुद्राः समासेन मुष्टिरेव द्विधीकृते— ॥ ति ॥

सर्वतथागतधर्मसमयान् महाकल्पराजात् पद्मगुह्यमुद्रामण्डलविधिविस्तरः परिसमाप्तः ॥

CHAPTER 17

JÑĀNA-MAṆḌALA-VIDHI-VISTARA

अथ भगवान् पुनरपि सर्वतथागतधर्मसमयज्ञानसमयसंभवाधिष्ठानन् पद्मन्नाम समाधिं समापद्यमां स्वविद्योत्तमामभाषत् **ओं धर्मसमाधिज्ञानतथागत हूं ।।**

अथ वज्रपाणिर्महाबोधिसत्व इमं स्वकुलधर्मसंभवं स्वविद्योत्तममभाषत् **ओं वज्रधर्म हूं ।।**

अथवज्रगर्भो बोधिसत्वो महासत्व इमं स्वविद्योत्तममभाषत् **ओं रत्नधर्म हूं ।**

अथ वज्रनेत्रो बोधिसत्वो महासत्व इमं स्वविद्योत्तममभाषत् **ओं धर्मधर्म हूं ।।**

अथ वज्रविश्वो बोधिसत्वो महासत्व इमं स्वविद्योत्तममभाषत् **ओं कर्मधर्म हूं ।।**

Delineation of the maṇḍala

अथार्यावलोकितेश्वरो बोधिसत्वो महासत्व इदं स्वधर्ममण्डलमभाषत् ।

अथातः संप्रवक्ष्यामि ज्ञानमण्डलमुत्तमं ।
वज्रधातुप्रतीकाशं धर्मज्ञानमिति स्मृतं ।। १ ।।
महामण्डलयोगेन सूत्रयेत् सर्वमण्डलं ।
तस्य मध्ये समालेख्यं ज्ञानवज्रतथागतं ।। २ ।।
तस्य पार्श्वेषु सर्वेषु महासत्वा यथाविधि ।
विश्वेश्वरादयो लेख्याः समापन्नाः समाहिता ।। ३ ।। इति ।।

तत्रैषां हृदयानि भवन्ति ।

ओं ज्ञानबुद्ध हूं ।। १ ।।
ओं ज्ञानविश्वेश्वर हूं ।। २ ।।
ओं ज्ञानबुद्धमुकुट हूं ।। ३ ।।
ओं ज्ञानधर्मेश्वर हूं ।। ४ ।।
ओं ज्ञानामोघेश्वर हूं ।। ५ ।।
ओं ज्ञानपद्मबुद्ध हूं ।। ६ ।।
ओं ज्ञानपद्मराजधर हूं ।। ७ ।।
ओं ज्ञानपद्ममार हूं ।। ८ ।।
ओं ज्ञानपद्मतुष्टि हूं ।। ९ ।।
ओं ज्ञानपद्मभृकुटि हूं ।। १० ।।
ओं ज्ञानपद्मसूर्य हूं ।। ११ ।।
ओं ज्ञानपद्मचन्द्र हूं ।। १२ ।।
ओं ज्ञानपद्महास हूं ।। १३ ।।

ओं ज्ञानपद्मतार हूं ॥ १४ ॥
ओं ज्ञानपद्मकुमार हूं ॥ १५ ॥
ओं ज्ञानपद्मनारायण हूं ॥ १६ ॥
ओं ज्ञानपद्मभाष हूं ॥ १७ ॥
ओं ज्ञानपद्मनृत्येश्वर हूं ॥ १८ ॥
ओं ज्ञानपद्मरक्ष हूं ॥ १९ ॥
ओं ज्ञानपद्मयक्ष हूं ॥ २० ॥
ओं ज्ञानपद्ममुष्टि हूं ॥ २१ ॥
ओं ज्ञानपद्मलास्ये हूं ॥ २२ ॥
ओं ज्ञानपद्ममाले हूं ॥ २३ ॥
ओं ज्ञानपद्मगीते हूं ॥ २४ ॥
ओं ज्ञानपद्मनृत्ये हूं ॥ २५ ॥
ओं पद्मज्ञानधूपे हूं ॥ २६ ॥
ओं पद्मज्ञानपुष्पे हूं ॥ २७ ॥
ओं पद्मज्ञानदीपे हूं ॥ २८ ॥
ओं पद्मज्ञानगन्धे हूं ॥ २९ ॥
ओं पद्मज्ञानाङ्कुश हूं ॥ ३० ॥
ओं पद्मज्ञानामोघपाश हूं ॥ ३१ ॥
ओं पद्मज्ञानस्फोट हूं ॥ ३२ ॥
ओं पद्मज्ञानावेश हूं ॥ ३३ ॥

Initiation into the maṇḍala

अथात्र पद्मधर्ममण्डले आकर्षणादिविधिविस्तरंकृत्वा, यथावत् प्रवेश्यैवं वदेत् "न त्वयान्यस्य वक्तव्यं; मा ते नरकं पतनं भवेत्, दुःखानि वे—" ति।

Jñāna

ततोऽस्य ज्ञानान्युत्पादयेत्।

लोकेश्वरसमापत्त्या हृदि पद्मं तु भावयेत्।
प्राप्तपद्मसमाधिस्तु शीघ्रमुत्पतति क्षणात् ॥ १ ॥

लोकेश्वरसमापत्त्या ललाटे पद्मभावनात्।
अभ्यसन् सुदृढीभूतः खेगामी भवते क्षणात् ॥ २ ॥

जिह्वायां भावयन् पद्मं लोकेश्वरसमाधिना।
संसिद्धो भवते शीघ्रमाकाशेन स गच्छति ॥ ३ ॥

भावयेत्पद्ममुष्णीषे लोकेश्वरसमाधिना।
संसिद्धो भवते शीघ्रमूर्ध्वमुत्पतति क्षणात् ॥ ४ ॥

तत्रैषां हृदयानि भवन्ति।

ओं पद्मज्ञानहृदयाविश ॥
ओं पद्मज्ञानाभिषेकाविश ॥
ओं पद्मज्ञानविद्योत्तमाविश ॥
ओं पद्मज्ञानोष्णीषाविश ॥

आकाशे वान्यदेशे वा पद्मबिम्बं तु भावयेत् ।
अनेन विधिना सिद्धो अदृश्यो भवति क्षणात् ॥ १ ॥
आकाशे वान्यदेशे वा पद्मबिम्बं तु भावयेत् ।
तत्रारूढः स्वमात्मानं भावयन्नदृश्यो भवेत् ॥ २ ॥
आकाशे वान्यदेशे वा पद्मबिम्बं तु भावयेत् ।
यदा पश्येत्तदा गृह्णाच्छीघ्रम् [अदृश्यो भवति ॥] ३ ॥
आकाशे वान्यदेशे वा पद्मबिम्बं तु भावयेत् ।
दृष्ट्वा तु भुक्ष्वा तत्पद्ममदृश्यो भवति क्षणाद् ॥ इति ॥ ४ ॥

तत्रैषां हृदयानि भवन्ति ।

ओं पद्माकाश ॥
ओं पद्मरथ ॥
ओं पद्मज्ञान गृह्ण ॥
ओं पद्मरसायन ॥

विचित्रवर्णसंस्थानं पद्मबिम्बं तु पाणिना ।
गृह्य बध्वा महामुद्रां सर्वरूपधरो भवेत् ॥ १ ॥
विचित्रवर्णसंस्थानं पद्मबिम्बं तु लेखयेत् ।
तत्र भावयमानस्तु बहुरूपधरो भवेत् ॥ २ ॥
विचित्रवर्णसंस्थानं पद्मबिम्बं [तु भा]वयेत् ।
आकाशे वान्यदेशे वा च्छन्दरूपी भविष्यति ॥ ३ ॥
विचित्रवर्णसंस्थानं पद्मबिम्बं घटापयेत् ।
तत्रारूढस्तु खेगामी [कामरूपी भवेद्ध्रुवम् ॥ इति ॥ ४ ॥

तत्रैषां हृदयानि भवन्ति ।

ओं पद्मधर विश्वरूपप्रवर्तकाविश ॥
ओं विश्वपद्म प्रवर्तय मां ॥
ओं समाधिविश्वपद्माविश ॥
ओं विश्वपद्मासनोत्क्षिपाकाशं विश्वरूपमधितिष्ठ मां ॥

बध्वा चैकवरां सम्यक् महामुद्रां समाधितः ।
पद्मं गृह्य प्रदातव्यं वशी[करोऽवश्यं भवेत्] ॥ १ ॥
बध्वा चैकवरां सम्यग्[मुद्रां] समयसंज्ञितां ।
तया गृह्य तु वै पद्मं दद्याद् वश्यकरो भवेत् ॥ २ ॥

बध्वा चकतमां मुद्रां समाधिविहितां शुभां।
ज्ञानपद्मं ददेद्यस्य सोऽस्य शीघं वशीभवेत् ।। ३ ।।

बध्वा चैकतमां मुद्रां कर्माख्यां समयान्वितः ।
यस्य दद्यात् [स सुवशीः] पद्मदानात्क्षणाद् भवेद् ।। इति ।। ४ ।।

तत्रैषां हृदयानि भवन्ति ।।

ओं महापद्म होः ।।
ओं समयपद्म होः ।।
ओं ज्ञानपद्म होः ।।
ओं कर्मपद्म होः ।।

Mudrā

ततो ज्ञानमण्डलमहामुद्राज्ञानं शिक्षयेत् ।

धर्ममण्डलयोगेन महामुद्रास्तु साधयेत् ।
अतः परं संप्रवक्ष्यामि समयाग्र्यः प्रसाधयेत् ।।

धर्ममण्डलयोगेन पद्मपद्मं तु संस्थपेत् ।
धर्ममुष्टिं द्विधीकृत्य कर्ममुद्रा द्विधीकृता ।। इति ।।

सर्वतथागतधर्मसमयान्महाकल्पराजाज्ज्ञानमण्डलविधिविस्तरः परिसमाप्तः ।।

CHAPTER 18a

KARMA-MAṆḌALA-VIDHI-VISTARA

अथ भगवान् पुनरपि सर्वतथागतधर्मकर्मसमयसंभवाधिष्ठानपद्मं नाम समाधिं समापद्येमां स्वविद्योत्तमाम-भाषत् **ओं सर्वतथागतकर्माग्र हूं ॥**

अथ वज्रपाणिरिमां स्वकुलकर्मसंभवां स्वविद्योत्तमामभाषत् **ओं हूं धीः ॥**

अथ वज्रगर्भो बोधिसत्व इमां स्वविद्योत्तमामभाषत् **ओं रत्नकर्मसमये हूं ॥**

अथ वज्रनेत्रो बोधिसत्व इमां स्वविद्योत्तमामभाषत् **ओं पद्मकर्मि हूं ॥**

अथ वज्रविश्वो बोधिसत्व इमां स्वविद्योत्तमामभाषत् **ओं विश्वकर्मि हूं ॥**

अथार्यावलोकितेश्वरो बोधिसत्वो महासत्व इदं स्वकर्ममण्डलमभाषत् ।

अथातः संप्रवक्ष्यामि कर्ममण्डलमुत्तमं ।
वज्रधातुप्रतीकाशं पद्मकर्ममिति [स्मृतं ॥] १ ॥
महामण्डलयोगेन सूत्रयेत्सर्वमण्डलं ।
बुद्धस्य सर्वतः सर्वाः पद्मचिह्नधरा लिखेद् ॥ इति ॥ २ ॥

तत्रासां विद्याहृदयानि भवन्ति ।

ओं पद्मभूरिणि हुं ॥ १ ॥
ओं विश्वकर्मेश्वरि हूं ॥ २ ॥
ओं तथागतेश्वर्याभिषेककर्मविद्ये हूं ॥ ३ ॥
ओं धर्मकर्मेश्वरि ज्ञानपूजासमये हूं ॥ ४ ॥
ओं अमोघ[कर्मेश्वरि हूं] ॥ ५ ॥
ओं पद्मकर्मबुद्धे हूं ॥ ६ ॥
ओं पद्मकर्मवज्रिणि हूं ॥ ७ ॥
ओं पद्मकामिनि मारणपूजाकर्मसमये हूं ॥ ८ ॥
ओं पद्मकर्मतुष्टि हूं ॥ ९ ॥
ओं पद्म[कर्म भू] कुटि हूं त्रः ॥ १० ॥
ओं पद्मकर्मसूर्ये हूं ॥ ११ ॥
ओं पद्मकर्मध्वजे हूं ॥ १२ ॥
ओं पद्मकर्महासे हः ॥ १३ ॥
ओं पद्मकर्मतारे हूं ॥ १४ ॥
ओं पद्मकर्मकुमारि हूं ॥ १५ ॥
ओं पद्मकर्मनारायणि हूं ॥ १६ ॥
ओं पद्मकर्मब्राह्मि हूं ॥ १७ ॥

ओं पद्मकर्मनृत्येश्वरि हूं ॥ १८ ॥
ओं पद्मरक्षकर्मसमये हूं ॥ १९ ॥
ओं महा-प्रचण्डि घातनि पद्मदंष्ट्राकर्मकरि हूं ॥ २० ॥
ओं पद्मकर्ममुष्टि घातय हूं ॥ २१ ॥
ओं रतिपूजे हूं जः ॥ २२ ॥
ओं अभिषेकपूजे हूं होः ॥ २३ ॥
ओं गीतपूजे हूं धः ॥ २४ ॥
ओं नृत्यपूजे हूं वः ॥ २५ ॥
ओं धूपपूजे अः ॥ २६ ॥
ओं पुष्पपूजे हूं त्रः ॥ २७ ॥
ओं आलोकपूजे हूं धीः ॥ २८ ॥
ओं गन्धपूजे हूं वं ॥ २९ ॥
ओं हयग्रीवे आनय हूं जः ॥ ३० ॥
ओं अमोघपाशक्रोधे पीडय हूं फट् ॥ ३१ ॥
ओं पद्मशङ्कुलबन्धे हूं फट् ॥ ३२ ॥
ओं पद्मघण्टावेशय हूं फट् ॥ ३३ ॥

अथात्र कर्ममण्डले आकर्षणादिविधिविस्तरं कृत्वा, यथावत्प्रवेश्यैवं वदेत् । "न त्वया कुलपुत्र कस्यचिदयं वक्तव्यः; मा ते नरकपतनं भवेद्" इति ।

Jñāna

ततो ज्ञानान्युत्पादयेदिति । ततः पापदेशनाज्ञानं शिक्षयेदिति ।

लोकेश्वरमहामुद्रां भावयन् सुसमाहितः ।
पापानि देशयेच्छीघ्रं सर्वपापान् समाधयेत् ॥ १ ॥

समयाग्रीन् समाधाय लोकेश्वरसमाधिना ।
देशयन् सर्वपापान्यानन्तर्याणि शोधयेत् ॥ २ ॥

लोकेश्वरसमाधिन्तु भावयन् सुसमाहितः ।
देशयेत् सर्वपापानि सर्वपापप्रणाशनं ॥ ३ ॥

बध्वा चैकतमां सम्यक् कर्ममुद्रां समासतः ।
देशयेत्सर्वपापानि सर्वकर्मविशोधनम् ॥ इति ॥ ४ ॥

अथैषां हृदयानि भवन्ति ।

ओ सर्वपापसंशोधन महापद्म ॥
ओ सवानन्तर्यशोधन समयपद्म ॥
ओ सर्वपापप्रणाशन धर्मपद्म ॥
ओ सर्वकर्मावरणविशोधक कर्मपद्म ॥

ततः सर्वावरणपरिक्षयज्ञानं शिक्षयेत् ।

लोकेश्वरमहामुद्रां भावयेत् सुसमाहितः ।
शुध्य शुध्य इति प्रोच्य सर्वकर्माणि शोधयेत् ॥ १ ॥

बध्वा वै कर्मसमयां लोकेश्वरसमाधिना।
बुध्य बुध्य प्रवर्तस्तु सर्वकर्माणि शोधयेत्॥ २॥
लोकेश्वरसमापत्त्या धर्ममुद्रां तु भावयेत्।
धी धी धी धी—ति प्रोच्यन् वै सर्वकर्माणि शोधयेत्॥ ३॥
बध्वा वै कर्ममुद्रां तु लोकेश्वरसमाधिना।
ही ही ही ही—ति सन्धाय सर्वकर्माणि शोधयेद्॥ इति॥ ४॥

तत्रैषां हृदयानि भवन्ति।

ओं पाप क्षपय पद्म॥
ओं आवरण क्षपय पद्म॥
ओं नीवरण क्षपय पद्म॥
ओं कर्म क्षपय पद्म॥

ततः सर्वतथागतपूजाज्ञानं शिक्षयेत्।

लोकेश्वरमहामुद्रां बध्वा तु सुसमाहितः।
ओं ओं ओं ओमिति ब्रूयात्सर्वपूजाप्रवर्तनन्॥ १॥
बध्वा वै समयाग्रन्तु लोकेश्वरसमाधिना।
भूर्भूर्भूर्रिति प्रोक्तो सर्वबुद्धान् स पूजयेत्॥ २॥
लोकेश्वरसमापत्त्या धर्मपद्मं तु भावयेत्।
हे हे हे हे—ति सन्धाय सर्वबुद्धान् स पूजयेत्॥ ३॥
पद्मकर्ममयीम्मुद्रां बध्वा गाढं समाहितः।
धे धे धे धे—ति प्रोच्यन् सर्वबुद्धान् स पूजयेद्॥ इति॥ ४॥

तत्रासां हृदयानि भवन्ति।

ओं ओंकार महापद्म॥
ओं भूक्कार समयपद्म॥
ओं हेक्कार धर्मपद्म॥
ओं धेक्कार कर्मपद्म॥

ततः सिद्धिज्ञानं शिक्षयेत्।

लोकेश्वरमहामुद्रां बध्वा तु सुसमा[हितः।
ह्री ह्री ह्री ह्रो—]ति वर्तेत सिद्धिन् लोकेश्वरी भवेत्॥ १॥
बध्वा वै समयाग्रीन्तु लोकेश्वरसमाधिना।
श्री श्री श्री श्री—ति सन्धाय प्राप्नुयात्सिद्धिमुत्तमां॥ २॥
लोकेश्वरसमापत्तिं भावयन् सुसमाहितः।
धिक् धिक् धिक् धिगिति प्रोक्ते पद्मक्रोधस्तु सिध्यति॥ ३॥
कर्ममुद्रां समाधाय महापद्ममयीं [शुभां।
सिः] सिः सिः सी—ति सन्धाय पद्मसिद्धिमवाप्नुते—॥ ति॥

अथासां हृदयानि भवन्ति।

ओं ह्रीः सिध्य ॥
ओं श्रीः सिध्य ॥
ओं धिक् सिध्य ॥
ओं [सिः सिध्य ॥]

Mudrā

ततः कर्मरहस्यमुद्राज्ञानं भवति ।

लोकेश्वरसमापत्त्या रमयन् सर्वयोषितः ।
अहो सुख इति प्रोक्ते सर्वबुद्धान् स पूजयेत् ॥ १ ॥
लोकेश्वरसमापत्त्या रमयन्सर्वयोषितः ।
प्रिये प्रिये—ति वै प्रोक्ते बुद्धानां भवति प्रियः ॥ २ ॥
लोकेश्वरसमापत्त्या रमयन् सर्वयोषितः ।
[अहो रती—ति वै प्रोक्ते नित्यं रतिं स प्राप्नुते ॥ ३ ॥
लोकेश्वरसमापत्त्या रमयन् सर्वयोषितः ।
सुख सुख इति प्रोक्ते तस्य सुखं न नश्यत ॥ इति ॥ ४ ॥

अथासां] हृदयानि भवन्ति ।

ओं सर्वबुद्धपूजाप्रवर्तन पद्म ॥
ओं प्रीतिकर पद्म होः ॥
ओं रतिप्रवर्तन पद्म ॥
ओं महासुख पद्म दृढ हन् ॥

[ततः कर्ममहामुद्रां] यथावच्छिक्षयेत् । ततः सुकुड्मलाञ्जलिं समयमुद्रां वज्रकार्यं मण्डलयोगेन सर्वस्थानेषु स्थापयेत् ।

ततः पद्मकुल[कर्ममुद्रा त्र इति] वक्तव्याः ।
कर्मसमयां द्विधीकृत्य कर्ममुद्राः स साधयेदिति ॥

सर्वतथागतधर्मसमयान् महाकल्पराजात् कर्ममण्डल[विधिविस्तरः समाप्तः] ॥

CHAPTER 18b

EPILOGUE OF THE SARVA-TATHĀGATA-DHARMA-SAMAYA NĀMA MAHĀ-KALPA-RĀJA

अथ भगवान् पुनरपि वज्रधर्मसमयमुद्राधिष्ठानं नाम समाधिं समापद्येमां स्वमुद्राहृदय[मभाषत् **ओं वज्र]धर्मपद्म हूं ॥**

अथवज्रपाणिरियं स्वमुद्राहृदयमभाषत् **अथ वज्र जीः ॥**

अथ वज्रगर्भो बोधिसत्व इमां स्व[मुद्रामभाषत् **ओं वज्ररत्न]मुकुटे हूं ॥**

अथ वज्रनेत्रो बोधिसत्व इमां स्वमुद्रामभाषत् **ओं धर्मपद्मि धीः ॥**

अथ वज्रविश्वो बोधि[सत्व इमां स्वमुद्रामभाषत् **ओं सर्व]मुखि हूं ॥**

Delineation of the maṇḍala

अथार्यावलोकितेश्वरो बोधिसत्वो महासत्व इदं चतुर्मुद्रामण्डलमभाषत् ।

[अथातः संप्रवक्ष्यामि] चतुर्मुद्राग्रमण्डलं ।
वज्रधातुप्रतीकाशं महामण्डलसन्निभं ॥ १ ॥

मुद्रामण्डलमध्ये तु बुद्धबिम्बं निवेशयेत् ।
तस्य पार्श्वेषु सर्वेषु [वज्रपद्मादिं वै लिखे]त् ॥ २ ॥

Initiation into the maṇḍala

अथात्र महामण्डले आकर्षणादिविधिविस्तरङ्कृत्वा, यथावत् प्रवेश्यैवं ब्रूयात् "न त्वयेदं कस्यचिद् वक्तव्यं; मा ते महादुःखं [भवेद्, अकाल]मरणं विषमक्रियये"ति ।

Jñāna

ततो ज्ञानान्युत्पादयेत् ।

पद्मं हस्तेन वै गृह्य समाजिघ्रन् प्रयत्नतः ।
तेन गन्धेन संयोज्य बुद्धानां तु प्रसिध्य[ति] ॥ १ ॥

बुद्धबिम्बं जटामध्ये प्रतिष्ठाप्य समाहितः ।
सर्वलोकं वशंकुर्याद् दर्शयन् गर्वया व्रजन् ॥ २ ॥

पद्मपद्ममहाबिम्बं कारयित्वा समाधिना ।
उपविश्य यथापायं मनसा स तु मारयेत् ॥ ३ ॥

चतुर्मुखं तु वै पद्मं कारयित्वा करेण तु ।
संगृह्यावेशनादिनि भ्रामयन् प्रकरोति सः ॥ ४ ॥

अथैषां हृदयानि भवन्ति ।

ओं गन्धपूजाग्र्य साधय ह्रीः ॥
ओं पद्ममुकुट तथागत वशीकुरु सर्वान् लोकेश्वराभिषेक समय होः ॥
ओं पद्मपद्म मारय सर्वप्रत्यर्थिकान् समाधिज्ञान धिक् ॥
ओं विश्वपद्म सर्वकर्मकरो भव ललि लुलि लेलि हूं फट् ॥

Mudrā

ततो मुद्रारहस्यज्ञानं शिक्षयेत् ।

रक्तः सं सर्वकार्याणि साधयेत्समयो ह्ययं ।
दुःसाध्यापि हि मुद्रा वै क्षणात् सिध्यति योगत ॥ इति ॥

तत्रास्य समयो भवति **ओं साधय पद्मराग समय अः ॥**

ततो महामुद्रादिसर्वमुद्राबन्धं शिक्षयेत् ॥

चतुर्मुद्रामण्डलविधिविस्तरः समाप्तः ॥

III.6 Ekamudrā-maṇḍala

अथार्यावलोकितेश्वरो महाबोधिसत्व इदं सर्वजगद्विनयंनाम हृदयमभाषत्। **ओं सर्वजगद्विनय महासत्वागच्छ शीघ्रं वैश्वरूप्यं दर्शय मम च सर्वसिद्धयः प्रयच्छ ह्रीः ।।**

Delineation of the maṇḍala

अथार्यावलोकितेश्वरो महाबोधिसत्व इदं सर्वजगद्विनयं नाम मण्डलमभाषत् ।

अथातः संप्रवक्ष्यामि जगद्विनयमण्डलं ।
महामण्डलयोगेन संलिखेद् बाह्यमण्डलं ।। १ ।।
तस्याभ्यन्तरतः पद्मं तथैव च समालिखेत् ।
तत्र सरोजा विस्फारि विश्वरूपं समालिखेद् ।। इति ।। २ ।।

Initiation into the maṇḍala

अथात्र महामण्डले यथावद् विधिविस्तरेण प्रवेश्य, तथैवोक्त्वा, सर्वजगद्विनयज्ञानं शिक्षयेत् ।

Mudrā

मण्डलं तु समालिख्य जगद्विनयसंज्ञितं ।
भावयंस्तु महामुद्रां भवेद् विश्वधरोपम ।। इति ।।

ततो जगद्विनयरहस्यमुद्राज्ञानं शिक्षयेत् ।

विश्वरूपसमाधिन्तु भावयन् सुसमाहितः ।
द्वयेन्द्रियसमापत्त्या मण्डले तु स सिध्यति ।।

ततो महामुद्रादिमुद्राबन्धं शिक्षयेत् । तथैव सिद्धयः, एवं पटादिष्विति ।।

मुद्रायामप्येकमुद्रामण्डलयोगेन तथैव सिद्धय इति ।।

अथ सर्वतथागताः पुनः समाजमागम्यावलोकितेश्वराय महाबोधिसत्वाय साधुकाराण्यददन् ।

साधु ते वज्रसत्वाय वज्ररत्नाय साधु ते ।
वज्रधर्माय ते साधु साधु ते वज्र[कर्मणे ।।] १ ।।

सुभाषितमिदं सूत्रं वज्रयानमनुत्तरं ।
सर्वतथागतं गुह्यं महायानाभिसंग्रहम् ।। इति ।।

सर्वतथागत-तत्त्वसंग्रहात् सर्वतथागत-धर्मसमयो नाम महाकल्पराजा परिसमाप्तः ।।

PART IV

Sarva-tathāgata-karma-samaya nāma Mahā-kalpa-rāja

CHAPTER 19

SARVĀRTHASIDDHI-MAHĀMAṆḌALA-VIDHI-VISTARA

Hymn of 108 names of the mahābodhisattva Ākāśagarbha

अथ खलु सर्वतथागताः पुनः समाजमागम्य, सर्वतथागताभिषेकरत्नं तमेव वज्रधरमार्याकाशगर्भं महाबोधिसत्व-मनेन नामष्टशतेनाध्येषितवन्तः ।

आकाशगर्भ सत्वार्थ महासत्व महाद्युते ।
महारत्न सुरत्नाग्र्य वज्ररत्न नमोऽस्तु ते ॥ १ ॥

अभिषेक महारत्न महाशुद्ध महाशुभ ।
बुद्धरत्न विशुद्धाङ्ग रत्नरत्न नमोऽस्तु ते ॥ २ ॥

आकाशाकाशसंभूत सर्वाकाश महानभ ।
आकाशधातु सर्वाश सर्वाशाग्र्य नमोऽस्तु ते ॥ ३ ॥

रत्नसंभव रत्नोर्ण बुद्धोर्ण सुतथागत ।
सर्वरत्न सुसर्वाग्र्य रत्नकार्य नमोऽस्तु ते ॥ ४ ॥

रत्न रत्नाग्र्य रत्नोग्र रत्नसर्वतथागत ।
रत्नोत्तम महाकाश समाकाश नमोऽस्तु ते ॥ ५ ॥

अलङ्कार महाशोभ शोभाकर सुशोभक ।
शुद्ध सर्वार्थ शुद्धार्थ दानचर्य नमोऽस्तु ते ॥ ६ ॥

धर्मरत्न विशुद्धाग्र्य सङ्घरत्न तथागत ।
महाभिषेक लोकार्थ प्रमोदार्थ नमोऽस्तु ते ॥ ७ ॥

दान प्रदान दानाग्र्य त्याग त्यागाग्र्य दायक ।
सर्वसत्वार्थ तत्वार्थ महार्थार्थ नमोऽस्तु ते ॥ ८ ॥

चिन्ताराज महातेज दानपारमितानय ।
तथागत महासत्व सर्वबुद्ध नमोऽस्तु ते ॥ ९ ॥

तथागत महारत्न तथागत महाप्रभ ।
तथागत महाकेतो महाहास नमोऽस्तु ते ॥ १० ॥

तथागताभिषेकाग्र्य महाभिषेक महाविभो ।
लोकनाथत्व लोकाग्र्य लोकसूर्य नमोऽस्तु ते ॥ ११ ॥

रत्नाधिकाधिकतर रत्नभूषण रत्नधृक् ।
रत्नालोक महालोक रत्नकीर्ते नमोऽस्तु ते ॥ १२ ॥

रत्नोत्कर सुरत्नोत्थ मणे वज्रमणे गुण ।
रत्नाकर सुदीप्ताङ्ग सर्वरत्न नमोऽस्तु ते ॥ १३ ॥

महात्म यष्टि रत्नेश सर्वाशापरिपूरक।
सर्वाभिप्रायसंप्राप्ति रत्नराशि नमोऽस्तु ते ॥ १४ ॥
अ[भ्व]ग्र्य व्यापि सर्वात्म वरप्रद महावर।
विभूते सर्वसंपत्ते वज्रगर्भ नमोऽस्तु ते ॥ १५ ॥
यः कश्चिद् धारयेन् नाम्नामिदन्तेऽष्टशतं शिवं।
सर्वबुद्धाभिषेकं तु स प्राप्नोत्यनघः क्षणात् ॥ १६ ॥
अध्येषयामस्त्वां रत्न भाष स्वधनसंचयं।
सर्वबुद्धाभिषेकाग्र्यमुत्पाद नियमकुलम् ॥ १७ ॥ इति ॥

अथाकाशगर्भो बोधिसत्वः इदं सर्वतथागतवचनमुपश्रुत्य, सर्वतथागताभिषेकसमयं नाम स्वहृदयमभाषत् **ओं वज्ररत्न हूं ॥**

अथ भगवान् वैरोचनस्तथागत इमं सर्वतथागतमणिसमयं नाम विद्योत्तममभाषत् **ओं सर्व-तथागताशा-परिपूरण-महारत्न हूं ॥**

अथ वज्रपाणिर्महाबोधिसत्व इमं स्वकुलसंभवं विद्योत्तममभाषत् **ओं वज्र हूं त्रः ॥**

अथ वज्रगर्भो बोधिसत्व इमं स्वविद्योत्तममभाषत् **ओं मणि हूं ॥**

अथ वज्रनेत्रो बोधिसत्व इमं स्वकुलसंभवं विद्योत्तममभाषत् **ओं पद्म ह्रीः ॥**

अथ वज्रविश्वो बोधिसत्वो महासत्व इमं स्वविद्योत्तममभाषत् **ओं विश्वरत्न हूं ॥**

अथार्याकाशगर्भो बोधिस[त्वो महासत्वः] सर्वतथागताभिषेकरत्नंनाम समाधिं समापन्नः; समनन्तरसमापन्ने चाथ तावदेव सर्वतथागतहृदयेभ्यो वज्रमणिरत्नरश्मयो निश्चरिताः। ते सर्वलोकधातवोऽवभास्य सर्वसत्वान् सर्वतथागताभिषेकैरभिषिच्य, पुनरप्येकघ्यीभूत्वा, भगवत आकाशगर्भस्य महाबोधिसत्वस्य हृदयेऽनुप्रविष्टा इति।

अथ तत आकाशगर्भहृदयात्स एव भगवान् वज्रपाणिः समन्तरश्मिज्वालागर्भा विचित्रवज्रमणिरत्नाभिषेकाद्याभरणालङ्कारालङ्कृतकाया महावज्रमणिरत्नचिह्नमुद्राव्यग्रकरा महाबोधिसत्वकाया भूत्वा विनिःसृत्य, सर्वलोकधातुषु महारत्नवर्षादिभिः रत्नोत्पत्तिभिः सन्तोष्य, पुनरागत्य, भगवतो वैरोचनस्य सर्वतो वज्रधातुमहामण्डलयोगेन चन्द्रमण्डलाश्रिता भूत्वेदमुदानमुदानयिंसुः।

अहो हि सर्वबुद्धानां सर्वरत्नसमुच्चयं।
वज्ररत्नकुलं त्वेदं संभूतं जगदर्थत ॥ इति ॥

Delineation of the maṇḍala

अथाकाशगर्भो बोधिसत्वो महासत्व इति स्वकुलमुत्पाद्य, सर्वतथागतेभ्यः सर्वाशापरिपूर्ये निर्यात्येदं सर्वार्थसिद्धिन्नाम महामण्डलमभाषत्।

अथातः संप्रवक्ष्यामि महामण्डलमुत्तमं।
वज्रधातुप्रतीकाशं सर्वसिद्धिरिति स्मृतं ॥ १ ॥
चतुरश्रं चतुर्द्वारं चतुष्तोरणशोभितं।
चतुःसूत्रसमायुक्तं पट्टस्रग्दामभूषितं ॥ २ ॥
सर्वमण्डलकोणेषु द्वारनिर्यूहसन्धिषु।
खचितं वज्ररत्नैस्तु सूत्रयेद्बाह्यमण्डलं ॥ ३ ॥
तस्याभ्यन्तरतः कार्यं वज्ररत्नसमं पुरं।
अष्टस्तंभाग्रयोगेन सूत्रणं तत्र कारयेत् ॥ ४ ॥

पञ्चमण्डलशोभं तु नानारत्नाकरोज्ज्वलं ।
स्वमुद्रापरिवारं तु तत्र बुद्धन्निवेशयेत् ।। ५ ।।

तत्रैषां हृदयानि भवन्ति ।।

ओं बुद्धरत्न हूं ।।
ओं वज्रमणि हूं ।।
ओं वज्ररत्नाङ्कुर हूं ।।
ओं वज्ररत्नपद्म हूं ।।
ओं रत्नपद्मवर्ष हूं ।।

वज्रवेगेन चाक्रम्य सर्वाशासिद्धिमण्डलं ।
तत्रस्थं वज्रगर्भं तु लिखेद्रत्नवरप्रदं ।। १ ।।
तस्य पार्श्वेषु सर्वेषु रत्नमुद्रा समन्विताः ।
महासत्वाः समालेख्या यथावदनुपूर्वशः ।। २ ।।

अथैषां हृदयानि भवन्ति ।

ओं सर्वार्थसिद्धिप्रद हूं ।।
ओं वज्रमणिचिह्नाकाशगर्भ भगवन् सिध्य सिध्य हूं ।।
ओं रत्नाङ्कुशाकर्षय सर्वार्थानानय शीघ्रं सर्वतथागतसत्यमनुस्मर हूं ।।
ओं मणिराग वशीकुरु सर्वार्थानानयाकाशगर्भ हूं ।।
ओं रत्नतुष्टि हूं ।।

वज्रवेगेन चाक्रम्य रत्नमालस्य मण्डलं ।
तत्र मध्ये लिखेत् सम्यग्रत्नमालाधरं परं ।। १ ।।
तस्य पार्श्वेषु सर्वेषु यथावदनुपूर्वशः ।
महासत्वाः समालेख्या मणिचिह्नाग्रपाणयः ।। २ ।।

तत्रैषां हृदयानि भवन्ति ।

ओं रत्नदृष्टि त्रः ।।
ओं सर्वतथागताभिषेकरत्नमाल हूं ।।
ओं मणिसूर्य हूं ।।
ओं चिन्तामणिध्वज सर्वाशाप्रपूरकाकाशगर्भ हूं ।।
ओं रत्नाट्टहास हस ह ह हूं ।।

वज्रवेगेन चाक्रम्य रत्नपद्मस्य मण्डलं ।
तत्रस्थं तु समालेख्यं रत्नपद्मधरं विभुं ।। १ ।।
तस्य पार्श्वेषु सर्वेषु महासत्वान् समालिखेत् ।
मणिचिह्नान् समासेन यथावदनुपूर्वशः ।। २ ।।

तत्रैषां हृदयानि भवन्ति ।।

ओं रत्नपद्म हूं ।।
ओं [त्यागसमाधिज्ञान]गर्भ हूं ।।

ओं रत्नकोशाग्र्य हूं ।।
ओं मणिचक्र प्रवर्तय हूं ।।
ओं रत्नभाष हूं ।।

वज्रवेगेन चाक्रम्य रत्नवृष्टेस्तु मण्डलं ।
तत्र लेख्यं महासत्वं र[त्नवृष्टि प्रवर्ष]यन् ।। १ ।।
तस्य पार्श्वेषु सर्वेषु महासत्वान् यथाविधि ।
रत्नचिह्नसमोपेतान् मुद्राहस्तान् समासतः ।। २ ।।

तत्रेषां हृदयानि भवन्ति ।

ओं रत्नवृष्टि वर्षय सर्वार्थसंपदो भगवन् मणिहस्त हूं ।।
ओं मणिपूजा समय हूं ।।
ओं मणिबन्ध कवच हूं ।।
ओं मणिदंष्ट्राकराल महायक्ष हर हर सर्वार्थान् भीषापय हूं ।
ओं मणिरत्न बन्ध समय हूं ।।

वज्रवेगेन चाक्रम्य कोणभागेषु सर्वतः ।
रत्नलास्यादयो लेख्या यथावदनुपूर्वशः ।।

तत्रासां मुद्रा भवन्ति ।

ओं रत्नरति हूं ।।
ओं रत्नमाले हूं ।।
ओं रत्नगीते हूं ।।
ओं रत्ननृत्ये हूं ।।

वज्रवेगेन निःक्रम्य बाह्यमण्डलमुत्तमं ।
बाह्यमण्डलकोणेषु धूपपूजादयो लिखेत् ।।

तत्रासां मुद्रा भवन्ति ।

ओं धूपरत्ने ।।
ओं पुष्पमणि ।।
ओं रत्नालोके ।।
ओं मणिगन्धे ।।

द्वारपालास्तु कर्तव्या द्वारमध्यचतुष्टये ।
अतः परं प्रवक्ष्यामि मण्डले विधिविस्तरं ।।

अथात्र हृदयानि भवन्ति ।

ओं सर्वरत्नाकर्ष आर्यारुण महासत्व भगवन्तं आकाशगर्भं चोदयाकर्षय शीघ्रं होः जः ।।
ओं सर्वरत्नप्रवेशसमय प्रवेशय समयान् महामणिराजकुलं रत्नपाश हूं ।।
ओं मणिबन्ध हूं वं ।।
ओं मणिरत्नावेश अः ।।

Initiation into the maṇḍala

अथात्र महामण्डले स्वयं मणिरत्नाचार्यो यथावत् प्रविश्य, विधिविस्तरमात्मनः कृत्वा, ततो रत्नाधिष्ठितकलशोदकेन मणिशिष्यानभिषिच्य, वज्रमणिसमयमुद्रां बन्धयेदनेन हृदयेन **ओं वज्रमणि समय वं ॥**

ततो यथावर्णप्राप्तितया वस्त्रमुत्तरासङ्गं कृत्वा, तादृशेनैवाक्षिणी बध्वा, प्रवेशयेदनेन हृदयेन **ओं हूं मणिराजकुलं ॥**

ततः प्रवेश्य वक्तव्यं "न त्वयेदं कस्यचिद् वक्तव्यं; मा ते सर्वजन्मसु दारिद्र्यदुःखान्मोक्षे न भवेन्, नरकवासश्च दृढो भवेद्" इत्युक्त्वा, समयं स्फोटयेत्; महायानाभिसमयं चोच्चारयेत्।

ततः समाविष्टस्य वज्रवाचा परिपृच्छेत्। "कुत्र महानिधिरस्ति ?। कथं वा प्राप्यते।"

ततो भगवानाकाशगर्भो बोधिसत्वः सर्वं जलपापयतीत्य्; उक्तमात्रे मुखबन्धं मुक्त्वा, महामण्डलं दर्शयेत्, सर्वतथागताभिषेकसमयं चोदाहरेत्, यावद् भगवांस्तथागतस्तु गत इति। ततो यथाविभवतः पूजान् कृत्वा, सर्वकार्याणि साधयेदिति।

Mudrā

अथात्र ज्ञानमुद्रा भवन्ति।

वज्रगर्भमहामुद्रां बध्वा तु सुसमाहितः।
निधानं खनते यत्र निधानं तत्र पश्यति॥ १॥
बध्वा तु समयाग्रीम् वै निधानं यत्र विद्यते।
पीडयेत् तत्र तां मुद्रां स्वयमुत्तिष्ठते तदा॥ २॥
वज्रगर्भसमाधिन्तु भावयन् सुसमाहितः।
मनसा चैव जानाति निधानं यत्र तिष्ठति॥ ३॥
बध्वा कर्ममयीं मुद्रां वज्रगर्भसमाधिना।
तां मुद्रामाविशेद्यत्र निधानं तत्र लक्षयेत्॥ ४॥

तत्रैषां हृदयानि भवन्ति।

ओं महामणिरत्नाविश हूं ॥
ओं मणिपीड दर्शय ॥
ओं रत्नसमाधि ब्रूहि ॥
ओं रत्नावेश दर्शय ॥

महामुद्रां समाधाय यत्र कायं तु वेष्टयेत्।
तत्र रत्ननिधानं तु ज्ञातव्यं समयात्मभिः॥ १॥
बध्वा तु समयाग्रीम् वै यत्राविश्य परिस्फुटेत्।
निधानन्तत्र विज्ञेयं महारत्नमयं भवेत्॥ २॥
समाधिमुद्रां बध्वा वै यद्याविश्य स्वयं पुनः।
ब्रूयाद्यत्र निधानं तु महारत्नमयं भवेत्॥ ३॥
कर्ममुद्रां तु बध्वा वै यदाविश्य परम्परं।
हस्तौ बन्धे तु समयान्निधिन्तत्र विनिर्देशेद्॥ इति॥ ४॥

तत्रैषां हृदयानि भवन्ति॥

ओं महारत्नकाय दर्शय रत्नं ॥
ओं आकाशगर्भ मणिरत्न स्फुट स्फुट यत्र निधिः ॥

ओं मणिरत्नज्ञान स्वयं ब्रूहि ।।
ओं पुनः समय बन्ध दर्शयस्व ।।

बध्वा तु वै महामुद्रां यत्राशङ्का भवेत्तथा ।
तत्र ज्ञानेन विज्ञेयं निधानं रत्नसंभवं ।। १ ।।
यत्र शङ्का भवेत्तत्र समयाग्रीन्तु बन्धयेत् ।
यदा मोक्षं स्वयं यायान्निधिन्तत्र विनिर्दिशेत् ।। २ ।।
समाधिमुद्रां बध्वा वै शङ्का यत्र भवेद्ध्रुवा ।
ज्ञानमुत्पाद्य विज्ञेयं निधिस्तत्रास्ति शाश्वतः ।। ३ ।।
यत्र भूयो भवेच्छङ्का कर्ममुद्रां तु तत्र वै ।
बध्नीयाद् विधिवत्तां तु स्फुटेज्ज्ञेयो निधिः पुनः ।। ४ ।।

तत्रैषां हृदयानि भवन्ति ।

ओं निधिज्ञानाविश ।।
ओं रत्नसमय मुञ्च निधि बन्धान् ।।
ओं धर्मरत्न ब्रूहि निधानं ।।
ओं सर्वकर्माणि स्फोटय दर्शय निधि बन्धोत्क्षिप ।।

महामुद्रां तु सन्धाय निधानं परिमार्गयेत् ।
यत्रस्थस्य समावेशो भवेत्तत्र विनिर्दिशेत् ।। १ ।।
बध्वा समयाग्रीन् वै निधिं तु परिमार्गयेत् ।
यत्रस्थो दृढतां यायान्निधिन्तत्र विनिर्दिशेत् ।। २ ।।
समाधिमुद्रां सन्धाय निधानं परिमार्गयेत् ।
यत्रस्थो ज्ञानवान् भूयान्निधिन्तत्र विनिर्दिशेत् ।। ३ ।।
बध्वा कर्ममयीं मुद्रां निधिं तु परिमार्गयेत् ।
यत्रस्थः कर्ममुद्रां तु भ्रामयेत् तत्र निर्दिशेत् ।। ४ ।।

तत्रैषां हृदयानि भवन्ति ।

ओं महारत्न परीक्षाविश ।।
ओं रत्नसमय दृढ दर्शय ।।
ओं रत्नपरीक्षा ज्ञानाविश ।।
ओं मणिकर्म भ्रामय ।।

ततो मणिरहस्यमुद्राज्ञानं शिक्षयेत् ।।

द्वयेन्द्रियसमापत्त्या निधानं परिमार्गयेत् ।
भावयंस्तु महामुद्रां समावेशान्निधिं लभेत् ।। १ ।।
बध्वा तु समयाग्रीन् वै रामयंस्तु स्त्रियन्तथा ।
यत्र मुद्रा दृढीभूयान्निधिन्तत्र विनिर्दिशेत् ।। २ ।।
द्वयेन्द्रियसमापत्त्या निधानं परिमार्गयेत् ।
भावयन् ज्ञानमुद्रां तु निधिज्ञानं प्रवर्तते ।। ३ ।।

बध्वा तु कर्ममुद्रां वै द्वयेन्द्रियसमाधितः।
स्फुटेद्यत्र तु सा मुद्रा निधिन्तत्र विनिर्दिशेद् ।। इति ।। ४ ।।

तत्रैषां हृदयादि भवन्ति ।

ओं महामणि संयोगविश ।।
ओं समय संयोगदृढो मे भव ।।
ओं निधिज्ञानाविशाविश संयोग ।।
ओं सर्वकर्म स्फोट संयोग ।।

ततो महामणिकुलसर्वमुद्राज्ञानं शिक्षयेत् ।

अथ महामुद्रा भवन्ति ।

यथालेख्यानुसारतौ भावयंस्तु महामुद्राः।
सर्वार्थोत्तम सि[ध्यति चन्द्रमण्डलमध्यस्थाः ।।

ततो] महामुद्राणां [क्रिया भवन्ति ।]

बुद्धमुद्रा तु बुद्धत्वं सुसिद्धिर्वज्रगर्भयोः।
रत्नाङ्क [इया समाकर्षेत् मणिरामयानुरमेत् ।। १ ।।

मण्युदग्रया संतोषका] मणिदृष्टचार्थहारिका।
मणिमालाभिषेका तु मणिसूर्या सुतेजदा ।। २ ।।

चिन्तामणिर्यथेच्छदा रत्नहासार्थहारिका ।
धर्मरत्ना [प्राप्तं धर्मं त्या] गाग्री लाभमुत्तमं ।। ३ ।।

रत्नकोशा महाकोशं मणिचक्राधिपत्यतां।
भाषामार्गेण सिद्धिस्तु रत्नवृष्टिर्महाधनं ।। ४ ।।

मणिपूजा सुपूज्यत्वं रत्नवर्मा दृढंकरी।
रत्नदंष्ट्रा हरेदर्थं मणिमुष्टचा तु सिध्यति ।। ५ ।।

अथात्र महामण्डले समयमुद्राज्ञानं भवति।

वज्ररत्नमयी मुद्रा सर्वबुद्धाभिषेकदा।
महावज्रमणिं बध्वा वज्ररत्नं तु सिध्यति ।। १ ।।

वज्रद्विकं मणीकृत्वा धनं वज्रधराल्लभेत्।
सा एवाङ्गुष्ठवज्रेण मणिं दद्याद् हृदि स्थितं ।। २ ।।

कुड्मलाग्र्या मणि बध्वा लोकेशो धनदो भवेत्।
वज्रकर्ममणिन्दद्यान् महाविश्वमणिध्वजं ।। ३ ।।

वज्रधात्वग्रमणिना बुद्धरत्नत्वमाप्नुयात् ।
समाग्रग्रा पृष्ठसंकोचा वज्रमङ्गुष्ठबन्धतः ।। ४ ।।

इयं वज्रमणिः प्रोक्ता वज्रगर्भस्य पाणितः।
अनया बद्धमात्रया महावज्रमणिं लभेत् ।। ५ ।।

रत्नवज्रां समाधाय सममध्योत्थिताङ्क रां।
अनया बद्धमात्रया स्वभिषेकाप्यवाप्नुयात् ।। ६ ।।

सा एव मध्यमानामकनिष्ठा कुड्मलीकृत्वा ।
अनया तु धनं दद्यादवलोकितनामधृक् ॥ ७ ॥

वज्ररत्नप्रयोगेण तर्जन्यङ्गुष्ठकन्यसा ।
मध्यमाभ्यां नखसन्धानान् समानामाङ्कुरोत्थिता ॥ ८ ॥

वज्रबन्धं दृढीकृत्य तर्जनीभ्यां मणीकृता ।
प्रसारिताङ्गुष्ठमुखा हृदि सर्वार्थसिद्धिदा ॥ ९ ॥
वज्रबन्धं समाधाय मध्यमा मणियोजिता ।
मुद्रेयं मणिचिह्नस्य मणिरत्नप्रदायिका ॥ १० ॥

स एवाङ्कुशयोगेन तर्जनीभ्यां समन्विता ।
सर्वार्थकर्षणी मुद्रा मणिरत्नाङ्कुशी स्मृता ॥ ११ ॥

सा एव वलि[तां कृत्वा] तर्जन्या तर्जनी ग्रहा ।
वाणाकर्षणायोगेन कर्षयन् रागयेज्जगत् ॥ १२ ॥

सा एव साधुकारा तु तर्जन्यङ्गुष्ठयोजिता ।
सा एवाङ्गुष्ठसन्धानसंच्छन्नाग्र्याङ्गुली तथा ॥ १३ ॥

अङ्गुष्ठान्तरयोश्चैव पुनरग्र्या मुखे क्षणात् ।
मणिदृष्टिस्तु सा ख्याता दृष्टचर्थानां प्रहारिका ॥ १४ ॥

सर्वार्थसिद्धिमाला तु स्वभिषेकप्रदायिका ।
सा एव हृदयेऽङ्गुष्ठमुखसन्धानयोजिता ॥ १५ ॥

हृदये मणिसूर्या तु महातेजःप्रदायिका ।
मूर्ध्निस्था च समानाम पताकाग्रविदारिता ॥ १६ ॥

महावज्रमणि पूर्वं सर्वाशापरिपूरिका ।
सा एव हाससंस्था तु लीलया परिवर्तिता ॥ १७ ॥

रत्नाट्टहासनाम्ना वै हासात् सर्वार्थकारिका ।
सर्वाग्रमणिपद्मा तु धनहारी समाधिना ॥ १८ ॥

सा एवान्त्यादिदाना तु महादानप्रदायिका ।
अधर्गतसमाङ्गुष्ठतर्जनी मणिसंस्थिता ॥ १९ ॥

भणिकोशा हरेदर्थान् जगतां विक्रमेण तु ।
वज्रबन्धाग्रचक्रा तु समाङ्गुष्ठप्रवेशिता ॥ २० ॥

तर्जनीमणिसंस्थानाच्चक्रवर्तित्वदायिका ।
सा एवाञ्जली मुखबन्धे समुद्धृता ॥ २१ ॥

स तु सन्धाय वाचा वै स्वाज्ञया हरते धनं ।
महावज्रमणिं बध्वा रत्नवर्ष [प्रवर्षिता] ॥ २२ ॥

सर्वाङ्गुल्युपस्तोभा तु चतुःशो वर्षते धनं ।
महावज्रमणिं बध्वा नृत्यन्नुष्णीषमध्यतः ॥ २३ ॥

संपूज्य विधिवत्सर्वैं सर्वरत्नैः संपूज्यते ।
[सर्वार्थसिद्धि] मुद्रां तु कण्ठदेशे परिष्वजेत् ॥ २४ ॥

मणिबन्धेति विख्याता रक्षा कवचिनी स्मृता।
सा एव सर्वसिद्धयर्था यक्षयोगा मुखस्थिता ॥ २५ ॥
मणिद्रंष्ट्रेति [विख्या]ता भयात्सर्वार्थहारिणी।
वज्रबन्धं दृढीकृत्य कुञ्चिताग्र्या सुयन्त्रिता ॥ २६ ॥
संगृह्याङ्गुष्ठयोः सम्यग् मणिमुष्टिस्तु सिद्धिदा।
पूजाग्रसमयानां तु वज्रधातुप्रयोगतः ॥२७॥
यथावन्मणियोगेन समयाग्र्योऽत्र कल्पिताः।
मध्यमा मणियोगेन ता एव तु विकल्पिताः ॥ २८ ॥

एकाङ्गुष्ठयादियोगेन सर्वकर्मप्रसाधिका ॥ इति ॥

अथ महामणिकुलधर्ममुद्राज्ञानं भवन्ति त्रः, ग्रः, त्रिः, ह्रीः, श्रीः, इः, रः हः, **ध्रीः धीः, कु, वा, रो, ढः, य, अः।**

रत्नमुष्टिं द्विधीकृत्य कर्ममुद्रास्तु साधयेद् ॥ इति ॥

सर्वतथागतकर्मसमयान् महाकल्पराजात् सर्वार्थसिद्धिमहामण्डलविधिविस्तरः समाप्तः।

CHAPTER 20

RATNA-GUHYA-MUDRĀ-MAṆḌALA-VIDHI-VISTARA

अथ भगवान् पुनरपि सर्वतथागताभिषेकधारणीसमयसंभवरत्नाधिष्ठानं नाम समाधिं समापद्येमां स्वमुद्रामभाषत् **ओं वज्ररत्नस्तूपे हूं ॥**

अथ वज्रपाणिर्महाबोधिसत्व इमां स्वकुलसंभवां मुद्रामभाषत् **ओं वज्राभिषेकमाले अभिषिञ्च समये हूं ॥**

अथ वज्रगर्भो बोधिसत्वो महासत्व इमां स्वमुद्रामभाषत् **ओं वज्ररत्नाभिषेके हूं ॥**

अथ वज्रनेत्रो बोधिसत्व महासत्व इमां स्वमुद्रामभाषत् **ओं वज्रधर्माभिषिञ्च मां ॥**

अथ वज्रविश्वो बोधिसत्वो महासत्व इमां स्वमुद्रामभाषत् **ओं सर्वाभिषेकपूजासमये हूं ॥**

Delineation of the maṇḍala

अथ भगवानार्याकाशगर्भो बोधिसत्वो महासत्व इदं स्वकुलसमयमुद्रामण्डलमभाषत् ।

अथातः संप्रवक्ष्यामि मुद्रामण्डलमुत्तमं ।
वज्रधातुप्रतीकाशं रत्नगुह्यमिति स्मृतं ॥ १ ॥
महामण्डलयोगन सूत्रयेत्सर्वमण्डलं ।
तस्य मध्ये यथान्यायं बुद्धमुद्रां समालिखेत् ॥ २ ॥
पर्यङ्कस्थं मणिं पूर्वं वज्रधातोः पुरो लिखेत् ।
मणिमालां मणिं पद्मे मणिं मणिपरीवृतं ॥

तत्रासां मुद्रा भवन्ति ।

ओं त्रः ॥
ओं मणिसमये हूं ॥
ओं मणिरत्नाभिषेकमाले हूं ॥
ओं मणिरत्नपद्मि हूं ॥
ओं मणिरत्नवृष्टिसमये हूं ॥

वज्रवेगेन निष्क्रम्य सर्वसिद्धेस्तु मण्डले ।
वज्ररत्नस्य मध्ये तु महारत्नमणिं लिखेत् ॥ १ ॥
तस्य पार्श्वेषु सर्वेषु स्वमुद्रामणिसंयुता ।
यथावदनुपूर्वेण रत्नाचार्यः समालिखेत् ॥ २ ॥

तत्रासां मुद्रा भवन्ति ।

ओं सर्वार्थसिद्धिप्रदे महावज्ररत्नसमय मणि सर्वार्थान् मे साधय धारणी हू ॥
ओं मणिरत्नाकर्षे हूं ॥

ओं मणिरत्नसमयाङ्कुशयाकर्षय मणिकुलं जः ॥
ओं मणिरागसमये हूं ॥
ओं मणिसार्थि हूं ॥

वज्रवेगेन चाक्रम्य द्वितीयं मण्डलं तथा।
तत्र मध्ये मणिं लेख्यं नेत्रद्विकसमन्धितन् ॥ १ ॥
तस्यास्तु सर्वपार्श्वेषु यथावदनपूर्वशः।
मणिचिह्नसमोपेताः स्वमुद्रास्तु समालिखेत् ॥ २ ॥

तत्रासां मुद्रा भवन्ति ॥

ओं वज्रमणिरत्ननेत्रानय वशीकुरु सर्वार्थसंपदः शीघ्रं दृष्ट्याङ्कुशी हूं ॥
ओं वज्रमणिरत्नमालेऽभिषिञ्च हूं ॥
ओं मणिरत्नसूर्ये ज्वालय सर्वं महातेजिनि हूं ॥
ओं मणिचन्द्रध्वजाग्रि हूं ॥
ओं मणिहासे हस हूं ॥

वज्रवेगेन चाक्रम्य मणिपद्मं समालिखेत्।
तस्य पार्श्वेषु सर्वेषु यथावदनुपूर्वशः ॥ १ ॥

तत्रासां मुद्रा भवन्ति।

ओं मणिसमाधिपद्मिनि हूं ॥
ओं मणिरत्नत्यागसमये हूं ॥
ओं मणिसमयकोशे हूं ॥
ओं मणिसमयचक्रे हूं ॥
ओं मणिभाषाग्रि हूं ।

वज्रवेगेन चाक्रम्य चतुर्थं मण्डलोत्तमं।
तत्रस्थं रत्नवृष्टया तु वज्रं रत्नसमन्धितं ॥ १ ॥
संलिखेत यथावत्तु कर्ममुद्रापरिवृतं।
मणिचिह्नप्रयोगैस्तु यथावदनुपूर्वशः ॥२॥

अथासां मुद्रा भवन्ति।

ओं रत्नवृष्टि साधय महामणि हूं ॥
ओं महापूजासमये नृत्य अः ॥
ओं मणिरत्नसमयरक्षे हं ॥
ओं वज्रमणिरत्न द्रंष्ट्राकराले हर हर हूं ॥
ओं मणिसमयमुष्टि हूं ॥

Initiation into the maṇḍala

अथात्र मणिगुह्यमण्डले यथावत्कर्म कृत्वा, शिष्यां प्रवेय, ब्रूयात्। "न त्वया कस्यचिदयं नयो वक्तव्यः। मा ते

महादारि द्यूमकालक्रिया नरकपतनं स्याद्", इत्युक्त्वा स्वमणिसमयज्ञानान्युत्पादयेत्।

Mudrā

वज्ररत्नं नभे लिख्य वज्ररत्नसमाधिना।
आत्मनस्तु ललाटे वै स्थाप्य राजा भवेद्ध्रुवं॥ १॥

वज्ररत्नं समालिख्य समयाग्रीन्तु बन्धयेत्।
स्थाप्याभिषेकस्थानेषु राज्यत्वं भवते ध्रुवं॥ २॥

वज्ररत्नं समालिख्य वज्ररत्नसमाधिना।
तज्ज्ञानरत्नं संस्थाप्य भवेद्राजा स्वयंकृतः॥ ३॥

वज्ररत्नं नभे लिख्य कर्ममुद्रां तु बन्धयेत्।
स्वस्थाने तत्प्रतिष्ठाप्य भवेद्राजा स्वयं कृत॥ इति॥ ४॥

तत्रैषां हृदयानि भवन्ति।

महावज्ररत्नाभिषिञ्च मां॥
समयरत्नाभिषिञ्च मां॥
धर्मरत्नाभिषिञ्च मां॥
कर्मरत्नाभिषिञ्च माम्॥

वज्ररत्नं तु हृदये महामुद्रां तु भावयेत्।
भावयन्नभिषेकं तु प्राप्नोति परमाद्भुतं॥ १॥

वज्ररत्नं ललाटे तु भावयं सुसमाहितः।
बध्वा वै रत्नवज्रान्तु भवेद्राजा तु सर्वतः॥ २॥

वज्ररत्नं तु जिह्वायां वज्ररत्नसमाधिना।
भावयन्नभिषेकं प्राप्नुयाद्धर्मराज्यतां॥ ३॥

वज्ररत्नं स्वमुष्णीषे भावयं सुसमाहितः।
बध्वा वै कर्ममुद्रां तु भवेद्राजा सुकर्मकृद्॥ इति॥ ४॥

अथासां हृदयानि भवन्ति।

ओं वज्ररत्नहृदयाभिषिञ्च होः॥
ओं वज्ररत्नाभिषेक त्रः॥
ओं वज्ररत्नज्ञानाभिषिञ्च वं॥
ओं वज्ररत्नोष्णीषाधितिष्ठस्व मां॥

पटादिषु समालिख्य वज्ररत्नं स्वमात्मना।
भावयंस्तु महामुद्रां महाराजा भवेत्स तु॥ १॥

पटादिषु समालिख्य [वज्ररत्न] मनुत्तरं।
भावयेत्सत्ववज्रां तु समयानां भवेत्पतिः॥ २॥

पटादिषु समालिख्य वज्ररत्नं स्वमात्मना।
भावयं ध्यानमुद्रां तु भवे[द्धर्मपतिर्ध्रुवं]॥ ३॥

पटादिषु समालिख्य वज्ररत्नमनुत्तरं।
भावयेत्कर्ममुद्रां तु भवेत्कर्माधिपः स्वयम्॥ इति॥॥ ४॥

तत्रैषां हृदयानि भवन्ति।

वज्ररत्न [बिम्बाधितिष्ठ]॥
वज्ररत्नबिम्ब प्रतिष्ठ॥
वज्ररत्नबिम्बाविश॥
वज्ररत्नबिम्ब कुरु॥

सौवर्णं वाथ रौप्यं वज्ररत्नं तु भावयेत्।
अन्यरत्नमयं वापि हृदि भाव्याभिषिच्यते॥ १॥

सौवर्णमन्यरत्नं वा वज्ररत्नं त्वनुत्तरं।
स्थाप्य भूयो ललाटे तु भवेद्राजा महाधनः॥ २॥

सौवर्णमन्यरत्नं वा वज्ररत्नन्तु भावयेत्।
स्वमुखे चैव प्रक्षिप्य भवेद्वाचां पतिस्तु सः॥ ३॥

सौवर्णमन्यरत्नं वा वज्ररत्नन्तु भावयेत्।
उष्णीषे भावयं भूयो सर्वकर्मपतिर्भवेद्॥ इति॥ ४॥

तत्रैषां हृदयानि भवन्ति।

ओं वज्ररत्नहृदयाभरण हूं॥
ओं वज्ररत्नाभिषेक महार्थप्रद॥
ओं वज्ररत्नवाचस्पते॥
ओं वज्ररत्नमहाकर्मपते॥

ततो मणिकुलसमयमुद्रारहस्यज्ञानं शिक्षयेत्।

महावज्रमणिं बध्वा तन्मणिं स्त्रीभगे तथा।
प्रवेश्य तु महामुद्रां भावयन् सिद्धिमाप्नुते॥ १॥

समयाग्र्या मणिं बध्वा स्त्रीभगे समयग्र्यया।
बन्धया तु भवेत्सिद्धिरभिषेकेषु सर्वतः॥ २॥

महावज्रमणिं बध्वा धर्ममुद्रां तु भावयत्।
तन्मणिं स्त्रीभगे विध्वा भवेत्सिद्धिरनुत्तरा॥ ३॥

कर्ममुद्रामणिं विध्वा स्त्रीभगे कर्ममुद्रया।
बन्धया तु भवेत्सिद्धिः सर्वकर्मस्वनुत्तरम्॥ इति॥ ४॥

तत्रासां हृदयानि भवन्ति।

ओं महासिद्धिः॥
ओं समयाभिषेकसिद्धिः॥
ओं धर्मसिद्धिः॥
ओं कर्मसिद्धिः॥

अथात्र मण्डले महामुद्राबन्धो भवति।

रत्नवज्राङ्कुरां बध्वा मध्यानामान्तिमाङ्गुली।
प्रसारितास्तु संधाय मूर्ध्नि स्थाप्याग्रसिद्धिदा॥ १॥

वज्रबन्धं समाधाय ग्रन्थिताग्र्या युगोर्णगा।
द्वयङ्गुष्ठानामिका वज्रा परिवर्त्याभिषेकदा॥ २॥

वज्ररत्नप्रयोगेण सा एव परिवर्तिता।
तर्जन्यग्रमुखा सङ्गादभिषेकन्ददाति सा॥ ३॥

सा एवाङ्गुष्ठज्येष्ठाभ्यां धर्मवज्रप्रयोगतः।
बध्वा ललाटगा चैव महाधर्माभिषेकदा॥ ४॥

कर्मवज्रां समाधाय ललाटे परिवर्त्य वै।
सर्वाभिषेकमालां तु स्थापयन्नभिषिञ्चति॥ ५॥

रत्नसंभवमुद्रां तु समयां वज्रधातुजां।
बध्वा रत्नप्रतिष्ठां तु ललाटे त्वभिषिच्यते॥ ६॥

अङ्गुष्ठा बन्धपर्यङ्का तर्जनीद्वयसन्धिता।
मणिमुखाग्रययोः कुर्यान्महावज्रमणिं लभेत्॥ ७॥

वज्रबन्धं समाधाय मणिमुष्टिं प्रसारयेत्।
मणिस्तु मध्यमाभ्यां तु मणिमालाभिषेकदा॥ ८॥

वज्रबन्धं समाधाय मध्यमा मणियोजिता।
द्वयग्रानामविकासा तु पद्मङ्कृत्वा तुं सिध्यति॥ ९॥

मध्यमाभ्यां मणिं बध्वा सर्वाङ्गुल्यः समुच्छिताः।
भावयंस्तु मणीनेव भवेत् सुपरिवारवान्॥ १०॥

वज्ररत्नं समाधाय [मध्यमाङ्]गुष्ठयोगतः।
समानामकनिष्ठा तु जिह्वा मुखे मणिप्रदा॥ ११॥

सा एव तर्जनी वज्रा तत्स्था एव तथाङ्कुशी।
तर्जन्या तर्जनी कर्षा [ताभ्यान्तुष्टिप्रदायि]का॥ १२॥

मध्यमाभ्यां मणिं बध्वा द्वयग्रसंकोचसंस्थिता।
बध्वानामाङ्गुलिमुखानङ्गुष्ठद्वयच्छादिता॥ १३॥

सा एव सूर्यावर्ता तु मूर्ध्नि बाहुप्रसारिता।
मणिं ध्वजाग्रकेयूरा हासयोगेन योजिता॥ १४॥

वज्रबन्धं समाधाय ज्येष्ठानाममुखोच्छ्रिता।
ताभिः पद्मं तु संभाव्य मध्यमाभ्यां मणीकृता॥ १५॥

सा एवान्त्यप्रदाना तु वज्रकोशप्रयोजिता।
वज्रचक्रप्रयोगा तु सा एव मुखतोद्धृता॥ १६॥

वज्ररत्नाङ्कुरां बध्वा सर्वाङ्गुल्यः प्रसारयेत्।
तां तु मूर्ध्नि प्रतिष्ठाप्य रत्नवृष्टिस्तु वर्षयेत्॥ १७॥

सा एव चक्रयोगा तु हृदि रत्नद्विधीकृता।
मणिग्रहाग्रदंष्ट्रा तु मुष्टिर्मध्यमसन्धिते॥ ति॥ १८॥

ततः समयमुद्राज्ञानं शिक्षयेत् ।

एता एव महामुद्राः संपुटीकृत्य बन्धयेत् ।
गुह्यगुह्याः समासेन सिद्धिन्दद्युश्चतुर्गुणम् ॥ इति ॥

यथावद् वज्रगुह्ये तु सर्वकालं न बन्धयेत् ।
अतः परं प्रवक्ष्यामि धर्भमुद्राः समासत ॥ इति ॥

त्रैः ग्रैः ह्रैः सैः ग्र्यः खः द्वर्यै : ह्रैः
ध्रैः ध्यैः क्रैः वैः क्र्यैः रैः य्यः मैः ।

गुह्यगुह्याग्रमुष्टिस्तु द्विधीकृत्य सर्वकर्मिका ॥ इति ॥

सर्वतथागतकर्मसमयात् महाकल्पराजाद् रत्नगुह्यमुद्रामण्डलविधिविस्तरः समाप्तः ॥

CHAPTER 21

JÑĀNA-MAṆḌALA-VIDHI-VISTARA

Emanation of deities from samādhi

अथ भगवान् पुनरपि सर्वतथागताभिषेकज्ञानसमयसंभवाधिष्ठानन्नाम समाधिं समापद्येमं स्वविद्योत्तममभाषत् **ओं सर्वतथागताभिषेकज्ञानोत्तम हूं ॥**

अथ वज्रपाणिर्महाबोधिसत्व इमं स्वविद्योत्तममभाषत् ओं वज्रज्ञानाभिषेकसमय हूं ॥

अथ वज्रगर्भो बोधिसत्वो महासत्व इमं स्वविद्योत्तममभाषत् ओं मणिरत्नाभिषेकज्ञान हूं ॥

अथ वज्रनेत्रो बोधिसत्वो महासत्व इमं स्वविद्योत्तममभाषत् ओं धर्माभिषेकज्ञान हूं ॥

अथ वज्रविश्वो बोधिसत्वो सहासत्वः इमं स्वविद्योत्तममभाषत् ओं सर्वाभिषेकज्ञान हूं ॥

Delineation of the maṇḍala

अथाकाशगर्भो बोधिसत्वो महासत्वः इदं स्वकुलज्ञानमण्डलममभाषत् ।

अथातः संप्रवक्ष्यामि ज्ञानमण्डलमुत्तमं ।
वज्रधातुप्रतीकाशं रत्नज्ञानमितिस्मृतं ॥ १ ॥
महामण्डलयोगेन सूत्रयेत्सर्वमण्डलं ।
हृदि चिह्नास्तु संलेख्या धर्ममण्डलयोगत ॥ इति ॥ २ ॥

अथात्र महामण्डले ज्ञानहृदयानि भवन्ति ।

ओं सर्वार्थसिद्धिज्ञान हूं ॥ १ ॥
ओं मणिज्ञान हूं ॥ २ ॥
ओं मणिज्ञानाङ्कुश ॥ ३ ॥
ओं मणिज्ञानराग ॥ ४ ॥
ओं मणिज्ञानतुष्टि ॥ ५ ॥
ओं ज्ञानदृष्टिमणि हूं ॥ ६ ॥
ओं ज्ञानाभिषेक ॥ ७ ॥
ओं मणिज्ञानसूर्य ॥ ८ ॥
ओं मणिज्ञानध्वज ॥ ९ ॥
ओं मणिज्ञानाट्टहास ॥ १० ॥
ओं मणिज्ञान पद्म हूं ॥ ११ ॥
ओं ज्ञानमणित्याग ॥ १२ ॥
ओं ज्ञानमणिकोश ॥ १३ ॥
ओं ज्ञानमणिचक्र ॥ १४ ॥

ओं ज्ञानमणिभाष ॥ १५ ॥
ओं ज्ञानमणिरत्नवर्ष ॥ १६ ॥
ओं मणिज्ञाननृत्यपूजासमय हूं ॥ १७ ॥
ओं मणिज्ञानरक्ष ॥ १८ ॥
ओं मणिज्ञानयक्ष ॥ १९ ॥
ओं मणिज्ञानमुष्टि ॥ २० ॥

Initiation into the maṇḍala

अथात्र मण्डले यथावद् विधिविस्तरं कृत्वा, शिष्यानेवं ब्रूयात् । "न त्वया अदृष्टधर्ममण्डलस्य वक्तव्यं; मा ते मरणकालः शीघ्रमेवासिद्धस्य स्याद्", इत्युक्त्वा, मणिकुलधर्मज्ञानान्युत्पादयेत् ।

वज्रगर्भं समालिख्य पटादिषु समाधिना ।
भावयन् याचयेदर्थान्देहि रत्न इति ब्रूवन ॥ १ ॥

वर्जगर्भं समालिख्य पटादिषु समाधिना ।
भावयन् याचयेद्रत्नां देहीति वाग् ब्रूवन् ॥ २ ॥

वज्रगर्भं समालिख्य पटादिषु विभावयन् ।
समापत्त्या तु सद्धर्मं देहि ज्ञानेति याचयन् ॥ ३ ॥

वज्रगर्भं समालिख्य पटादिषु विभावयन् ।
समापत्त्या तु सत्कर्मं देहीति याचयेदिति ॥ ४ ॥

तत्रैषां हृदयानि भवन्ति ।

ओं देहि सर्वार्थान् भगवन् वज्रगर्भ ॥
ओं देहि सर्वरत्नान् भगवन् वज्रगर्भ ॥
ओं देहि सद्धर्मं भगवन् वज्रगर्भ सत्सत्व ॥
ओं देहि सत्कर्मं भगवन् वज्रगर्भ ॥

आकाशे वान्यदेशे वाभावयं सुसमाहितः ।
आकाशगर्भं सत्सत्वं याचयेदर्थसंपदः ॥ १ ॥

आकाशे वान्यदेशे वा भावयं सुसमाहितः ।
आकाशगर्भं सत्सत्वं याचयन् रत्नसंचयं ॥ २ ॥

आकाशे वान्यदेशे वा भावयं सुसमाहितः ।
आकाशगर्भं सत्सत्वं याचयेद् धर्मसंपदः ॥ ३ ॥

आकाशे वान्यदेशे वा भावयं सुसमाहितः ।
आकाशगर्भं सत्सत्वं याचयेत्कर्मसंचयम् ॥ इति ॥ ४

अथैषां हृदयानि भवन्ति ।

ओं ज्ञानगर्भ देहि सर्वार्थान् ॥
ओं ज्ञानगर्भ देहि सर्वरत्नान् ॥
ओं ज्ञानगर्भ देहि सर्वधर्मान्
ओं ज्ञानगर्भ देहि सर्वकर्मान् ॥

वज्रगर्भं हृदि लिख्यं भावयं सुसमाहितः।
यदा तु हृदयं कंपेत् ततः सिद्धो धनं ददेत्॥ १॥

वज्रगर्भं ललाटे तु समालिख्य विभावयेत्।
यदा तु कंपते शीर्षमभिषेकं स लप्स्यति॥ २॥

वज्रगर्भं मुखे विध्वा भावयेत् तत्र एव हि।
यदा तु स्फुटते तत्तु तदा वागस्य सिध्यति॥ ३॥

वज्रगर्भं स्वमूर्धे तु प्रतिष्ठाप्य विभावयेत्।
यदा तु ज्वालते तत्तु तदैवोर्ध्वंगमो भवेद्॥ इति॥ ४

तत्रैषां हृदयानि भवन्ति।

ओं हृदय गर्भं देहि धनं॥
ओं रत्नाभिषेकगर्भाभिषिञ्च॥
ओं वाग्गर्भं सिध्य॥
ओं रत्नगर्भोष्णीषाकाशं गच्छ॥

वज्रगर्भमहामुद्रां भावयं सुसमाहितः।
याचयेद् देहि सिद्धिं मे **इलि-रत्नेति** सिध्यति॥ १॥

आकाशगर्भं समयीम्बध्वा तु सुममाहितः।
याचयेदभिषेकाणि **मिलि-रत्नेति** लप्स्यति॥ २॥

वज्रगर्भसमाधिन्तु भावयं सुसमाहितः।
याचयेद् देहि मे धर्मं **चिलि-रत्नेति** लप्स्यति॥ ३॥

आकाशगर्भकर्माग्रीं बध्वा तु सुसमाहितः।
याचे [त्सर्वर] त्नानि **किलि-रत्नेति** लप्स्यतीति॥ ४॥

अथैषां हृदयानि भवन्ति।

ओं इलि॥
ओं मिलि॥
ओं चिलि॥
ओं किलि॥

Mudrā

ततो मणिज्ञानरहस्यमुद्राज्ञानं[शिक्षयेत्॥]

द्वयेन्द्रियसमापत्त्या वज्रगर्भं तु भावयेत्।
आकाशे वान्यदेशे वा परां सिद्धिमवाप्नुते॥ १॥

द्वयेन्द्रियसमापत्त्या वज्रगर्भं तु भावयन्।
आलेख्य चित्रलिखितं प्राप्नुयादभिषेचनं॥ २॥

द्वयेन्द्रियसमापत्त्या वज्रगर्भं तु भावयन्।
तं प्रियं यस्य रमयेत्सर्वलोकं स रागयेत्॥ ३॥

द्वयेन्द्रियसमापत्त्या वज्रगर्भं तु भावयन्।
सर्वाकाशरजोविश्वैः सर्वसिद्धिर्भवेद्ध्रुवम्॥ इति॥ ४

तत्रासां हृदयानि भवन्ति।

आकाशगुह्यज्ञान साधय हूं॥
चित्रगुह्यज्ञानाभिषिञ्च हूं॥
प्रियानुस्मृतिज्ञानगुह्य सर्वलोकं रामय हूं॥
सर्वगुह्यज्ञान सर्वसिद्धिं मे प्रयच्छ हूं॥

ततो महामुद्रां यथावद् बध्नीयात्। तादृशा एव सिद्धिः। ततो वज्रमणिं वज्रज्ञानमण्डलयोगेन स्थापयेत्॥
अथ धर्ममुद्रा भवन्ति।

सः, राः, रा, साः, राः, तेः, केः, हाः,
धं, तीः, हे, भा, क, र, यः, सः।

कर्ममुद्रा समासेन यथा स्थानेषु संस्थयेद्॥ इति॥

सर्वतथागतकर्मसमयात् महाकल्पराजाज्ञान-मण्डलविधिविस्तरः परिसमाप्तः॥

CHAPTER 22

KARMA-MAṆḌALA-VIDHI-VISTARA

Emanation of deities from samādhi

अथ भगवान् पुनरपि सर्वतथागताभिषेककर्म-समयसंभवाधिष्ठानन्नाम समाधिं समापद्येमां स्वविद्योत्तममभाषत् **ओं सर्वतथागतकर्माभिषेके हूं**।

अथ वज्रपाणिर्महाबोधिसत्व इमां स्वकर्मसंभवां विद्योत्तमामभाषत् **ओं वज्रहुंकाराभिषेके**॥

अथ वज्रगर्भो बोधिसत्व इमां स्वविद्योत्तमामभाषत् **ओं सर्वाकाशसमताभिषेके हूं**॥

अथ वज्रनेत्रो बोधिसत्व इमां स्वविद्योत्तमामभाषत् **ओं सद्धर्माभिषेकरत्ने**॥

अथ वज्रविश्वो बोधिसत्व इमां स्वविद्योत्तमामभाषत् **ओं विश्वाभिषेके**॥

Delineation of the maṇḍala

अथाकाशगर्भो बोधिसत्वो महासत्व इदं स्वकुलकर्ममण्डलमभाषत्।

अथातः संप्रवक्ष्यामि कर्ममण्डलमुत्तमं।
वज्रधातुप्रतीकाशं रत्नकर्ममिति स्मृतं॥ १॥
महामण्डलयोगेन सूत्रयेत्सर्वं मण्डलं।
तस्य मध्ये यथान्यायं बुद्धबिम्बन्निवेशयेत्॥ २॥
महासत्वप्रयोगेण रत्नसत्व्यः समालिखेद्॥ इति॥॥ ३॥

तत्रासां मुद्रा भवन्ति।

ओं मणिरत्नपूजाग्र्य॥ १॥
ओं सर्वार्थसिद्धिवज्ररत्नाभिषेके हूं॥ २॥
ओं वज्रमणिधारिणिसमये हूं॥ ३॥
ओं मणिरत्नाकर्षे कर्मसमये हूं॥ ४॥
ओं मणिरत्नरागरति कर्मपूजे प्रवर्त॥ ५॥
ओं मणिरत्नसाधुकारपूजासमये॥ ६॥
ओं महामणिरत्नदृष्टद्याकर्षे॥ ७॥
ओं मणिरत्नमालापूजे॥ ८॥
ओं मणिरत्नसूर्यालोकपूजे॥ ९॥
ओं मणिरत्नध्वजपताकापूजे॥ १०॥
ओं मणिरत्नाट्टहासपूजे॥ ११॥
ओं पद्ममणिसमाधिसमये हूं॥ १२॥

ओं सर्वत्यागानुस्मृतिसमाधिकर्मकारि हूं ॥ १३ ॥
ओं मणिरत्नतीक्ष्णसमये च्छिन्द हूं ॥ १४ ॥
ओं मणिरत्नचक्रसमये हूं ॥ १५ ॥
ओं मणिरत्नभाषे वद वद हूं ॥ १६ ॥
ओं मणिरत्नवृष्टिकर्मसमये हूं ॥ १७ ॥
ओं मणिरत्नकर्मणि हूं ॥ १८ ॥
ओं मणिरत्नकवचे रक्ष हूं ॥ १९ ॥
ओं मणिरत्नदंष्ट्री खाद खाद हूं ॥ २० ॥
ओं मणिरत्नकर्ममुष्टि हूं ॥ २१ ॥
ओं मणिरत्नलास्ये पूजय होः ॥ २२ ॥
ओं मणिरत्नमालाभिषेके पूजय ॥ २३ ॥
ओं मणिरत्नगीते पूजय ॥ २४ ॥
ओं मणिरत्ननृत्ये पूजय ॥ २५ ॥
ओं मणिरत्नधूपे पूजय ॥ २६ ॥
ओं मणिरत्नपुष्पे पूजय ॥ २७ ॥
ओं मणिरत्नदीपे पूजय ॥ २८ ॥
ओं मणिरत्नगन्धे पूजय ॥ २९ ॥
ओं मणिरत्नाङ्कुश्याकर्षे ज्जः ॥ ३० ॥
ओं मणिरत्नपाशे हूं ॥ ३१ ॥
ओं मणिरत्नस्फोटे वं ॥ ३२ ॥
ओं मणिरत्नावेशे अः ॥ ३३ ॥

Initiation into the maṇḍala

अथात्र कर्ममण्डले यथावद्विधिविस्तरं कृत्वा प्रवेश्यैवं वदेत् । "न त्वया कस्यचिदयं वक्तव्यः । मा ते कर्मावरणधिष्ठितस्यैव मरणं भवेद्" इति, उक्त्वा, मणिकर्मज्ञानानि शिक्षयेत् ।

Mudrā

वज्रगर्भमहामुद्रां बध्वा तु समाहितः ।
पूजयं सर्वपूजाभिः सर्वबुद्धान् वशन्नयेत् ॥ १ ॥
बध्वा चैकतराम्मुद्रां समयग्रीं समाधिना ।
पूजयं सर्वबुद्धां हि स्वभिषेकां स लप्स्यति ॥ २ ॥
वज्रगर्भसमाधिं तु भावयं सुसमाहितः ।
पूजयं सर्वबुद्धांस्तु नाशयेज्जगदुत्तमं ॥ ३ ॥
बध्वा कर्ममयीं मुद्रां वज्रगर्भसमाधिना ।
पूजयं सर्वबुद्धांस्तु सवार्थां लभते क्षणाद् ॥ इति ॥ ॥ ४ ॥

तत्रैषां हृदयानि भवन्ति ।

ओं रत्नपूजा वशीकुरु ॥
ओं रत्नपूजासमयाभिषिञ्च ॥
ओं रत्नपूजाधर्म नाशय पापं ॥
ओं रत्नपूजाकर्म सर्वार्थान् मे दद ॥

अथ रहस्यमुद्राकर्मज्ञानं भवति ।

द्वयेन्द्रियसमापत्त्या वज्रगर्भसमाधिना ।
पूजयं सर्वबुद्धांस्तु सर्वलोकं स रागयेद् ॥ इति ॥

ततो यथावन्महामुद्राज्ञानेनोत्तमसिद्धय ॥ इति ॥

अथ समयमुद्राज्ञानं शिक्षयेत् ।

वज्ररत्नं समाधायस्थानेषु संस्थयेत् ।
वज्रकार्यप्रयोगेण यथावदनुपूर्वशः ॥

अथ धर्ममुद्राज्ञानं भवति ।

त्वः, जः, गः, ध्रुः, त्नः, जाः, तुः, सः,
मीः, क्ष्णः, नुः, षः, र्मः, क्षः, क्षः, धीः ।

वज्ररत्नां द्विधीकृत्य कर्ममुद्राः समाधयेद् ॥ इति ॥

सर्वतथागतकर्मसमयान् महाकल्पराजात् कर्ममण्डलविधिविस्तरः परिसमाप्तः ॥

CHAPTER 22b

EPILOGUE OF THE SARVA-TATHĀGATA-KARMA-SAMAYA NĀMA MAHĀ-KALPA-RĀJA

Maṇḍala IV. 5

Emanation of deities from samādhi

अथ भगवान् रत्नमुद्रान् नाम समाधिं समापद्येमां स्वविद्योत्तमामभाषत् **ओं वज्ररत्ने त्रां** ॥

अथ वज्रपाणिर्बोधिसत्वो महासत्व इमां स्वमुद्रामभाषत् **ओं वज्रमाले हूं** ॥

अथ वज्रगर्भो बोधिसत्वो महासत्व इमां स्वमुद्रामभाषत् **ओं मणिरत्ने** ॥

अथ वज्रनेत्रो बोधिसत्वो महासत्व इमां [स्वमु]द्रामभाषत् **ओं धर्मरत्ने** ॥

अथ वज्रविश्वो बोधिसत्वो महासत्व इमां स्वमुद्रामभाषत् **ओं विश्वदृष्टि** ॥

Delineation of the maṇḍala

अथार्याकाश[गर्भो बोधि]सत्व इदं मणिकुलचतुर्मुद्रामण्डलमभाषत् ।

अथातः संप्रवक्ष्यामि मुद्रामण्डलमुत्तमं ।
चतुर्मुद्राप्रयोगेण मण्डलं परिकल्पयेत् ॥

ततो यथावत् प्रवेश्य शिक्षयेत् "न त्वया कस्यचिद् वक्तव्यम्" इति ॥

Jñāna

ततो ज्ञानान्युत्पादयेत् ।

वज्ररत्नं समाधाय वज्ररत्नसमाधिना ।
ललाटे तु प्रतिष्ठाप्य सर्वसिद्धिमवाप्नुयाद् ॥ इति ॥

अथात्र हृदयं भवति ।

ओं वज्ररत्न सर्वाभिषेक सर्वसिद्धयो मे प्रयच्छ रल रल हूं त्रः ॥

Mudrā

ततो रहस्यमुद्रां दर्शयेत् ।

पतिं वापि प्रियां वापि स्त्रियं वा पुरुषोऽपि वा ।
ललाटद्वयसन्धानाच्चुम्बं द्वावपि सिध्यतः ॥

तत्रास्याः साधनहृदयं भवति **ओं वज्ररत्नसखि विद्याधर त्वं प्रयच्छ शीघ्रमभिषिञ्चाहि ह ह ह ह त्रः** ॥

ततो यथावच्चतुर्मुद्राबन्धं चतुर्विधं शिक्षयेत् । तथैव सिद्धय इति ॥

चतुमुद्रामण्डलं ॥

IV.6 Ekamudrā-maṇḍala of Sarvārthasiddhi

अथाकाशगर्भो बोधिसत्वो महासत्व इदं सर्वार्थसिद्धि नाम मण्डलमभाषत् **ओं वज्रमणि-धर सर्वार्थ-सिद्धिं मे प्रयच्छ हो भगवन् वज्ररत्न हूं ॥**

Delineation of the maṇḍala

अथात्र मण्डलं भवति ।

अथातः संप्रवक्ष्यामि महामण्डलमुत्तमं ।
यथावत्तु समालेख्यं सर्वसिद्धेस्तु मण्डलम् ॥ इति ॥

Mudrā

अथात्र ज्ञानरहस्यमुद्राज्ञानं शिक्षयेत् ।

रूपादीनां तु कामानामविरक्तः सुखानि तु ।
निर्यातयंस्तु बुद्धेभ्यः कल्पसिद्धिमवाप्नुत ॥ इति ॥

ततश्चतुर्विधं मुद्राज्ञानं शिक्षयेत् ॥
एवं पटादिषु सत्वं मुद्रां वा मण्डलेषु लिख्य साधयेदिति ॥

अथ सर्वतथागताः पुनः समाजमागम्याकाशगर्भं महाबोधिसत्वमनेन साधुकारदानेनाच्छादितवन्तः ।

साधु ते वज्रसत्वाय वज्ररत्नाय साधु ते ।
साधु ते वज्रधर्माय साधु ते वज्रकर्मणे ॥

सुभाषितमिदं सूत्रं वज्रयानमनुत्तरं ।
सर्वतथागतं गुह्यं महायानाभिसंग्रहम् ॥ इति ॥

सर्वतथागततत्वसंग्रहात्सर्वतथागतकर्मसमयो नाम महाकल्पराजः परिसमाप्तः ॥

PART V

Tantra, Uttara-tantra, and Anuttara-tantra of the Sarva-tathāgata-tattva-saṅgraha

CHAPTER 23

SARVA-KALPOPĀYA-SIDDHI-VIDHI-VISTARA-TANTRA

अथ वज्रपाणिर्महाबोधिसत्व इदं सर्वतथागतमहातत्वविधिविस्तरतन्त्रमुदाजहार। तत्र प्रथमं तावत् महा-मुद्रोत्तमसिद्धितन्त्रं भवति।

तथागतमहामुद्रां बध्वा सर्वखधातुषु।
बुद्धबिम्बानधिष्ठाय स्वहृदिस्तु प्रवेशयेत् ॥ १ ॥

इहैव जन्मनि वरं यदीच्छेदुत्तमं शिवं।
बुद्धत्वं तेन कामेदं न चेत् सिद्धिर्यथोपरि ॥ २ ॥

महामुद्रां समाधाय महातत्वमुदाहरन्।
पदशः सर्वमेवाहं भावयेत्सत्वयोगतः ॥ १ ॥

इहैव जन्मनि पदं यदीच्छेत् सौरित्वं शुभं।
आत्मनस्तेन कामेदं न चेत्सिद्धिर्यथोपरि ॥ २ ॥

अथ समयमुद्रोत्तमसिद्धितन्त्रं भवति।

यथा वज्रधरः सिद्धस्तथाहमिति भावयन्।
बुद्धसौरित्वमाप्नोति न चेत्सिद्धिर्यथोपरी-॥ ति ॥

अथ धर्ममुद्रोत्तमसिद्धितन्त्रं भवति।

स्वभावशुद्धया वाचा वै सर्वधर्मा इति ब्रूवन्।
बुद्धसौरित्वमाप्नोति न चेत्सिद्धिर्यथोपरी-॥ ति ॥

अथ कर्ममुद्रोत्तमसिद्धितन्त्रं भवति।

सर्वस्य सर्वशुद्धित्वात्सर्वकर्माणि शोधयन्।
बुद्धसौरित्वमाप्नोति न चेत्सिद्धिर्यथोपरी-॥ ति ॥

तथागतकुलोत्तमसिद्धयः ॥

अथ वज्रपाणिः स्वकुलोत्तमसिद्धितन्त्रमुदाजहार।

बुद्धाज्ञां सर्वसत्वार्थात् सर्वसिद्धिप्रयोगतः।
साधयंस्तु महामुद्रां बुद्धत्वमिह जन्मनी-॥ ति ॥

अथ समयोत्तमसिद्धितन्त्रं भवति।

यथा वज्रधरः सिद्धिस्तथाहमिति भावयन्।
महामुद्राप्रयोगेण क्षणात्सौरित्वमाप्नुत ॥ इति ॥

अथ धर्ममुद्रोत्तमसिद्धितन्त्रं भवति।

अनक्षरेषु धर्मेषु प्रपञ्चो न हि विद्यते।
इमं वदंस्तु धर्माग्रीं भावयन् सौरितां व्रजेद् ॥ इति ॥

अथ कर्ममुद्रोत्तमसिद्धितन्त्रं भवति।

यत्करोति हि कर्म वै शुभं वा यदि वाशुभं।
निर्यातयं जिनेष्वस्तु क्षणात्सौरितां व्रजेद् ॥ इति ॥

अथ वज्रपाणिर्महाबोधिसत्वः पद्मकुलोत्तमसिद्धितन्त्रमुदाजहार। तत्र प्रथमन्तावन्महामुद्रोत्तमसिद्धितन्त्रं भवति।

रागः शुद्धः स्वभावेन तीर्थिकैरवसन्यते।
तस्याविरागो धर्मोऽस्मिं महायाने तु सिध्यती-॥ ति ॥

अथ समयमुद्रोत्तमसिद्धितन्त्रं भवति।

अभ्यसंस्तु महामैत्रीन् समाधिदृढयोगतः।
स्फरेद्विधिवद्योगात् क्षणात्सौरित्वमाप्नुयाद् ॥ इति ॥

अथ धर्ममुद्रोत्तमसिद्धितन्त्रं भवति।

स्वभावशुद्धः संराग इति ब्रूयादिमं नयं।
रागपारमिताप्राप्ते क्षणात्सौरित्वमाप्नुयाद् ॥ इति ॥

अथ कर्ममुद्रोत्तमसिद्धितन्त्रं भवति।

दर्शनस्पर्शनाभ्यां तु श्रवणस्मरणेन वा।
स्यामहं सर्वसत्वानां सर्वदुःखान्तकस्थितिर् ॥ इति ॥

अथ वज्रपाणिर्महाबोधिसत्वो मणिकुलोत्तमसिद्धितन्त्रमुदाजहार। तत्र महामुद्रोत्तमसिद्धितन्त्रं भवति।

सर्वबुद्धाभिषेकोऽहं भवेयं वज्रगर्भवत्।
भावयं विभावयन् वै क्षणात्सौरित्वमाप्नुत ॥ इति ॥

अथ समयमुद्रोत्तमसिद्धितन्त्रं भवति।

भवेयं सर्वसत्वानां सर्वाशापरिपूरकः।
आकाशगर्भसदृशः क्षणात्सौरित्वमाप्नुत ॥ इति ॥

अथ धर्ममुद्रोत्तमसिद्धितन्त्रं भवति।

आत्मनस्तु समुत्सृज्य धनदानान् सुहर्षितः-।
वदन् धर्ममयीं मुद्रामिह सौरित्वमाप्नुत ॥ इति ॥

अथ कर्ममुद्रोत्तमसिद्धितन्त्रं भवति।

दारिद्राणां हितार्थाय धनोत्पादने तत्परः।
उद्योगात्सौरितां याति न चेत्सिद्धिर्यथोपरी-॥ ति ॥

सर्वकुलमुद्राणां बुद्धबोधिसत्वोत्तमसिद्धयवाप्तिविधिविस्तरः ॥

अथ वज्रपाणिर्महाबोधिसत्वः पुनरपि सर्वतथागत[समयसि]द्धितन्त्रमुदाजहार। तत्रायं सर्वतथागतसमय-सिद्धितन्त्रं भवति।

यस्य रागसमापत्तिस्तस्य रागेण शोधयेत् ।
इति बुद्धन्महामुद्रा ज्ञानस्य समयः स्मृतः ॥

अथ तथागतकुलसमयसिद्धितन्त्रं भवति ।

कामानामविरागस्तु समयः सुमहानयं ।
तथागतकुलशुद्धोऽनातिक्रम्यो जिनैरपि ॥

अथ वज्रकुलसमयसिद्धितन्त्रं भवति ।

अक्रोधस्यापि सत्वार्थान्महाक्रोधप्रदर्शनं ।
महावज्रकुले त्वेष समयो दुरतिक्रमः ॥

अथ पद्मकुलसमयसिद्धितन्त्रं भवति ।

स्वभावशुद्धिज्ञानेन तस्य कार्यं स करोति ।
महापद्मकुले त्वेष समयो दुरतिक्रमः ॥

अथ रत्नकुलसमयसिद्धितन्त्रं भवति ।

अल्पत्वे वा बहुत्वे वा यथाभिरुचितं पुनः ।
अवश्यो दिवसः कार्यो दानेन समयो ह्ययम् ॥ इति ॥

सर्वकुलसमयविधिविस्तरतन्त्रं ॥

अथवज्रपाणिर्महाबोधिसत्वः सर्वतथागतधर्ममुद्राज्ञानसिद्धितन्त्रमुदाजहार । तत्रेयं सर्वतथागतधर्मसिद्धितन्त्र भवति ।

बुद्धो धर्म इति ख्यात इत्युक्त्वा धर्मताक्षरं ।
बुद्धधर्ममहामुद्राज्ञानस्य परमनयं ॥

तत्रेदं तथागतकुलधर्मसिद्धितन्त्रं ।

रागाच्छ्रद्धतरन्नास्ति धर्मः सर्वसुखप्रदः ।
तथागतकुलेप्येष धर्मः सिद्धिकरः परः ॥

तत्रेदं वज्रकुलधर्मसिद्धितन्त्रं ।

बुद्धाज्ञाच्छोधनार्थाद्वा सत्वत्राणार्थतस्तथा ।
अक्रोधोऽपि हि संदुष्टान्मारयंच्छुद्धिमाप्नुते ॥

तत्रेदं पद्मकुलधर्मसिद्धितन्त्रं ।

अलिप्तं सलिलैः पद्मं तथा रागो न दुष्यति ।
इति ब्रूवन्नकार्याणि कुर्वं पापैर्न लिप्यते ॥

तत्रेदं मणिकुलसिद्धितन्त्रं ।

दानात्समो न धर्मोऽस्ति प्रतिपत्त्या ब्रवीति हि ।
महामणिकुले धर्मः न चेत्सिद्धिर्यथोपरी-॥ ति ॥

सर्वकुलधर्मसिद्धिविधिविस्तरतन्त्रम् ॥ ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतकुलकर्मसिद्धितन्त्रमुदाजहार । तत्रेदं तथागतकर्मसिद्धितन्त्रं भवति ।

बुद्धत्वं सर्वसत्वानां बोधिसत्वत्वमेव च।
यथावद्विनयं चैव कर्ममुद्राग्रसिद्धिदा ॥

तत्रेदं तथागतकुलकर्मसिद्धितन्त्रं भवति।

चतुर्विधाभिः पूजाभिः सदा योगाच्चतुर्विधं।
चतुःकालयोगेन कुर्वन् कर्माणि साधयेत् ॥

तत्रेदं वज्रकुलकर्मसिद्धितन्त्रम्।

दुष्टसत्वोपघाताय यद्यत्कार्यं करोति सः।
कर्मवज्रकुलेऽप्येष सर्वसिद्धिप्रदायकः ॥

तत्रेदं पद्मकुलकर्मसिद्धितन्त्रं।

भयात्मनामभयदो यथावद्विनयस्तथा।
एतत्पद्मकुले कर्म बुद्धसिद्धिप्रदायकं ॥

अथ मणिकुलकर्मसिद्धितन्त्रं।

अभिषेकस्तथा दानं सर्वाशापरिपूरयः।
बुद्धानां देहिनां चैव कर्म सर्वार्थसाधकम् ॥ इति ॥

सर्वकुलकर्मसिद्धिविधिविस्तरतन्त्रं ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतकुलधर्मतामुद्राज्ञानतन्त्रमुदाजहार। तत्रेदं तथागतधर्मताज्ञानसिद्धितन्त्रं भवति।

वज्रसत्वसमाधिस्तु बुद्धानां धर्मता स्मृता।
एतद्बुद्धस्य बुद्धत्वं न बुद्धो भवतेऽन्यतः ॥

तत्रेदं तथागतकुलधर्मताज्ञानसिद्धितन्त्रं।

भावयंस्तु महामुद्रां साधयेत्सर्वसिद्धयः।
तथागतकुलेऽप्येष धर्मतोत्तमसिद्धिदा ॥

तत्रेदं वज्रकुलधर्मताज्ञानसिद्धितन्त्रं ॥

बद्धाभिः समयाग्र्याभिः सर्वकर्माणि साधयेत्।
महामुद्राप्रयोगेण वज्रसिद्धिमवाप्नुयात् ॥

तत्रेदं पद्मकुलधर्मताज्ञानसिद्धितन्त्रं।

धर्ममुद्राप्रयोगेण धर्ममुद्राः प्रवर्तयेत्।
अनया साधयं धर्मान् धर्मतावज्रधर्मिणः ॥

तत्रेदं मणिकुलधर्मताज्ञानसिद्धितन्त्रं।

कर्ममुद्राप्रयोगेण कर्मवज्रं हृदि स्थितं।
भावयं धर्मतामेतामवाप्नोति स्वकर्मताम् ॥ इति ॥

सर्वकुलधर्मताज्ञानसिद्धितन्त्रं ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतकुलज्ञानसिद्धितन्त्रमुदाजहार। तत्रेदं तथागतज्ञानसिद्धितन्त्रं भवति।

वज्रसत्वसमाधिस्थः चन्द्रवज्रप्रयोगतः ।
यथा वर्णौ तु तौ वेत्ति तथा लोकं तु वेत्ति सः ॥ १ ॥

शुद्धे शुद्धमिति ज्ञेयं पाण्डरे तु प्रभास्वरं ।
रक्ते रक्ततरे क्रुद्धं यादृग्वर्णं तदात्मकं ॥ २ ॥

तत्रेदं तथागतकुलज्ञानसिद्धितन्त्रं ।

महामुद्रां समाधाय चन्द्रमण्डलसप्रभां ।
स्वयं कायं यथा वेत्ति तथा वेद्यं जगन्मनः ॥

तत्रेदं वज्रकुलज्ञानसिद्धितन्त्रं ।

आकाशे वान्यदेशे क्रुद्धः सन्मण्डलानि तु ।
यादृशानि तु पश्येद्वै विज्ञेयन्तादृशन्मनः ॥

तत्रेदं पद्मकुलज्ञानसिद्धितन्त्रं ।

सूक्ष्ममक्षरपङ्क्तिर्वा पश्यन्नाकाशभूमिषु ।
यादृग्वर्णं समासेन वेत्ति चित्तं स तादृशं ॥

तत्रेदं मणिकुलज्ञानसिद्धितन्त्रं ।

सर्वलोकं निरीक्षन् वै प्रतिभासो हि यादृशः ।
पश्यते तादृशं चैव जगच्चित्तं तु लक्षयेद् ॥ इति ॥

एतमेव समापत्त्यो गमनागमनानि तु ।
कुर्वन्त्यश्च भ्रमन्त्यो वा यथा पश्येत्तथागमः ॥ १ ॥

यस्य यस्य च सत्वस्य समापत्त्या तु चिन्तयेत् ।
तस्य तस्य तथा चैव सर्वचित्तानि बुध्यती-॥ २ ॥

त्याह भगवान् वज्रधरः ॥

सर्वकुलज्ञानविधिविस्तरतन्त्रं ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतकुलसिद्धिज्ञानतन्त्रमुदाजहार । तत्रेदं तथागतसिद्धिज्ञानतन्त्रं ।

सत्वाधिष्ठानयोगेन बुद्धबिम्बात्मभावना ।
अनेन ज्ञानयोगेन बुद्धसिद्धिमवाप्नुयात् ॥

तत्रेदं तथागतकुलसिद्धिज्ञानतन्त्रं ।

आकाशे वाऽन्यदेशे वा श्वेतपीताभमण्डलान् ।
स्वमुद्रासत्वमात्मानं साक्षादिव स पश्यति ॥

तत्रेदं वज्रकुलसिद्धिज्ञानतन्त्रं ।

तादृशेष्वेव बिम्बेषु मध्ये श्यामं निर्यच्छति ।
सिद्धिर्वज्रकुलस्याग्रा भवेच्छीघ्रं यदिच्छति ॥

तत्रेदं पद्मकुलसिद्धिज्ञानतन्त्रं ।

तान्येवाकाशनीलानि पद्माकाराणि पश्यति ।
महापद्मकुले विद्यासिद्धय संभवन्ति हि ॥

तत्रेदं मणिकुलसिद्धिज्ञानतन्त्रं ।

आकाशे वान्यदेशे वा त एवाकाशनिर्मलाः ।
स्फुरन्तो रश्मिमण्डानि पश्यत् सि[द्धिमवाप्नुया]द् ॥ इति ॥

वज्रसत्वादयः सत्वाचश्चन्द्रमण्डलसप्रभाः ।
प्राग् दर्शयन्ति चात्मानं सिद्धिकाले स्वरूपतः ॥
सर्वकुल[सिद्धिज्ञानवि]धिविस्तरतन्त्रं ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतकुलाभिज्ञासिद्धिज्ञानमुद्रातन्त्रमुदाजहार ।

तत्रेदं तथागता [भिज्ञासिद्धिज्ञान] तन्त्रं ।

वज्रसत्वसमाधिस्थः सर्वकाये तथागतान् ।
भावयन् बोधिसत्वांश्च दर्शयेत्कायतस्तथा ॥

तत्रेदं तथागतकुलाभिज्ञासिद्धि[तन्त्रं] ।

वज्रसत्वमहामुद्रां बध्वा तु सुसमाहितः ।
पञ्चाभिज्ञामवाप्नोति विधिनानेन साधकः ॥

तत्रेदं दिव्यचक्षुज्ञानं भवति ।

महामुद्रां समाधाय चक्षुर्विज्ञानमावहेत् ।
तेन यच्चिन्तयेत् किंचित् सुदूरापि पश्यती-॥

त्याह भगवान् वज्रसत्वः ॥

महामुद्रां समाधाय श्रोत्रविज्ञानमावहेत् ।
तेन यच्चिन्तयेत्कार्यं सुदूरस्थं शृणोति ही- ॥

त्याह भगवान् वज्रधरः ॥

महामुद्रां समाधाय मनोविज्ञानमावहेत् ।
तेन यं सत्वमुद्वीक्षेत् चित्तं जानाति तस्य सः ॥ १ ॥

महामुद्रां समाधाय आत्मनो वा परस्य वा ।
मनसा पश्यते रूपं यतो जन्म स आवहेद् ॥ २ ॥

इत्याह भगवान् वज्रपाणिः ॥

अथ ऋद्धिविधिज्ञानसिद्धिर्भवति ।

महामुद्रां समाधाय यां यां ऋद्धिमभीष्यति ।
यत्र वा तत्र वा तद्वै संदर्शयेत्समाधिने - ॥

त्याह भगवान् महाबोधिचित्तः ॥

तत्रेदं वज्रकुलाभिज्ञासिद्धितन्त्रं ॥

त्रिलोकविजयाग्रीं वै बध्वा तु सुसमाहितः ।
पञ्चाभिज्ञामवाप्नोति विधिनानेन साधकः ॥ १ ॥

क्रुद्धः सः सर्वकार्याणि यथावदनुपूर्वशः ।
दिव्यचक्ष्वादियोगेन सर्वाभिज्ञो भवेत् क्षणाद् ॥ २ ॥

इत्याह भगवान् वज्रसत्वः ।।

तत्रेदं पद्मकुलाभिज्ञासिद्धितन्त्रं ।

जगद्विनयमुद्राग्रीं सन्धाय सुसमाहितः ।
पञ्चाभिज्ञामवाप्नोति विधिनानेन साधकः ।। १ ।।

रागसक्तस्तु विधिवद्यथानुक्रमतस्तथा ।
दिव्यचक्ष्वादियोगेन सर्वाभिज्ञो भविष्यती—।। २ ।।

त्याह भगवान् लोकेश्वरः ।।

तत्रेदं मणिकुलाभिज्ञासिद्धितन्त्रं ।

सर्वार्थसिद्धिसन्मुद्रां बध्वा तु सुसमाहितः ।
पञ्चाभिज्ञामवाप्नोति विधिनानेन साधकः ।। १ ।।

बुद्धपूजां प्रकुर्वन्वै यथानुक्रमतस्तथा ।
दिव्यचक्ष्वादियोगेन पञ्चाभिज्ञां स पश्यती-।।

त्याह भगवानाकाशगभः ।।

सर्वकुलाभिज्ञाज्ञानविधिविस्तरतन्त्रः ।।

अथ भगवान् वज्रपाणिर्महाबोधिसत्वः सर्वतथागतकुलसत्यसिद्धितन्त्रमुदाजहार । तत्र तथागतसत्यसिद्धितन्त्रं भवति ।

सत्यानुपरिवर्तिन्या वाचा तु शपथक्रिया ।
पालयंस्तु महासत्यं लघु बुद्धत्वमाप्नुयाद् ।।

इत्याह भगवान् बुद्धः ।।

तत्रेदं तथागतकुलसत्यसिद्धितन्त्रं ।

समये शपथा कार्या तथागतकुलोद्गता ।
पालयन् वज्रसत्यं तु सिद्धिमग्र्यामवाप्नुत ।।

इत्याह भगवान् वज्रधरः ।
तत्रेदं वज्रकुलसत्यसिद्धितन्त्रं ।

वज्रधार्यासु शपथां कृत्वा तु दुरतिक्रमान् ।
पालयेत्सत्यमेतद्धि यदच्छेत् सिद्धिमुत्तमाम् ।।

इत्याह भगवान् वज्रधरः ।।

तत्रेदं पद्मकुलसत्यसिद्धितन्त्रं ।

सद्धर्मे शपथाङ्कृत्वा महापद्मकुलोत्तमं ।
पालयेत्सत्यसमयं यदिच्छेत् सिद्धिमुत्तमाम् ।।

इत्याह भगवान् [वज्रध]र्मः ।।

तत्रेदं मणिकुलसत्यसिद्धितन्त्रं ।

बुद्धपूजासु शपथां कृत्वा तु दुरतिक्रमान् ।
पालयेदुत्तमं सत्यमभिषेकं स लप्स्यती ।।

[त्याह भगवान्] बुद्धपूजः ॥

सर्वकुलशपथसिद्धितन्त्रं ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतसमयतत्वसिद्धितन्त्रमुदाजहार। तत्रेदं सर्वतथागतसमयतत्वसिद्धितन्त्रं भवति।

समयस्त्वमिति प्रोक्ते सर्वमुद्रान् कुलेष्वपि।
स्वयं बध्वा दृढं यान्ति ततः पश्चादसाधिता॥

इत्याह भगवान् महासमयसत्वः॥

तत्रेदं तथागतकुलसमयतत्वसिद्धितन्त्रं।

सुरतस्त्वमिति प्रोक्ते सर्वमुद्रा असाधिताः।
स्वयं बध्वा तु सिध्यन्ते तत्वचोदान् महात्मन॥

इत्याह भगवान् महासमयसत्वः॥

तत्रेदं वज्रकुलसमयतत्वसिद्धितन्त्रं।

एकहुंकारमात्रेण सर्वमुद्राः समासतः।
स्वयं बन्धेद् बन्धयेद्वापि स्वयं वापि परस्य वे-॥ ति॥

तत्रेदं पद्मकुलसमयतत्वसिद्धितन्त्रं।

सर्वशुद्ध इति प्रोक्ते स्वतो वापि परस्य वा।
स्त्रीसङ्गाद्यास्तु संयोगा न मोक्षं यान्ति सर्वश॥ इति॥

तत्रेदं मणिकुलसमयतत्वसिद्धितन्त्रं॥

ओंकारेणैव सिध्यन्ते सर्वमुद्राः समासतः॥
सर्वलोकेषु चैवाग्र्याः पूजाश्चैव स्वयंभुवाम्॥ इति॥

सर्वकुलसमयतत्वसिद्धिमुद्राविधिविस्तरतन्त्रं॥

अथ भगवान् वज्रपाणिर्महाबोधिसत्वः सर्वतथागतसिद्धिमुद्रातन्त्रमुदाजहार। तत्र सर्वतथागतसिद्धितन्त्रं भवति।

बुद्धमुद्रां तु संधाय तथागतमनुस्मरन्।
साधयन् सिध्यते शीघ्रं बुद्धबोधिरपि स्थिरा॥

तत्रेदं तथागतकुलसिद्धितन्त्रं।

वज्रसत्वमहामुद्रां बध्वा तु परिभावयन्।
पुरतो वज्रसत्वं च सिद्धिः शीघ्रतरा भवेत्॥

तत्रेदं वज्रकुलसिद्धितन्त्रं।

बध्वा तु समयाग्रीं वै वज्रसत्वसमाधिना।
भावयन् वज्रसत्वं च सिद्धिस्तु द्विगुणा भवेत्॥

तत्रेदं पद्मकुलसिद्धितन्त्रं।

बध्वा धर्ममयीं मुद्रां लोकेश्वरसमाधिना।
भावयन् लोकनाथं च सिद्धिस्तु द्विगुणा भवेत्॥

तत्रेदं मणिकुलसिद्धितन्त्रं।

कर्ममुद्रां समाधाय वज्रगर्भसमाधिना।
भावयन् वज्रगर्भं च सिद्धिस्तु द्विगुणा भवेत्॥

सर्वकुलसिद्धिविधिविस्तरतन्त्रं॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतसर्वसिद्धिसाधनतन्त्रमुदाजहार। तत्रेदं सर्वतथागतसिद्धिसाधनतन्त्रं।

आत्मनो वाथ परतो बुद्धानुस्मृतिसाधकः।
बध्वा वै सर्वमुद्रास्तु ततः सिध्यन्ति तत्क्षणाद्॥

इत्याह भगवान् बुद्धः॥

तत्रेदं तथागतकुलादिसर्वसिद्धिसाधनतन्त्रं।

साधयेत्सर्वमुद्रास्तु कामोऽहमिति भावयन्।
वज्रजापप्रयोगेण सर्वसिद्धयग्रसाधनम्॥

इत्याह भगवान् वज्रसत्वः॥

तत्रेदंवज्रकुलसर्वसिद्धिसाधनतन्त्रं।

वज्रबिम्बं स्वमात्मानं भावयन् [सुसमाहितः]।
बध्नीयात्सर्वमुद्रास्तु सिद्धिं यान्ति हि तत्क्षणाद्॥

इत्याह भगवान् सर्वतथागतवज्रः॥

तत्रेदं पद्मकुलसर्वसिद्धिसाधनतन्त्रं।

पद्मबिम्बं स्व[मात्मानं] भावयन् स्वयमात्मना।
सर्वज्ञानमयी सिद्धिर्महापद्मकुले स्मृते-॥

त्याह भगवानवलोकितेश्वरः॥

तत्रेदं मणिकुलसर्वसिद्धिसाधनतन्त्रं।

भावयेत्स्वयमात्मानं मणिरत्नंकरो ज्वालं।
सर्वपूजामयी सिद्धिर्महामणिकुले स्मृते-॥

त्याह भगवानाकाशगर्भः॥

सर्वकुलोत्तमसिद्धि विधिविस्तरतन्त्रः॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागताधिष्ठानमुद्रासिद्धितन्त्रमुदाजहार।

तत्रेदन्तथागताधिष्ठानसिद्धितन्त्रं।

वज्रधात्वीश्वरीं मुद्रां बध्वा तु सुसमाहितः।
हृद्यूर्णायां गले मूर्ध्नि स्थाप्य बुद्धैरधिष्ठयत॥

इत्याह भगवान् बुद्धः॥

तत्रेदं तथागतकुलाधिष्ठानसिद्धितन्त्रं भवति।

सत्ववज्रीन् दृढीकृत्य वज्रसत्वसमाधिना।
हृद्यूर्णायां तथा कण्ठे मूर्ध्नि स्थाप्याधितिष्ठयते ॥

इत्याह भगवान् वज्रसत्वः ॥

तत्रेदं वज्रकुलाधिष्ठानसिद्धितन्त्रं।

वज्रहूंकारमुद्रां वै बध्वा तु सुसमाहितः।
हृद्यूर्णाकण्ठमूर्धस्था समाधिष्ठानि तत्क्षणाद् ॥

इत्याह भगवान् वज्रनाथः ॥

तत्रेदं पद्मकुलाधिष्ठानसिद्धितन्त्रं।

वज्रपद्मां दृढीकृत्य लोकेश्वरसमाधिना।
हृद्यूर्णाकण्ठमूर्धस्था स्वधिष्ठापय कल्पत ॥

इत्याह भगवानवलोकितेश्वरः ॥

तत्रेदं मणिकुलाधिष्ठानसिद्धितन्त्रं।

महावज्रमणिं बध्वा वज्रगर्भसमाधिना।
हृद्यूर्णाकण्ठमूर्धस्था स्वधिष्ठानाय कल्पयेद् ॥

इत्याह भगवान् वज्रगर्भः ॥

सर्वकुलाधिष्ठानविधिविस्तरतन्त्रः ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागताभिषेकमुद्रासिद्धितन्त्रमुदाजहार। तत्रेदं तथागताभिषेकसिद्धितन्त्रं।

सज्ररत्नां समाधाय ललाटे तु प्रतिष्ठितां।
कृत्वा तु वज्ररत्नेभ्यामभिषिक्तो जिनेर्भवेद् ॥

इत्याह भगवान् बुद्धः ॥

तत्रेदं तथागतकुलाभिषेकसिद्धितन्त्रं।

वज्रधात्वीश्वर्याद्याभिर्बुद्धमुद्राभिरग्रतः ।
समारभ्य चतुःपार्श्वमालया त्वभिषिच्यती-॥ ति ॥

तत्रेदं वज्रकुलाभिषेकसिद्धितन्त्रं।

वज्राभिषेकमालां तु सन्धाय च ललाटगान्।
तया मालाभिषेकेण वज्रिणा सोऽभिषिच्यती-॥ ति ॥

तत्रेदं पद्मकुलाभिषेकसिद्धितन्त्रं।

धर्मवज्रीं समाधाय पुरः शीर्षे प्रतिष्ठितां।
तयाभिषिक्तो बुद्धैस्तु लोकेश्वर्येऽभिषिच्यती-॥

त्याह भगवानवलोकितेश्वरः ॥

तत्रेदं मणिकुलाभिषेकसिद्धितन्त्रं।

वज्ररत्नाङ्कुरां बध्वा ललाटे तु प्रतिष्ठितां।
तयाभिषिक्तो बुद्धैस्तु पूजैश्वर्येऽभिषिच्यती-॥

त्याह भगवानाकाशगर्भः ॥

सर्वकुलाभिषेकसिद्धितन्त्रं ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतसमाधिसिद्धितन्त्रमुदाजहार । तत्रेदं सर्वतथागतसमाधिसिद्धितन्त्रं ।

आहारतः सर्वबुद्धानां मुद्रां बध्वा समाहितः ।
जपन् वै मन्त्रविद्यास्तु शीघ्रं सिद्धिमवाप्नुते-॥

त्याह भगवान् बुद्धः ॥

तत्रेदं तथागतकुलसमाधिसिद्धितन्त्रं ।

समाधिर्वज्रधर्मेण सत्वाधिष्ठानयोगतः ।
हृन्मुद्रामन्त्रविद्यास्तु शीघ्रं सिध्यन्ति जापत ॥

इत्याह भगवान् बुद्धसमाधिः ॥

तत्रेदं वज्रकुलसमाधिसिद्धितन्त्रं ।

रागात्त्वमसि संभूतः क्रोधोऽहमिति भावयन् ।
हृन्मुद्रामन्त्रविद्यानामाशुसिद्धिकरं भवेद् ॥

इ[त्याह भगवा]न् वज्रधरः ॥

तत्रेदं पद्मकुलसमाधिसिद्धितन्त्रं ।

मैत्रीस्फरणतायोगः साधयेद्धृदयादयः ।
लोकेश्वरकुले जापः सिद्धिं शीघ्रं [तु ददाती-॥

त्या]ह भगवानार्यावलोकितेश्वरः ॥

तत्रेदं मणिकुलसमाधिसिद्धितन्त्रं ।

सर्वाकाशसमाधिस्तु भावयन् सुसमाहितः ।
हृन्मुद्रामन्त्रविद्यासु साधयन् सर्वगो भवेद् ॥

इत्याह भगवानाकाशगर्भः ॥

सर्वकुलसमाधिसिद्धिविधिविस्तरतन्त्रं ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतपूजामुद्रासिद्धितन्त्रमुदाजहार । तत्रेदं तथागतपूजासिद्धितन्त्रं ।

पूर्वं धूपादिभिः पूजां कृत्वा तु सुसमाहितः ।
ततस्तु सिद्धिकामो वै साधयन् सिद्धिमाप्नुयाद् ॥

इत्याह भगवान् बुद्धः ॥

तत्रेदं तथागतकुलपूजासिद्धितन्त्रं ।

गुह्यपूजाचतुष्ठेन पूजागुह्यमुदाहरन् ।
आत्मनिर्यातनाद्यैवां पूजां कुर्वंस्तु सिध्यती-॥

त्याह भगवान् वज्रसत्वः ॥

तत्रेदं वज्रकुलपूजासिद्धितन्त्रं ।

क्रोधवज्रमहापूजां क्रोधगुह्यमुदाहरन् ।
क्रोधमुष्टिं प्रकुर्वन् वै शीघ्रं सिध्येत् कुलं ममे-।।

त्याह भगवान् वज्रधरः ।।

तत्रेदं पद्मकुलपूजासिद्धितन्त्रं ।

गंभीरोदारसूत्रान्तप्रयोगसमुदाहृताः ।
निर्यातयन्मनोवाग्भिः शीघ्रं सिद्धिमवाप्नुयाद् ।।

इत्याह भगवानार्यावलोकितेश्वरः ।

तत्रेदं मणिकुलपूजासिद्धितन्त्रं ।

च्छत्रध्वजपताकाभिः राजपूजाभिरर्चयन् ।
सिध्यते मणिकुलं सर्वददन् दानानि वा सिध्यती-।।

त्याह भगवान् वज्रगर्भः ।।

स्वाधिष्ठानादिसंयुक्तो वज्रसत्वसमो भवेत् ।
चतुर्भिः प्रातिहार्यस्तु वज्रविश्वं समाधयेत् ।।

सर्वसिद्धय इत्याह भगवान् वज्रसत्वः ।।

सर्वकुलाधिष्ठानाभिषेकसमाधिपूजासिद्धिविधिविस्तरतन्त्रं ।।

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागता[भिज्ञाज्ञा]नसिद्धितन्त्रमुदाजहार । तत्रेदं तथागताभिज्ञाज्ञानसिद्धितन्त्रं भवति ।

काये बुद्धसमाधिस्तु स्वभिज्ञा सौगती त्वियं ।
तस्याः सुप्रति[वेदित्य]बौद्धीं सिद्धिमवाप्नुयाद् ।।

इत्याह भगवान् बुद्धः ।।

तत्रेदं तथागतकुलाभिज्ञाज्ञानसिद्धितन्त्रं ।

दिव्यचक्षवादयोऽभिज्ञा भावयन् सुसमाहितः ।
पञ्चाभिज्ञः स्वयंभूत्वा वज्रसत्वत्वमाप्नुयाद् ।।

इत्याह भगवान् वज्रसत्वः ।।

तत्रेदं वज्रकुलाभिज्ञाज्ञानसिद्धितन्त्रं ।

क्रोधाभिज्ञां समुत्पाद्य साधयन् सुसमाहितः ।
पञ्चाभिज्ञः स्वयंभूत्वा परां सिद्धिमवाप्नुयाद् ।।

इत्याह भगवान् वज्रधरः ।।

तत्रेदं पद्मकुलाभिज्ञाज्ञानसिद्धितन्त्रं ।

रागाभिज्ञां समुत्पाद्य भावयन् सुसमाहितः ।
पञ्चाभिज्ञः स्वयंभूत्वा शुद्धां सिद्धिमवाप्नुयाद् ।।

इत्याह भगवान् वज्रनेत्रः ।।

तत्रेदं मणिकुलाभिज्ञाज्ञानसिद्धितन्त्रं ।

पूजाभिज्ञां समुत्पाद्य भावयन् सुसमाहितः।
पञ्चाभिज्ञः स्वयंभूत्वा सर्वसिद्धिवरा भवेद्॥

इत्याह भगवान् वज्रधरः॥

सर्वकुलाभिज्ञाज्ञानसिद्धिविधिविस्तरतन्त्रं॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतबोधिज्ञानसिद्धितन्त्रमुदाजहार। तत्रेदं तथागतबोधिज्ञानसिद्धितन्त्रं।

वज्रसत्वसमाधिस्थो बुद्धानुस्मृतिमान् स्वयं।
बुद्धबोधिरियं ज्ञानं भावयन् सिद्धिमाप्नुयाद्॥

इत्याह भगवान् बुद्धः॥

तत्रेदं तथागतकुलमहाबोधिज्ञानसिद्धितन्त्रं।

वज्रसत्वसमाधिस्थो महामुद्रां तु भावयन्।
महाबोधिरियं ज्ञानं भावयन् सिद्धिमाप्नुयाद्॥

इत्याह भगवान् महाबोधिसत्वः॥

तत्रायं वज्रकुलमहाबोधिज्ञानसिद्धितन्त्रः।

क्रोधराजसमाधिस्थः समयाख्या करग्रहः।
महाबोधिरियं ज्ञानं भावयन् सिद्धिमाप्नुयाद्॥

इत्याह भगवान् वज्रधरः॥

तत्रेदं पद्मकुलमहाबोधिज्ञानसिद्धितन्त्रं।

लोकेश्वरसमाधिस्थो धर्ममुद्रां जपंस्तथा।
महाबोधिरियं ज्ञानं भावयन् सिद्धिमाप्नुयाद्॥

इत्याह भगवानवलोकितेश्वरः॥

तत्रेदं मणिकुलमहाबोधिज्ञानसिद्धितन्त्रं।

वज्रगर्भसमाधिस्थः कर्ममुद्रा सुकर्मकृत्।
महाबोधिरियं ज्ञानं भावयन् सिद्धिमाप्नुयाद्॥

इत्याह भगवानाकाशगर्भः॥

सर्वकुलमहाबोधिज्ञानसिद्धिविधिविस्तरतन्त्रः॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतानुरागणसिद्धितन्त्रमुदाजहार। तत्रेदं तथागतानुरागणसिद्धितन्त्रं।

सत्वार्थं च प्रकुर्वन् वै बुद्धबोध्यर्थिकः स्वयं।
बुद्धानुस्मृतिमां भूत्वा सर्वबुद्धानुरागणम्॥

इत्याह भगवान् वज्रागः॥

तत्रेदं तथागतकुलानुरागणसिद्धितन्त्रं।

यथा विषयवां भूत्वा वज्रसत्व[स्तु] साधयेत्।
तत्वचोदनया शीघ्रमनुरक्तः स सिध्यती-॥

त्याह भगवान् वज्रसत्वः॥

तत्रेदं वज्रकुलानुरागणसिद्धितन्त्रं ।

बुद्धाज्ञाकारितार्थं हि दुष्टानामभिचारुकैः ।
क्रोधान् सत्वविशुद्धयर्थमिदं वज्रानुरागणम् ॥

इत्याह भगवांस्त्रिलोकविजयः ॥

तत्रेदं पद्मकुलानुरागणसिद्धितन्त्रं ।

रागावलोकनं मैत्रीकारुण्य धर्मवादिता ।
सर्वाभयप्रदानं च सर्वबुद्धानुरागणम् ॥

इत्याह भगवान् वज्रनेत्रः ॥

तत्रेदं मणिकुलानुरागणसिद्धितन्त्रं ।

अभिषेकप्रदानं च प्रदानं धनसंचयं ।
तच्च बुद्धार्थतो योज्यमिदं बुद्धानुरागणम् ॥

इत्याह भगवानार्याकाशगर्भः ।

सर्वकुलानुरागणसिद्धिविधिविस्तरतन्त्रं ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतवशीकरणसिद्धितन्त्रमुदाजहार । तत्रेदं तथागतवशीकरणसिद्धितन्त्रं ।

रागो वै नावमन्तर्यो विशुद्धः सुखदस्तथा ।
सर्वसत्वार्थतो योग इदं बुद्धवशङ्करम् ॥

इत्याह भगवान् बुद्धः ॥

तत्रेदं तथागतकुलवशीकरणसिद्धितन्त्रं ।

कामं सेव्य सुखात्मा तु सुरतस्त्वमिति कुर्वन् ।
साधयेद् वज्रसत्वं तु तत्वचोदवशीकृतम् ॥

इत्याह भगवान् समन्तभद्रः ॥

तत्रेदं वज्रकुलवशीकरणसिद्धितन्त्रं ।

बुद्धाज्ञान् सत्वशुद्धयर्थमभयार्थं च देहिनां ।
बुद्धशासनरक्षार्थं मारयं वशमानयेद् ॥

इत्याह भगवान् वज्रहुंकारः ॥

तत्रेदं पद्मकुलवशीकरणसिद्धितन्त्रं ।

रागशुद्धिं परीक्षन् वै पद्मपत्रविकासतः ।
रञ्जेद्वा रागयेच्चैव विनयार्थं वशंकरम् ॥

इत्याह आर्यावलोकितेश्वरः ॥

तत्रेदं मणिकुलवशीकरणसिद्धितन्त्रं ।

सर्वबुद्धाभिषेकार्थं वज्ररत्नं दिनेदिने ।
शीर्षे स्थाप्याभिषिच्यतां सर्वबुद्धान् वशं नयेद् ॥

इत्याह भगवानाकाशगर्भः ॥

सर्वकुलवशीकरणसिद्धितन्त्रं॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतमारणसिद्धितन्त्रमुदाजहार। तत्रेदं तथागतमारणसिद्धितन्त्रं।

अपश्यं सर्वसत्वार्थं बुद्धतत्वा न शोधयन्।
मनसा कर्मवाग्भ्यां वा मारणसिद्धिमाप्तयाद्॥

इत्याह भगवांस्तथागतः॥

तत्रेदं तथागतकुलमारणसिद्धितन्त्रं।

अलाभात्सर्वसिद्धीनामनुद्योगात्कुलस्य च।
आस्फोटमहावज्रस्य मारयन् लघु सिध्यत॥

इत्याह भगवान् वज्रपाणिः॥

तत्रेदं वज्रकुलमारणसिद्धितन्त्रं।

अदुष्टदमनात्क्रोधादसत्वविनेयात् तथा।
आत्मनो दुःखदानाच्च हुंकारेण तु मारयेद्॥

इत्याह भगवान् वज्रधरः॥

तत्रेदं पद्मकुलमारणसिद्धितन्त्रं॥

अकारुण्यादमैत्र्यात्तु दुःसत्वानामशोधनात्।
आत्मनश्च विसंवादान् मारयन् सिद्धिमाप्नुयाद्॥

इत्याह भगवानवलोकितेश्वरः॥

तत्रेदं मणिकुलमारणसिद्धितन्त्रं।

अत्यागादात्मनोऽनर्थात् अर्थकारादनर्थतः।
दारिद्र्याच्चैव सत्वानां मारयन् सिद्धिमाप्नुयाद्॥

इत्याह भगवान् सर्वाशापरिपूरकः॥

केचिदप्राप्तियोगेन बुद्धानां मारणात्मकाः।
तेषामुद्धरणार्थाय लघु सिद्धिप्रदा वयम्॥

इत्याह भगवानार्यसमन्तभद्रः॥

सर्वकुलमारणसिद्धिविधिविस्तरतन्त्रं॥

अथ भगवान् वज्रपाणिर्महाबोधिसत्वः सर्वतथागतरक्षामुद्रासिद्धितन्त्रमुदाजहार। तत्रेदं तथागतरक्षासिद्धितन्त्रं।

सर्वसत्वापरित्यागो बुद्धपूजात्मता सदा।
नित्यं बुद्धमनस्कारो रक्षेयं परमाद्भुत-॥

इत्याह भगवान् बुद्धः॥

तत्रेदं तथागतकुलरक्षासिद्धितन्त्रं।

वज्रसत्वे सकृद्वारां नाममात्रपरिग्रहः।
इयं रक्षा तु महती शाश्वती सिद्धिदा क्षणाद्॥

इत्याह भगवान् वज्रधरः।

तत्रेदं वज्रकुलरक्षासिद्धितन्त्रं।

विद्यातन्त्रेषु संतोषः त्रिलोकविजयात्मता।
भक्तिर्वै वज्रहुंकारे रक्षेयं स्वपरस्य वे-॥

त्याह भगवान् वज्रहुंकारः ।।

तत्रेदं पद्मकुलरक्षासिद्धितन्त्रं ।

रागशुद्धिर्महामैत्री सत्वेषु अभयदानता ।
लोकेशनामजापश्च रक्षेयं परमाद्भुते-।।

त्याह भगवान् वज्रधर्मः ।

तत्रेदं मणिकुलरक्षासिद्धितन्त्रं ।

अबन्ध्यो दिवसः कार्यो यथा शक्त्या प्रयोगतः ।
त्यागेन बुद्धसत्वाभ्यां रक्षेयं परमाद्भुते-।।

त्याह भगवान् वज्ररक्षः ।।

सर्वकुलरक्षासिद्धिविधिविस्तरतन्त्रं ।।

अथ वज्रपाणिर्महाबोधिसत्वो भगवन्तमेतदवोचत् । "प्रतिगृहाण भगवन्निदं सर्वतथागतकुलतन्त्रं । येन सर्वसत्वाः सर्वकल्पैश्वर्यतयाधिगमं कृत्वा, शीघ्रमनुत्तरां सम्यक्संबोधिमभिसंभोत्स्यन्त" इति ।।

अथ भगवान् वज्रपाणये बोधिसत्वाय महासत्वाय साधुकारमदात् । "साधु साधु वज्रपाणे सुभाषितं, प्रतिगृहीतोऽस्माभिरधिष्ठितश्चे-"ति ।।

अथ सर्वतथागताः पुनः समाजमागम्य, वज्रपाणये महाबोधिसत्वाय साधुकाराण्यददन् ।

"साधु ते वज्रसत्वाय वज्ररत्नाय साधु ते ।।
वज्रधर्माय ते साधु साधु ते वज्रकर्मणे ।।
सुभाषितमिदं सूत्रं वज्रयानमनुत्तरं ।
सर्वतथागतं गुह्यं महायानाभिसंग्रहम् ।।" इति ।।

सर्वतथागततत्वसंग्रहात् सर्वकल्पोपायसिद्धिविधिविस्तरतन्त्रः परिसमाप्तः ।।

CHAPTER 24

SARVA-KULA-KALPA-GUHYA-VIDHI-VISTARA-TANTRA

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतगुह्यसिद्धितन्त्रमुदाजहार । तत्रादित एव सर्वतथागतोत्तमसिद्धि-गुह्यतन्त्रं ।

बुद्धबोधिसमाधिन्तु भावयन् सुसमाहितः ।
सुखेन लभ्यते बोधिरिति चिन्त्यावबुध्यती-॥

त्याह भगवान् सर्वतथागतः ॥

तत्रेदं तथागतकुलोत्तमसिद्धिगुह्यतन्त्रं ।

सत्ववज्रां हृदि बध्वा भार्या मे त्वमिति प्रिया ।
दृढीभव इति प्रोक्ते सर्वमुद्रास्तु साधयेत् ॥ १ ॥
अनेन विधियोगेन असिद्धापि स्वकर्मभिः ।
गुह्यभार्यामिति प्रोक्त्वा सुतरां सिद्धिमाप्नुयाद् ॥

इत्याह भगवान् सत्ववज्रः ॥

तत्रेदं वज्रकुलोत्तमसिद्धिगुह्यतन्त्रं ।

यथा तथा हि कुपितो वज्र-हुं-कारमुद्रया ।
मारयन् सर्वबुद्धांस्तु भयात् सिद्धि[न्ददङ्करेद् ॥

इत्याह] भगवान् सर्वतथागतहुङ्कारः ॥

तत्रेदं पद्मकुलोत्तमसिद्धिगुह्यतन्त्रं ।

समाधिमुद्रां सन्धाय निरीक्षन् वज्रदृष्टिना ।
स्वदारं परदारं वा प्रियां सिद्धिमवाप्नुयते-॥

त्याह भगवान् पद्मरागः ॥

तत्रेदं मणिकुलोत्तमसिद्धिगुह्यतन्त्रं ।

द्वयेन्द्रियसमापत्त्या सुखमग्रमिति ब्रूवन् ।
स्वेन्द्रियं सर्वबुद्धानां निर्यात्य लघु सिध्यती-॥

त्याह भगवान् मणिरागः ॥

सर्वकुलोत्तमसिद्धिगुह्यतन्त्रः ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतसमयसिद्धिगुह्यतन्त्रमुदाजहार। तत्रेदं तथागतसमयसिद्धिगुह्यतन्त्रं।

समयस्त्वमिति प्रोक्त्वा रागयेत्सर्वयोषितः ।
मा विरागय सत्वार्थं ध्रुवं बुद्धां स रागयेद् ॥

इत्याह भगवान् महावैरोचनः ।।

त त्रेदं तथागतकुलसमयसिद्धिगुह्यतन्त्रं ।

रागो हि नावमन्तव्यो रागयेत्सर्वयोषितः ।
वज्रिणो गुह्यसमयमिदं रक्षंस्तु सिध्यती-।।

त्याह भगवान् वैरोचनः ।।

तत्रेदं वज्रकुलसमयसिद्धिगुह्यतन्त्रं ।

मारयन्मारयेल्लोकं कायवाक्कर्मसत्क्रियैः ।
हूं-कारैस्तु विशुद्धयर्थं समयो ह्यर्थसिद्धिद ।।

इत्याह भगवान् त्रिलोकविजयः ।

तत्रेदं पद्मकुलसमयसिद्धिगुह्यतन्त्रं ।

रागः शुद्धात्मनां शुद्धो ह्यशुद्धस्तीर्थ्ययोगिनां ।
शुद्धात्मनां तु समयं पालयन् सिद्धिमाप्नुयाद् ।।

इत्याह भगवानवलोकितेश्वरः ।।

तत्रेदं मणिकुलसमयसिद्धिगुह्यतन्त्रं ।

बध्वा वज्रमणिं पूर्वं वज्रगर्भसमाधिना ।
दुष्टानां तु हरन्नर्थान् समयः सिद्धिदो भवेद् ।।

इ]त्याह भगवान् वज्ररत्नः ।।

सर्वकुलसमयसिद्धिगुह्यविधिविस्तरतन्त्रं ।।

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतधर्मसिद्धिगुह्यतन्त्रमुदाजहार । तत्रेदं तथागतधर्मसिद्धिगुह्यतन्त्रं ।

स्वभावशुद्धि धर्माणां भावयन् सुसमाहितः ।
सर्वकार्याणि कुर्वन् वै बोधीं सिद्धिमवाप्नुते-।।

त्याह भगवान् वज्रधातुः ।।

तत्रेदं तथागतकुलधर्मसिद्धिगुह्यतन्त्रं ।

सर्वसत्वानुरागश्च विषयेष्वविरागिता ।
रामारामणशुद्धिस्तु गुह्यधर्मः सुसिद्धिद ।।

इत्याह भगवान् वज्रगुह्यः ।।

तत्रेदं वज्रकुलधर्मसिद्धिगुह्यतन्त्रं ।

नासाहुंकारयोगेन सर्वदुष्टांस्तु मारयन् ।
सूक्ष्मवज्रसमाधिस्थः परां सिद्धिमवाप्नुयाद् ।।

इत्याह भगवान् धर्महुंकारः ।।

तत्रेदं पद्मकुलधर्मसिद्धिगुह्यतन्त्रं ।

सूक्ष्मवज्रप्रयोगेण रामयेत्सर्वयोषितः ।
धर्मसिद्धिमवाप्नोति वज्रधर्मसमाधिने-।।

त्याह भगवानवलोकितेश्वरः ।

तत्रेदं मणिकुलधर्मसिद्धिगुह्यतन्त्रं ।

द्वयेन्द्रियसमापत्त्या सर्वाशा परिपूरयन् ।
योषितां वा प्रियाणां वा सिद्धिमाप्नोत्यनुत्तराम् ।

इत्याह भगवान् वज्ररत्नः ॥

सर्वकुलधर्मसिद्धिगुह्यविधिविस्तरतन्त्रं ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतकर्मसिद्धिगुह्यतन्त्रमुदाजहार । तत्रेदं तथागतकर्मसिद्धिगुह्यतन्त्रं ।

वज्रसत्वसमाधिस्थो बुद्धानुस्मृतिभावकः ।
स्त्रीकायं प्रविशन्योन्या वशीकुर्यात्तु योषित ॥

इत्याह भगवान् वैरोचनः ॥

तत्रेदं तथागतकुलकर्मसिद्धिगुह्यतन्त्रं ।

वज्रसत्वसमाधिस्थो भगेन प्रविशंस्तथा ।
स्त्रिया काये स्फरेत्सम्यग् निश्चेष्टामपि रागयेद् ॥

इत्याह भगवान् वज्रागः ॥

तत्रेदं वज्रकुलकर्मसिद्धिगुह्यतन्त्रं ।

वज्रहुंकारमुद्रां वै बध्वा तु सुसमाहितः ।
प्रविशंस्तु भगे क्रुद्धः मनसा स तु पातयेद् ॥

इत्याह भगवान् वज्रसमयः ॥

तत्रेदं पद्मकुलकर्मसिद्धिगुह्यतन्त्रं ।

धर्मकर्ममयीमुद्रां बध्वा पद्मसमाधिना ।
भगेन प्रविशन् रक्षेदपि सर्वास्तु योषित ॥

इत्याह भगवान् वज्रपद्मः ।

तत्रेदं मणिकुलकर्मसिद्धिगुह्यतन्त्रं ।

कर्मवज्रमणिं बध्वा वज्ररत्नसमाधिना ।
भगेन प्रविशन् स्त्रीणां क्षणादाविश्य नर्तती-॥

त्याह भगवान् वज्ररत्नः ॥

सर्वकुलकर्मसिद्धिगुह्यविधिविस्तरतन्त्रं ॥

अथवज्रपाणिर्महाबोधिसत्वः सर्वतथागतमण्डलशुद्धिसिद्धिगुह्यतन्त्रमुदाजहार । तत्रेदं सर्वतथागतचक्रशुद्धि-सिद्धिगुह्यतन्त्रं भवति ।

धर्मचक्रसमाकारं कुर्याद्वा गुह्यमण्डलं ।
मुद्रा भार्या परिवृतं तत्र बुद्धन्निवेशयेत् ॥ १ ॥

प्रविष्ट्वैव हि तद्गुह्यं ब्रूयाद्बुद्धस्य तत्क्षणात् ।
"भार्या ह्येतास्तव विभो ददस्व मम सर्वद" ॥ २ ॥

एवं ब्रूवंस्तु सर्वेषु कुलमुद्रा नयेषु च ।
गुह्यसिद्धिमवाप्नोति बुद्धानामसमत्विषाम् ॥ ३ ॥

इत्याह भगवान् बुद्धः ॥

तत्रेदं तथागतकुलसर्वमण्डलसिद्धिगुह्यतन्त्रं ।

वज्रधातुप्रतीकाशं मण्डलं तु समालिखेत् ।
तथागतकुलानां तु सर्वेषां परमन्नयं ॥

[सिद्धिकामस्त्वाशु] ब्रूयात्प्रवि[ष्टैव तन्मण्डलं] ।
सुरते समयस्त्वंहोः, वज्रसत्वाद्य सिध्य मां ॥ 2 ॥

इदं जपंस्तु हृदयं साधयेत् सर्वसिद्धयः ।
[तत्वचोदनयोगे]न तुष्टः स त्वाशु सिध्यती-॥

त्याह भगवान् वज्रसत्वः ॥

तत्रेदं वज्रकुलसर्वमण्डलसिद्धिगुह्यतन्त्रं ।

त्रिलोकविजयाकारं सर्ववज्रकुलस्य हि ।
सर्वमण्डलयोगं तु संलिखेत विचक्षणः ॥ १ ॥

तं प्रविष्ट्वैव शीघ्रं वै ब्रूयात्सिद्धिं तु याचयन् ।
"रागात्त्वमसि संभूत", एवं सर्वेषु सिध्यती-॥ २ ॥

त्याह भगवान् वज्रहुंकारः ॥

तत्रेदं पद्मकुलमण्डलसिद्धिगुह्यतन्त्रं ।

जगद्विनययोगेन सर्वपद्मकुलेषु वै ।
मण्डलानि लिखेत्प्रज्ञस्तं प्रविष्ट्वैव वाग्वदेत् ॥ १ ॥

"रागधर्म महापद्म प्रसिध्य लघु मे विभो" ।
एवमुक्त्वा तु सर्वेषु मण्डलेषु स सिध्यती-॥ २ ॥

त्याह भगवानवलोकितेश्वरः ॥

तत्रेदं मणिकुलमण्डलसिद्धिगुह्यतन्त्रं ।

सर्वार्थसिद्धियोगेन मण्डलानि समालिखेत् ।
महामणिकुलानां तु तं प्रविष्ट्वैव वाग्वदेत् ॥ १ ॥

"सर्वाभिप्रायसिद्धीनां रागाशासिद्धिरुत्तमा ।
सिध्य सिध्य महासत्व भगवन् सर्वसिद्धये" ॥ २ ॥

एवं ब्रूवंस्तु सर्वेषु मण्डलेषु प्रवेशतः ।
महासिद्धिमवाप्नोति पूजागुह्यमनुत्तरं ॥ ३ ॥

ततः प्रभृति सिद्धात्मा साधयन् सिद्धयः सदा ।
यदा न लघु सिद्धिः स्यात् सिध्यन्ते तत्वचोदनैर् ॥ ४ ॥

इत्याह भ[गवान् वज्रसत्वः ॥]

सर्वकुलमण्डलसिद्धिगुह्यविधिविस्तरतन्त्रं ।।

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतसर्वमुद्रागुह्यसिद्धितन्त्रमुदाजहार । तत्रेदं तथागतमुद्रागुह्यसिद्धितन्त्रं।

तथागतमहादेव्यः प्रियाः सर्वसुखप्रदाः ।
सत्यानुपरिवर्तिन्या वास्सत्यैः सापि ता यन्न सिध्यत ।।

इत्याह भगवान् बुद्धः ।।

तत्रेदं तथागतकुलमहामुद्रागुह्यसिद्धितन्त्रं ।

महामुद्रां तु वै बध्वा यथावदनुपूर्वशः ।
इदं तत्वं रहस्यं च वज्रवाचा वदेत्वयं ।। १ ।।

वज्रसत्वः स्वयमहं त्वम्मे भार्या हृदि स्थिता ।
सर्वकायं परिष्वज्य वज्रगर्वे समुत्क्षिप ।। २ ।।

वज्रगर्वा महादेवी तत्वचोदानुरागिता ।
सर्वकाये दृढीभूत्वा यथावत्सिध्यते लघुर् ।। ३ ।।

इत्याह भगवान् वज्रगर्वापतिः ।।

तत्रेदं वज्रकुलसमयमुद्रागुह्यसिद्धितन्त्रं ।

"सिध्य सिध्याद्य समये समयोऽहं त्वं प्रिया मम" ।
इति चोदनया शीघ्रमनुरक्ता प्रसिध्यती-।।

त्याह भगवान् वज्रसत्वः ।।

तत्रेदं पद्मकुलधर्ममुद्रागुह्यसिद्धितन्त्रं ।

"बुध्य बुध्य महासत्वि भार्या मे त्वमतिप्रिया" ।
इति चोदनया शीघ्रमनुरक्ता तु सिध्यती-।।

त्याह भगवान् वज्रधर्मः ।।

तत्रेदं मणिकुलकर्ममुद्रागुह्य सिद्धितन्त्रं ।

"सर्वकर्मकरी भार्या त्वं मे सिध्याद्य वज्रिणि"।
इति चोदनया शीघ्रमनुरक्ता तु सिध्यती-।।

त्याह भगवानाकाशगर्भः ।।

सर्वकुलसर्वमुद्रा[गुह्यसि]द्धिविधिविस्तरतन्त्रं ।।

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतसमयगुह्यसिद्धितन्त्रमुदाजहार । तत्रेदं तथाग[तसमयगु]ह्य-सिद्धितन्त्रं ।

तीर्थिकानां हितार्थाय बुद्धभार्या प्रगोपिता ।
लेख्या मुद्रा प्रयोगेण इति विज्ञेय सिध्यती-।।

त्याह भगवान् सर्वतथागत[समयः ।।]

तत्रेदं तथागतकुलसमयगुह्यसिद्धितन्त्रं ।

सर्वसत्वमनोव्यापी सर्वसत्वसुखप्रदः ।
सर्वसत्वपिता चैव कामोऽग्रः समयाग्रिणाम् ॥

इत्याहुर्भगवन्तः सर्वतथागताः ॥

इदं तत्सर्वबुद्धानां रहस्यं परमाद्भुतं ।
विज्ञेय श्रद्दधच्छुद्धो दुःसाध्योऽपि हि सिध्यती-॥

त्याह भगवान् वज्रधरः ॥

तत्रेदं वज्रकुलसमयगुह्यसिद्धितन्त्रं ।

रागशुद्धचै विरक्तानां तीर्थ्यदृष्टिकृतात्मनां ।
मारणं समयं त्वग्रमिदं विज्ञेय सिध्यती-॥

त्याह भगवान् वज्रधरः ॥

तत्रेदं पद्मकुलसमयगुह्यसिद्धितन्त्रं ।

महाभूतोद्भवं सर्वं, कथं त्वशुचिरुच्यते ? ।
तीर्थिकानां विनाशाय ध्रुवं सिद्धिमवाप्नुयाद् ॥

इत्याह भगवान् वज्रनेत्रः ॥

तत्रेदं मणिकुलसमयगुह्यसिद्धितन्त्रं ।

स्त्रीप्रसङ्गात्तु रत्नानां संचयः क्रियते यदा ।
स्त्रियो ह्यनुत्तरं रत्नमिति चिन्त्यते सिध्यती-॥

त्याह भगवानाज्ञाकरः ॥

सर्वकलसमयगुह्यसिद्धिविधिविस्तरतन्त्रः ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतपूजागुह्यसिद्धितन्त्रमुदाजहार । तत्रायं तथागतपूजागुह्यसिद्धितन्त्रः ।

स्त्रीभिः परिवृतो भूत्वा परिहासक्रिया सुखं ।
निर्यात्य बुद्धपूजायां पूजासिद्धिमवाप्नुयाद् ॥

इत्याह भगवान् बुद्धः ।

तत्रेदं तथागतकुलपूजागुह्यसिद्धितन्त्रं ।

सुरतश्रमखिन्नस्तु तत्सौख्यं सुरतोद्भवं ।
चतुःप्रणामे पूजायां निर्यात्य लघु सिध्यती-॥

त्याह भगवान् वज्रधरः ॥

तत्रेदं वज्रकुलपूजागुह्यसिद्धितन्त्रं ।

हुंकारसमयां बध्वा परिष्वज्य स्त्रियं जनं ।
तत्परिष्वङ्गसौख्यं तु निर्यात्य हि स सिध्यती-॥

त्याह भगवान् वज्रहुंकारः ॥

तत्रेदं पद्मकुलपूजागुह्यसिद्धितन्त्रं ।

लोकेश्वरमहं भाव्य प्रियावक्त्रं निरीक्षन्वै ।
तन्निरीक्षणसौरव्यं तु निर्यात्य हि स सिध्यती-।

त्याह भगवान् पद्मनेत्रः ।।

तत्रेदं मणिकुलपूजागुह्यसिद्धितन्त्रं ।

कर्ममुद्राधरो भूत्वा सर्वाभरणभूषितः ।
स्त्रियं परिष्वज्य पूजायां विभूतिं निर्यात्य सिध्यती-।।

त्याह भगवान् वज्ररत्नः ।।

सर्वकुलपूजागुह्यसिद्धिविधिविस्तरतन्त्रं ।।

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतगुह्यपूजासिद्धितन्त्रमुदाजहार । तत्रेदं तथागतगुह्यपूजासिद्धितन्त्रं ।

रमयन् परदाराणि यथा [क]श्चिन्न वेदयेत् ।
भावयन् बुद्धमात्मानं पूजया सिद्धिमाप्नुयाद् ।।

इत्याह भगवान् बुद्धः ।।

तत्रेदं तथागत[कुल]गुह्यपूजासिद्धितन्त्रं ।

वज्रलास्यां समाधाय वज्रमालां तु बन्ध[येत्] ।
वज्रगीतां ततो बध्वा पूजयेद् वज्रनृत्यया ।।
का[मरत्याभिषेका]ग्र्या नृत्यगीतसुखात्सुखं ।
नान्यदस्ति हि तेनेयं गुह्यपूजा निरुत्तरा ।।

तत्रेदं वज्रकुलगुह्यपूजासिद्धितन्त्रं ।।

यथावद् विधियोगेन पूज[येद्] गुह्यपूजया ।
त्रिलोकविजयं भाव्य पूजासिद्धिम वाप्नुयाद् ।।

इत्याह भगवान् वज्रगुह्यः ।

तत्रेदं पद्मकुलगुह्यपूजासिद्धितन्त्रं ।

य[थावद् गु]ह्ययोगेन धर्ममुद्रा सुपूजयन् ।
जगद्विनयमुद्रास्थः पूजासिद्धिमवाप्नुते-।।

त्याह भगवानवलोकितेश्वरः ।।

तत्रेदं मणिकुलगुह्यपूजासिद्धितन्त्रं ।

यथावद् गुह्ययोगेन कर्ममुद्रा सुसाधयन् ।
सर्वार्थसिद्धियोगेन पूजासिद्धिमवाप्नुते-।।

त्याह भगवान् वज्रगर्भः ।।

सर्वकुलगुह्यपूजाविधिविस्तरतन्त्रं ।।

अथ भगवान् वज्रपाणिर्महाबोधिसत्वः सर्वतथागतकुलोद्घाटनगुह्यसिद्धितन्त्रमुदाजहार । तत्रेदं तथागत-तत्वोत्पत्तिसिद्धिगुह्यतन्त्रं ।

समाधिज्ञानसंभूतं बुद्धत्वं हि समासतः।
सत्वरागणयोगेन शीघ्रमाप्नोत्यनुत्तरम् ॥

इत्याह भगवांस्तथागतः।

तत्रेदं तथागतकुलमहातत्त्वोद्घाटनसिद्धिगुह्यतन्त्रं।

अनादिनिधनः सत्वः आकाशोत्पत्तिलक्षणः।
समन्तभद्रः सर्वात्मा कामः सर्वजगत्पतिः॥ १॥

यच्चित्तं सर्वसत्वानां दृढत्वात् सत्वनुच्यते।
समाधानाद् वज्रसमो निश्चयैर्याति वज्रतां॥ २॥

सत्वाधिष्ठानयोगेन वज्रसत्वः पुनर्भवेत्।
स एव भगवान् सत्वो वज्रकायस्तथागतः॥ ३॥

स्वचित्तप्रतिवेधादिबुद्धबोधिर्यथाविधि ।
स एव भगवान् सर्वतथागतकुलं भवेद्॥

इत्याह भगवाननादिनिधनसत्वः॥

तथागतकुलं सैव सैव वज्रकुलं स्मृतं।
सैव पद्मकुलं शुद्धं सैवोक्तं मणिसत्कुलम्॥

इत्याह भगवान् सर्वतथागतचक्रः॥

सर्वकुलोत्पादनगुह्यसिद्धिविधिविस्तरतन्त्रं॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतमुद्राचिह्नाभिधानसिद्धिगुह्यतन्त्रमुदाजहार। तत्रेदं तथागतचिह्नाभिधानसिद्धिगुह्यतन्त्रं भवति।

स एव भगवान् सत्वो वज्रसत्वो हृदि स्थितः।
समाधानात्समाधिस्तु बुद्धबोधिप्रसाधक॥

इत्याह भगवान् बुद्धः॥

तत्रेदं तथाकुलचिह्नाभिधानसिद्धिगुह्यतन्त्रं।

वज्रं सुप्रतिवेधत्वादङ्कुशं ग्रहमोचकः।
सूक्ष्मवेधितया वाणं साधुकारस्तु तुष्टितः॥ १॥

रत्नस्तु रचनादुक्तः सूर्यस्तेजो विधानतः।
केतुः समुच्छ्रयः प्रोक्तः स्मितो हासस्तु कीर्तितः॥ २॥

रागशुद्धितया पद्मं कोशः क्लेशारिच्छेदनात्।
चक्रो मण्डलयोगात्तु वाग्लापाज्जपनुच्यते॥ ३॥

सर्ववज्रं तु विश्वत्वाद् वर्मदुर्भेद्ययोगतः।
दंष्ट्रा भीषणयोगात्तु बन्धो मुद्राप्रयोगतः॥ ४॥

यथा हि भगवान् शाश्वो वज्रसत्वस्तु सर्वगः।
तथा वज्रां तु चिह्नादि भावयन्निति सिध्यती–॥

त्याह भगवान् सर्वतथागतचिह्नः ।

सर्वकुलचिह्नाभिधानसिद्धिगुह्यतन्त्रं ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतमुद्राबन्धोत्पत्तिसिद्धिगुह्यतन्त्रमुदाजहार । तत्रेदं तथागतमुद्रा-बन्धोत्पत्तिसिद्धिगुह्यतन्त्रं ।

बध्वा वै वज्रपर्यङ्कङ्कराभ्यां वज्रबन्धतः ।
वज्रसत्वसमाधिस्थः शीघ्रं बुद्धत्वमाप्नुयाद् ॥

इत्याह भगवान् बुद्धः ॥

[तत्रे]दं तथागतकुलमुद्राबन्धोत्पत्तिसिद्धिगुह्यतन्त्रं ।

यथा राज्ञां स्वमुद्राभिः मुद्रयते राजशासनं ।
महात्मनां स्वमुद्राभिरामुद्रयन्ते तथा जनाः ॥ १ ॥
कायवाक्चित्तवज्राणां प्रतिबिम्बप्रयोगतः ।
महात्मनां महामुद्रा इति विज्ञाय सिध्यती-॥ २ ॥

त्याह भगवान् महामुद्रः ॥

तत्रेदं वज्रकुलमुद्राबन्धोत्पत्तिसिद्धिगुह्यतन्त्रं ।

यथाहि समयैस्तीव्रैः कश्चिद्बन्धो भवेज्जनः ।
अनतिक्रमणीयैस्तु तथा सर्वतथागताः ॥ १ ॥
बद्धा हि वज्रबन्धाग्र्यमुद्रासमयबन्धनैः ।
नातिक्रमन्त्यामरणादिति विज्ञाय सिध्यती-॥

त्याह भगवान् वज्रसमयः ॥

तत्रेदं धर्मकुलमुद्रावन्धोत्पत्तिसिद्धिगुह्यतन्त्रं ।

अनतिक्रमणीया हि वज्रवास्सर्वशो जिनैः ।
अयं बन्ध इति ज्ञात्वा धर्ममस्य प्रसिध्यती-॥

त्याह भगवान् वज्रधर्मः ॥

तत्रेदं कर्मकुलमुद्राबन्धोत्पत्तिसिद्धिगुह्यतन्त्रं ।

अनतिक्रमणीया हि वज्राज्ञा कर्मभूरि च ।
आज्ञावतस्तु तत्कर्म विज्ञाय लघु सिध्यती-॥

त्याह भगवान् वज्रः ॥

सर्वकुलमुद्राबन्धोत्पत्तिसिद्धिविधिविस्तरगुह्यतन्त्रं ॥

अथ खलु भगवान् वज्रपार्णि महाबोधिसत्वमेवमाह । "इदमपि मया भगवन् परिगृहीतमधिष्ठितं चे-"ति ॥

अथ सर्वतथागताः पुनः समाजमागम्य वज्रपाणये सर्वतथागताधिपतये साधुकाराण्यददुः ।

साधु ते वज्रसत्वाय वज्ररत्नाय साधु ते ।
वज्रधर्माय ते साधु साधु ते वज्रकर्मणे ॥
सुभाषितमिदं सूत्रं वज्रयानमनुत्तरं ।
सर्वतथागतं गुह्यं महायानाभिसंग्रहम् ॥ इति ॥

सर्वतथागततत्वसंग्रहात्सर्वकुलकल्पगुह्यविधिविस्तरतन्त्रं समाप्तं ॥

CHAPTER 25

SARVA-KALPA-GUHYOTTARA-TANTRA-VIDHI-VISTARA

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतधर्मोत्तमसिद्धितन्त्रमुदाजहार। तत्रेदं तथागतधर्मोत्तमसिद्धितन्त्रं

बुद्धधर्मसमाधिं तु भावयन् सुसमाहितः।
बुद्धानुस्मृतियोगेन सिद्धिमाप्नोत्युत्तमाम् ॥

इत्याह भगवांस्तथागतः ॥

तत्रेदं तथागतकुलधर्मोत्तमसिद्धितन्त्रं।

सर्वसत्वसमाधिस्थः भावयन् सुसमाहितः।
रागानुस्मृतियोगेन प्राप्नुयात् सिद्धिमुत्तमाम् ॥

इत्याह भगवान् सर्वतथागतसमाधिः ॥

तत्रेदं वज्रकुलधर्मोत्तमसिद्धितन्त्रं।

त्रिलोकविजयाकारं भावयन् पुरतस्तथा।
वज्रपाणिबलो भूत्वा त्रिलोकविजयी भवेद् ॥

इत्याह भगवान् वज्रसत्वः ॥

तत्रेदं पद्मकुलधर्मोत्तमसिद्धितन्त्रं।

जगद्विनयधर्मं तु भावयन् पुरतस्त[था।]
सर्वाकारवरोपेतं विनयं प्रकरोति स ॥

इत्याह भगवान् वज्रधर्मः ॥

तत्रेदं मणिकुलधर्मोत्तमसिद्धितन्त्रं।

सर्वार्थसिद्धिरा[कारं भावयन् पुरतस्तथा।
सर्वाकारवरोपेतमर्थसंपत्स लप्स्यते-॥

त्याह भगवान् वज्रपाणिः ॥

सर्वकुलधर्मोत्तमसिद्धिविधिविस्तरतन्त्रं ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतधर्मसमयसिद्धितन्त्रमुदाजहार। तत्रेदं तथागतधर्मसमयसिद्धितन्त्रं।

बुद्धा[नुस्मृ]तिमां भूत्वा **वज्र वज्र** इति ब्रूवन्।
सूक्ष्मवज्रप्रयोगेण बुद्धसिद्धिमवाप्नुते-॥

त्याह भगवान् बुद्धः ॥

तत्रेदं तथागतकुलधर्मसमयसिद्धितन्त्रं।

वज्रसत्वसमाधिन्तु भावयन् सूक्ष्मवज्रतः।
वज्रसत्वत्वमाप्नोति **वज्रसत्व**मुदाहरन् ॥

इत्याह भगवान् वज्रसत्वः ॥

तत्रेदं वज्रकुलधर्मसमयसिद्धितन्त्रं ।

त्रिलोकविजयाकारन् संस्मरन् पुरतस्तथा ।
हुं हुंहुं हुमिति प्रोच्य सिद्धिमाप्नोत्यनुत्तराम् ॥

इत्याह भगवान् वज्रहुंकारः ।

तत्रेदं पद्मकुलधर्मसमयसिद्धितन्त्रं ।

जगद्विनयरूपं तु भावयन् सूक्ष्मवज्रतः ।
शुध्य शुध्य इति प्रोच्य उत्तमां सिद्धिमाप्नुते-॥

त्याह भगवान् वज्रधर्मः ।

तत्रेदं मणिकुलधर्मसमयसिद्धितन्त्रं ।

सर्वार्थसिद्धिरूपं तु भावयन् सूक्ष्मवज्रतः ।
सिध्य सिध्य इति प्रोच्य अर्थसिद्धिः परा भवेद् ॥

इत्याह भगवान् मणिधर्मः ॥

सर्वकुलधर्मसमयसिद्धिविधिविस्तरतन्त्रं ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतसद्धर्मज्ञानसिद्धितन्त्रमुदाजहार । तत्रेदं सर्वतथागतसद्धर्मज्ञानसिद्धितन्त्र ।

अनक्षरं तु सद्धर्मं समाधिज्ञानसंभवं ।
अकारस्तेन धर्माणामनुत्पाद इति स्मृतः ॥ १ ॥

अनेन मुद्राप्रयोगेण भावयन् प्रज्ञया ततः ।
सर्वाक्षरमयं ज्ञानं सिध्यते सौगतं क्षणाद् ॥ २ ॥

इत्याह भगवान् आर्यमञ्जुश्रीसर्वतथागतः ॥

तत्रेदं तथागतकुलसद्धर्मज्ञानसिद्धितन्त्रं ।

सर्वतथागतं तत्वमिदं सूत्रं तु श्रद्दधन् ।
धारयन् वाचयन् श्राद्धः सिद्धिमाप्नोत्यनुत्तराम् ॥

इत्याह भगवान् वज्रसत्वः ।

तत्रेदं वज्रकुलसद्धर्मज्ञानसिद्धितन्त्रं ।

पापसत्वहितार्थाय बुद्धाज्ञाकरणाय च ।
दुष्टानां विनयार्थाय मारणेन तु सिध्यती-॥

त्याह भगवान् वज्रकुलः ॥

तत्रेदं पद्मकुलसद्धर्मज्ञानसिद्धितन्त्रं ।

स्वभावशुद्धिमागम्य परमार्थमिति स्मृतं।
भावयन्निदमाद्यं तु धर्मेणाशु प्रसिध्यती-॥

त्याह भगवानवलोकितेश्वरः॥

तत्रेदं मणिकुलसद्धर्मज्ञानसिद्धितन्त्रं।

सर्वसत्वार्थदानं च सर्वाशापरिपूरये।
इमं मणिकुले धर्मं भावयन्नाशु सिध्यती-॥

त्याह भगवान् धर्मरत्नः॥

सर्वकुलसद्धर्मज्ञानसिद्धिविधिविस्तरतन्त्रं॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतसमाधिकर्मसिद्धितन्त्रमुदाजहार। तत्रेदं तथागतसमाधिकर्मसिद्धितन्त्रं।

समाधिकर्म बुद्धानां बुद्धबोधिप्रसाधकं।
इदं भावयमानस्तु परां सिद्धिमवाप्नुयाद्॥

इत्याह भगवान् बुद्धः॥

तत्रेदं [तथागत] कुलसमाधिकर्मसिद्धितन्त्रं॥

वज्रसत्वसमाधीनामुत्तमं कर्मभूरि च।
सर्वसत्वकरं विश्वमिति भावेन सिध्यती-॥

त्याह भगवान् वज्रः॥

तत्रेदं वज्रकुलसमाधिकर्मसिद्धितन्त्रं।

पापशुद्धिनिमित्तं हि सर्वपापप्रदामकं।
मारणं सर्वसत्वानां श्रद्दधानात्तु सिध्यती-॥

त्याह भगवान् वज्री॥

तत्रेदं पद्मकुलसमाधिकर्मसिद्धितन्त्रं।

सर्वपापविशुद्धात्मा सर्वशुद्धया करोति सः।
सर्वकार्याणि कर्मेयमिति भावेन सिध्यति॥

इत्याह भगवान् पद्मः॥

तत्रेदं मणिकुलसमाधिकर्मसिद्धितन्त्रः।

सर्वाशिनां दरिद्राणां सर्वाशाः परिपूरयन्।
सर्वार्थसिद्धिः सर्वात्मा सिध्यते नात्र संशय॥

इत्याह भगवान् रत्नध्वजः॥

सर्वकुलसमाधिकर्मसिद्धिविधिविस्तरतन्त्रः॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतसूक्ष्मज्ञानसिद्धितन्त्रमुदाजहार। तत्रेदं तथागतसूक्ष्मज्ञानसिद्धितन्त्रं भवति।

सूक्ष्मवज्रविधिं शाश्वत् योजयं सर्वभावतः।
सर्वाकारवरोपेतां पञ्चाभिज्ञामवाप्नुयाद् ॥

इत्याह भगवान् बुद्धः ॥

तत्रेदं सर्वतथागतकुलसूक्ष्मज्ञानसिद्धितन्त्रं ।

नानाचार्यस्य नान्यस्य नाशिष्यस्यासुतस्य वा ।
पुरतः प्रकाशयेन्मुद्राः सिद्धिरासां सुगुह्यत ॥

इत्याह भगवान् वज्रधरः ।

तत्रेदं वज्रकुलसूक्ष्मज्ञानसिद्धितन्त्रं ।

सूक्ष्मवज्रप्रयोगेण नासा हुं-कारयोगतः ।
वज्रक्रोधसमाधिस्थः सर्वकार्याणि साधयेद् ॥

इत्याह भगवान् वज्रः ॥

तत्रेदं पद्मकुलसूक्ष्मज्ञानसिद्धितन्त्रं ।

वज्रदृष्टिं समाधाय सूक्ष्मवज्रप्रयोगतः ।
महापद्मसमाधिस्थः रागसिद्धिमवाप्नुयाद् ॥

इत्याह भगवान् पद्मरागः ॥

तत्रेदं मणिकुलसूक्ष्मज्ञानसिद्धितन्त्रं ।

दीप्तदृष्टिः सुसूक्ष्मा तु वज्ररत्नसमाधिना ।
सूक्ष्मवज्रप्रयोगेण सर्वार्थाकर्षो भवेद् ॥

इत्याह भगवान् वज्रपाणिः ।

सर्वकुलसूक्ष्मज्ञानसिद्धितन्त्रं ॥ ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतचक्षुर्ज्ञानसिद्धितन्त्रमुदाजहार । तत्रेदं तथागतचक्षुर्ज्ञानसिद्धितन्त्रं ।

यदा मुद्रा समाधिर्वा साधनायोपयुज्यति ।
तदा खे धातवः शुभ्रास्तारकाकाराः स पश्यति ॥ १ ॥

तदा जानीत मतिमां बुद्धचक्षुरिदं मम ।
ततः प्रभृति बुद्धानां सर्वकल्पानि साधयेद् ॥ २ ॥

इत्याह भगवान् बुद्धः ॥

तत्रेदं तथागतकुलचक्षुर्ज्ञानसिद्धितन्त्रं ।

यावन्तो भावा विद्यन्ते स्थावरा जंगमास्तथा ।
तेषां प्रतिबिम्बानि पश्यति खे प्रधावतः ॥ १ ॥

आगच्छं गच्छतो वै वज्रचक्षुर्विशुद्धितां ।
जानन्वै पूजया सिद्धिमाप्नोत्यनुत्तराम् ॥ २ ॥

इत्याह भगवान् वज्रसत्वः ॥

तत्रेदं वज्रकुलचक्षुर्ज्ञानसिद्धितन्त्रं।

सव्यापसव्यवर्तिभ्यो खे तः पश्यति चक्षुषा।
आकाशधातवः शीघ्रं भ्रमन्तो अंभ्रसन्निभाः ॥ १ ॥

तां दृष्ट्वा न हि बिभ्येत मुद्रास्ता वज्रसंभवाः।
तेषां ग्रहणतो मुद्राः सिध्यन्ते मुद्रचक्षुषा ॥ २ ॥

इत्याह भगवान् वज्रः ॥

तत्रेदं पद्मकुलचक्षुर्ज्ञानसिद्धितन्त्रं।

श्वेतां रक्तां सितां पीतां यदा पश्यन्ति मण्डलान्।
तदाभि[प्रायं वै] यान्ति सिध्यन्ते वज्रचक्षुषा ॥ २ ॥

इत्याह भगवानवलोकितेश्वरः ॥

तत्रेदं मणिकुलचक्षुर्ज्ञानसिद्धितन्त्रं।

आकाशे रत्नसंकाशा हिरण्यादिषु सादृशाः।
यदा तु पश्यते खे तु खचक्षुः सिध्यते सदे-।

त्याह भगवान् वज्रगर्भः।

सर्वकुलचक्षुर्ज्ञानसिद्धिविधिविस्तरतन्त्रं ॥ ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतकर्मोत्तमसिद्धितन्त्रमुदाजहार। तत्रेदं तथागतकर्मोत्तमसिद्धितन्त्रं।

कर्ममण्डलयोगेन पूजयं सर्वनायकान्।
रागसौख्यविपाकार्थं बुद्धसिद्धिमवाप्नुयाद् ॥

इत्याह भगवान् बुद्धः ॥

तत्रेदं तथागतकुलकर्मोत्तमसिद्धितन्त्रं।

गुह्यपूजां प्रकुर्वाणो रागोऽहमिति भावयन्।
प्राप्नुयादुत्तमां सिद्धिं वज्ररागसमद्युतिम् ॥

इत्याह भगवान् कामः ॥

तत्रेदं वज्रकुलकर्मोत्तमसिद्धितन्त्रं।

गुह्यपूजां प्रकुर्वाणो क्रोधोऽहमिति भावयन्।
प्राप्नुयादुत्तमां सिद्धिं त्रिलोकविजयोपमाम् ॥

इत्याह भगवान् वज्रपाणिः ॥

तत्रेदं पद्मकुलकर्मोत्तमसिद्धितन्त्रं।

अन्तर्गतेन मनसा कामशुद्धिं तु भावयन्।
स्वरेऽतो बिन्दुभिर्बुद्धां पूजयं सिद्धिमाप्नुयाद् ॥

इत्याह भगवानवलोकितेश्वरः ॥

तत्रेदं मणिकुलकर्मोत्तमसिद्धितन्त्रं।

वज्रगर्वां समाधाय नमेदाशयकम्पितैः ।
प्रणामपरमो नित्यमभिषेकां समाप्नुयाद् ॥

इत्याह भगवान् वज्राभिषेकरत्नः ॥

सर्वकुलकर्मोत्तमसिद्धिविधिविधिविस्तरतन्त्रः ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतकर्मसमयगुह्यसिद्धितन्त्रमुदाजहार । तत्रायं तथागतकर्मसमयगुह्यसिद्धितन्त्रः ।

कामाद्याः सर्वसौख्या मे सदैव हृदये स्थिताः ।
अहो सत्वार्थानामविरागो यत्र देश्यते ॥ १ ॥
अयं हि कर्मसमयस्तथागतसमाधिना ।
भावयं पूजयेद् बुद्धामुत्तमां सिद्धिमाप्नुयाद् ॥ २ ॥

इत्याह भगवान् बुद्धः ॥

तत्रायं तथागतकुलकर्मसमयगुह्यसिद्धितन्त्रः ।

समन्तभद्रः कामोऽहं सर्वसत्वसुखप्रदः ।
वज्रसत्वसमाधिस्थः पूजयं सिद्धिमाप्नुयाद् ॥

इत्याह भगवान् कामः ॥

तत्रायं वज्रकुलकर्मसमयगुह्यसिद्धितन्त्रः ।

समन्तभद्रः क्रोधोऽहं सर्वसत्वहितंकरः ।
वज्रहुंकारयोगेन पूजयं सिद्धिमाप्नुयाद् ॥

इत्याह भगवान् वज्रपाणिः ॥

तत्रायं पद्मकुलकर्मसमयगुह्यसिद्धितन्त्रः ।

समन्तभद्रो रागोऽहं सर्वसौख्यप्रदः स्वयं ।
जगद्विनयरूपस्थः पूजयं सिद्धिमाप्नुयाद् ॥

इत्याह भगवान् पद्मरागः ॥

तत्रायं मणिकुलकर्मसमयगुह्यसिद्धितन्त्रः ।

समन्तभद्रो राजाहं सर्वसत्व[महार्थदः ।
सर्वार्थसिद्धिरूपेण] पूजयं सिद्धिमाप्नुयाद् ॥

इत्याह भगवान् सर्वार्थसिद्धिः ॥

सर्वकुलकर्मसमयगुह्यसिद्धिविधिविस्तरतन्त्रं ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतकर्मधर्मतोत्तमसिद्धितन्त्रमुदाजहार । तत्रायं तथागतकर्मधर्मतोत्तमसिद्धितन्त्रः ।

दक्षिणाग्र्याभिमुखतः कवचं स्वसमाधिना ।
निबध्योष्णीषसंस्था तु रक्षात्यन्तं भविष्यती-॥

त्याह भगवान् बुद्धः ॥

तत्रायं तथागतकुलकर्मधर्मोत्तमसिद्धितन्त्रः ।

संलिख्य तु भगाकारं कुड्ये मेढ्रं समुच्छ्रितं ।
यां स्त्रियं चिन्तयन् मृदुं कुर्यात्सास्य वशीभवेद् ॥

इत्याह भगवानार्यवज्रपाणिः ॥

तत्रायं वज्रकुलकर्मधर्मोत्तमसिद्धितन्त्रः ।

भूमौ यक्षमुखं लिख्य तस्याग्र्याङ्गुलितो नखं ।
निहत्य चक्षुर्देशे तु समाकर्षेत्स्त्रियो वराः ॥

इत्याह भगवान् वज्रसत्वः ॥

तत्रायं पद्मकुलकर्मधर्मोत्तमसिद्धितन्त्रः ।

पद्मं गृह्य कराभ्यां तु निरीक्ष्य रागशुद्धितां ।
वज्रदृष्ट्या तु स स्त्रीणां रागयेदभितस्तथे-॥

त्याह भगवान् वज्रधरः ॥

तत्रायं मणिकुलकर्मधर्मोत्तमसिद्धितन्त्रः ।

वज्ररत्नसमाधिस्थो मणिं गृह्य [द्वि]पाणिना ।
रत्नहुंकारयोगेन मारयेत्सर्वयोषितः ॥

इत्याह भगवान् वज्रहुंकारः ॥

सर्वकुलकर्मधर्मोत्तमसिद्धिविधिविस्तरतन्त्रः ॥ ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतकर्मकार्यसिद्धितन्त्रमुदाजहार । तत्रायं तथागतकर्मकार्यसिद्धितन्त्रः ।

पूजाकर्मविधिं योज्य यद्यत् कार्यं तु चिन्तयेत् ।
तत्तद् विज्ञाप्य मुद्रां तु साधयेत विचक्षणः ॥

इत्याह भगवान् वज्रधातुः ॥

तत्रायं तथागतकुलकर्मकार्यसिद्धितन्त्रः ।

गुह्यपूजाविधिं योज्य वज्रसत्वसमाधिना ।
यत्कार्यं वदते तत्तु शीघ्रं सिद्धिमवाप्नुयाद् ॥

इत्याह भगवान् वज्रधरः ॥

तत्रायं वज्रकुलकर्मकार्यसिद्धितन्त्रः ।

कुलगुह्यमहापूजां कृत्वा क्रोधसमाधिना ।
यत्किञ्चिच्चिन्तयेत्प्राज्ञः स शीघ्रं सिद्धिमेष्यती-॥

त्याह भगवान् वज्रक्रोधः ।

तत्रायं पद्मकुलकर्मकार्यसिद्धितन्त्रः ।

कृत्वा तु मनसीं पूजां लोकेश्वरसमाधिना ।
यत्कार्यं चिन्तयेत्प्राज्ञः तत्सर्वं शीघ्रमाप्नुयाद् ॥

इत्याह भगवान् पद्मधरः ॥

तत्रायं मणिकुलकर्मकार्यसिद्धितन्त्रः।

कृत्वा धूपादिभिः पूजां वज्रगर्भसमाधिना।
यत्कार्यं चिन्तयेत्प्राज्ञः तत्सर्वं सिध्यति क्षणाद्॥

इत्याह भगवान् वज्रगर्भः॥

सर्वकुल[कर्मकार्य]सिद्धिविधिविस्तरतन्त्रं॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वतथागतमुद्राभावना[धिष्ठानयोगसिद्धितन्त्रमुदाजहार।] तत्रायं तथागताधिष्ठानयोगसिद्धितन्त्रो भवति।

सूक्ष्मवज्रप्रयोगेण बुद्धयोगसमाहितः।
उत्तमासि[द्धिमाप्नुयाद्] बुद्धमुद्राप्रसाधक॥

इत्याह भगवान् वज्रपाणिस्तथागतः॥

तत्रायं तथागतकुलसत्वाधिष्ठानयोगसिद्धितन्त्रः।

सत्वो हि [सर्वात्मभावः कायेऽ]प्यात्मनि संस्थितः।
इत्यधिष्ठाय सत्वोऽहमहंकारेण भावयन्॥

सिध्यतीत्याह भगवान् सर्वतथागतमहायानाभिसमय[वज्रसत्वः॥

तत्रायं व]ज्रकुलवज्राधिष्ठान[योगसिद्धितन्त्रः।]

यथा सत्वस्तथा मुद्रा यथा मुद्रास्तथा ह्यहं।
अनेन भावयोगेन सर्वमुद्राः सु[साधयेद्॥

इत्याह भगवान् वज्रधरः॥

तत्रायं पद्मकुलधर्मा]धिष्ठानयोगसिद्धितन्त्रः।

धर्ममुद्राप्रयोगेण सूक्ष्मवज्रेण भावना।
वाङ्मुद्राणां [तु तत्सर्वं महासत्वस्य समाधि॥

इत्याह भगवानार्यावलोकितेश्वरः॥]

तत्रायं मणिकुलकर्माधिष्ठानयोगसिद्धितन्त्रः।

सर्वबुद्धाभिषेकाणि [पजासमयसिद्धयः।
भगवानिति भावयन् वज्रकर्माणि साधयेद्॥

इत्याह भगवान्] वज्रकर्म॥

सर्वकुलमुद्राभाव[नासिद्धितन्त्रं॥ ॥

अथ] भगवन् [सर्वतथागताः] पुनः समाजमागम्य, भगवते सर्वतथागतचक्रवर्तिने वज्रपाणये महाबोधिसत्वाय साधुकाराण्यददुः।

साधु ते वज्रसत्वाय [वज्ररत्ना]य साधु ते ।
[वज्रधर्माय ते साधु साधु ते] वज्रकर्मणे ॥

सुभाषितमिदं सूत्रं वज्रयानमनुत्तरं ।
सर्वतथागतं गुह्यं महायानाभिसं[ग्रहम् ॥ इति ॥]

सर्वतथागततत्वसंग्रहात् सर्वकल्पगुह्योत्तरतन्त्रविधिविस्तरः परिसमाप्तः ॥

CHAPTER 26a

SARVA-KALPĀNUTTARA-TANTRA

अथ वज्रपाणिर्महाबोधिसत्व इमा[मुदानमुदानयामास ।]

दुर्दृष्टोनां विरक्तानामिदं गुह्यन्न युज्यते ।
सर्वसत्वहितार्थाय वक्ष्यामि विधयस्तथे-।। ति ।।

अथवज्रपाणिर्महाबोधिसत्वः [सर्वतथागत] कुलोपचारविधिविस्तरमभाषत् ।

तत्रेदं सर्वतथागतकुलोपचारविधिविस्तरतन्त्रं ।

तत्रायं हृदयोपचारविधि[विस्तरतन्त्रो भवति] । महामण्डलं दृष्ट्वा धूपपुष्पदीपगन्धपूजामुद्राभिर् कृत्वा, ततो वज्र[वाचा जापमारभ्यति ।]

तत्रायं जापविधिर्भवति । यथा स्थानस्थितश्चतुर्मासं चतुःसन्ध्यं धूपादिभिर्यथावत्पूजां कृत्वा, सर्वतथागतमहायानाभिसमयनामाष्टशतेन सर्वतथागतानभिष्टुत्य, चतुर्मुद्राप्रणामयोगेन प्रणमन्नात्मनिर्यातनपूजा कार्यनेन मन्त्रचतुष्टयेन ।

ओं सर्वतथागतपूजोपस्थानायात्मानं निर्यातयामि सर्वतथागतवज्रसत्वाधितिष्ठस्व मां ।।

ओं सर्वतथागतपूजाभिषेकायात्मानं निर्यातयामि सर्वतथागतवज्ररत्नाभिषिञ्च मां ।।

ओं सर्वतथागतपूजाप्रवर्तनायात्मानं निर्यातयामि सर्वतथागतवज्रधर्म प्रवर्तय मां ।।

ओं सर्वतथागतपूजाकर्मणे आत्मानं निर्यातयामि सर्वतथागतवज्रकर्म कुरु मां ।।

"ततोऽविरक्तः सर्वकामगुणेषु सर्वाहारः सर्वकामोपभोगीहृदयार्थः स्वमात्मानं बुद्धबिम्बं पुरतो वाङ्मात्रेणापि भावयन् यथाकामकरणीयतया, अष्टशतं वज्रवाचा जपन्नाशु प्रसिध्यती–" त्याह भगवान् वज्रसत्वः ।।

"अथोत्तमसिद्धिमिच्छेत्ततः पटे भगवन्तं तथागतं मध्ये लेखयेत् । तस्य चतुर्महासत्वमण्डलयोगेन यथाभिरुचितवर्णाभरणा महासत्वाश्चन्द्रमण्डलप्रतिष्ठिता लेख्याः कोणभागेषु कुलदेव्य इति । ततः पटस्योदारां पूजां कृत्वा यथावज्जपयोगेन तावज्जपेत् यावन्मासचतुष्टयं, ततः सकलां रात्रिं जपेत् । ततः प्रभाते सर्वतथागततत्वादीनुत्तमसिद्धीनवाप्नोती—" त्याह भगवान् वज्रधरः ।।

"अथमुद्रासाधनमिच्छेत्तेन सर्वतथागतसत्ववज्रिमुद्रां बध्वा पटस्याग्रतो वज्रवाचां शतसहस्रं यथाकामकरणीयतया यथावद् बन्धन् मुञ्चंश्च जपेत् । ततोऽन्ते सकलां रात्रिं, अविश्रमतो किञ्चित्कालं मुञ्चन्, यथावच्च बन्धन् जपेत् । ततो मुद्रा ज्वलत्याविशत्युत्तिष्ठति वाचं मुञ्चतीति । ततो मुद्राबन्धनेनोत्पतति कामरूपी भवति अन्तर्धाति सर्वकर्माणि च करोति । सर्वमुद्राश्च बन्धमात्रा यथावत्सर्वकर्माणि कुर्वन्ती—" त्याह भगवान्वज्रधरः ।।

"अथ समाधयो इष्येत् तेन सूक्ष्मवज्रादारब्धव्य समाधिमभिरोचेत् तं हृदययोगतोऽभ्यसेत्, तावद्यावच् चतुर्मासं । ततोऽन्ते सकलां [रात्रिं पर्यङ्काविक्षप्तसमापन्नेन तिष्ठेत् । ततः प्रभाते सर्वतथागताद्याः] सर्वसिद्धय आमुखीभवन्ति । ततो यादृशी अभिरुचिस्तादृ[शीमवाप्नोती—" त्याह भगवान् वज्रसत्वः ।।]

"अथ कर्मसाधनं भवति । तथैव जपन्मासमेकं साधयेत्। ततोऽन्ते सकलां रात्रिं ज[पेत् । ततः सर्वकर्माणि

सिध्यन्ती—" त्याह भगवान् वज्रध]रः ॥

"अथ कर्माणि भवन्ति । सकृदुच्चारितेनात्मपरग्रामनगररक्ष भवति ॥ कवचब[न्धादिनावेशमपि कृत्वा चन्दन-गन्धेन ग्रहाग्रह]स्पृष्टवज्राङ्कुशशरहस्तरत्नसूर्यध्वजदन्तपङ्क्तिपद्मखड्गचक्रजिह्वासर्ववज्रकवचदंष्ट्रामुष्टिमुद्रादिनि सर्वभावानाविशयति सकृज्जप्तेन ॥ मायाकर्म च मयूरपत्रपिञ्च्छके वज्रं चिध्वा बन्धयेत् । ततस्तं मयूराङ्गपिञ्च्छकं सत्ववज्रि.मुद्र[या वध्यात् ता]वज्जपेद्यावत् सर्वतथागतमुद्रा आविशति । ततश्च पिञ्च्छकान् नानाद्यानि रूपाणि पश्यति । ततः प्रभृति तेन पिञ्च्छकेन सर्वरूपाणि विधिवद् दर्शयति । तेनैव पिञ्च्छकेन सकृज्जप्ते भ्रामितेनात्मनः सर्वरूपाणि दर्शयति । तेनैव पिञ्च्छकेन लौकिकानि मायाकर्माणि दर्शयति । बुद्धबोधिसत्वबिम्बान्यपि दर्शयति । दशसु दिक्षु सर्वबुद्धक्षेत्रेषु तथागताः सपर्षन्मण्डलाः समारसेनाधर्षणादिबुद्धर्द्धिविकुर्वितानि कुर्वन्तो दर्शयति । यावत्सर्वाकार-वरोपेतं बुद्धरूपमात्मानं भवती—" ति ॥

"वशीकरणं कर्तुकामः सर्वतथागतसत्वमुद्रां बध्वा तावज्जपेद् यावत्सा मुद्रा ज्वलति । ततः प्रभृति मुद्राबन्धेन सर्वतथागतानभ्यारागयति वशीकरोति । किं पुनरन्यां सत्वान् ? ॥

"अथ लौकिकोत्तमसिद्धयः साधयितुकामेन तेनादित एव तथैव जपता मासमेकमष्टसाहस्रिकेण जप्तव्यः । ततोऽन्ते मुद्रां बध्वा तथैव सकलां रात्रिं जपेत्, यावन्मुद्रा ज्वलति । ततः प्रभृति मुद्राबन्धेन लौकिकसिद्धिविद्याधर-सिद्धीनामेकतरो भवती—" त्याह भगवां वज्रधरः ॥

तथागतकुलोपचारविधिविस्तरः परिसमाप्तः ॥

अथ वज्रकुलोपचारविधिविस्तरो भवति ।

"तत्रादित एव पूर्वमेवं कुर्यात् । तथैव यथाकामकरणीयतया, अक्षरलक्षं जपेत् । अस्य सकलां रात्रिं जपेत् । ततः प्रभृति सर्वसत्वनिग्रहानुग्रहक्षमो भवती—" त्याह भगवां वज्रधरः ॥

अथ साधयितुमिच्छेत् तेन यथावत्पटं चित्रापयितव्यः । ततस्तथैव पूजां कृत्वा मासमेकं सर्वकामभोजी यथा-कामकरणीयतया, अष्टसाहस्रिकेण जापेन चतुःसन्ध्य वज्रवाचा जपेत्, तावद्यावन्मासान्ते पटस्योदारां पूजां कृत्वा वज्र-हुंकारमहामुद्रां बध्वा तावज्जपेद्यावत्तस्मात् मुद्रां बन्धात्, हुंकारशब्दो विनिःसृतः । ततः प्रभाते महेश्वरादयो देवाधिपतयः सगणपरिवाराः पुरःस्थित्वाज्ञां मार्गयन्ति । ततो विद्याधरेणैवं वक्तव्यं "यदाहं ब्रूयामागच्छतेदं कुरुत तदा भवद्भिरागत्य ममाज्ञा कार्या—" ति । ततः प्रभृति सकलत्रिलोकाधिपतिर्भवति । यथेच्छया च मुहूर्तमात्रेण सकलं त्रिभुवनमाज्ञापयन् भ्रमति । पुनरप्येति च, निग्रहानुग्रहं कुर्वं, दिव्यानि च त्रिलोकभोगानि चोपभुञ्जन् यथाकामकर-णीयतया, सर्वसुराधिपतियोषिताद्याः सर्वयोषिता आरागयित्वोपभुञ्जति । न च तस्य कश्चित् किंचिच्छक्नोति कर्तुं, हुंकारेण च सर्वदुष्टदे[वादीन् प्रमर्दित्वा ततस्तावत्कल्पशतसहस्रान् जीवती—" त्याह भगवान् वज्रधरः ॥

"अथ मुद्रासाधनमिच्छेद्] यथावज्जपं कृत्वा मासान्ते वज्र-हुं-कारसमयमुद्रां बध्वा सकलां रात्रिं जपेत् । ततः प्रभाते मुद्राः सिद्धा भवन्ति । ततो यथावन् मुद्राबन्धेन हुंकारप्रयुक्तेन आकाशगमनविश्वसंदर्शनान्तर्धानमायासन्दर्शन-सर्वावेशनाकर्षणवशीकरणसर्वतुष्टिसंजननसर्वरत्नाभिहरणमहातेजोज्वालासन्दर्शनरत्नवृष्टिसन्दर्शनमहाट्टहासप्रमुञ्चन-सर्वसत्वसंशोधनच्छिन्दनभिन्दनऋतुचक्रपरिवर्तनयथावत्तत्वोल्लापनसर्वकर्मप्रवर्तनरक्षजंभनस्तंभनत्रासनमारणसर्वसत्व-मुद्रणकामरतिक्रियाप्रवर्तनाभिषेकसर्वभावगायापननृत्यापनाह्वायनप्रवेशनस्फोटनावेशनादीनि सर्वकर्माणि करोती—" त्याह भगवान् वज्रधरः ॥

"अथ सूक्ष्मज्ञानसाधनमिच्छेत् तेन वज्र-हुं-कारसमाधिमभ्यसता तथैव जापयोगेन मासं साधयितव्यं । ततोऽन्ते ऽनेनैव समाधिना सकलां रात्रिं जपेत् । तावद् यावत् प्रभाते पञ्चाभिज्ञा भूत्वा सर्वसत्वानुग्रहनिग्रहक्षमो भवती —" त्याह भगवान् वज्रधरः ॥

"अथ कर्मसाधनमिच्छेत् तेन तथैव जपता मासमेकं साधयितव्यं । ततोऽन्ते सकलां रात्रिं जपेत् । ततः सर्व-

कर्माणि सिध्यन्ती"त्याह भगवान् वज्रधरः ॥ ततः कर्माणि भवन्ति सकृदुच्चारितेन मनीषितया रक्षादीनि सर्वकर्माणि करोति ॥

वज्रकुलोपचारसिद्धिविधिविस्तरः [परिसमा]प्तः ॥ ॥

अथ पद्मकुलोपचारविधिविस्तरो भवति ॥

"तत्रादित एव तावच्छतसहस्रं जपेत्, पूर्वमेवाकृता भ[वति] ततः साधनं भवति । पटे भगवान् सर्वजगद्विनयाद्याः कर्तव्यास्तस्य सर्वपार्श्वेषु चतुर्मण्डलयोगेन महासत्वचतुष्टयः कार्यः अन्ते च देव्यः । ततः स एव जापविधिविस्तरो मासान्ते सकलां रात्रिं जपेत् । ततः सर्वजगद्विनयो भगवानागच्छति, यथाकालं वरेणाभिप्रचारयती—" ति आह भगवान् वज्रधरः ॥

"अथ मुद्रासाधनमिच्छेत् तेन तथैव पद्मवज्रिमुद्राबन्धं कृत्वा यथावन् मुच्याष्टसाहस्रिकेण जापेन चतुःसन्ध्यं जपेत् । ततः सकलां रात्रिं मुद्राबन्धेन जपेत् । प्रभाते सिद्धिर्भवति । ततो मुद्राबन्धेन यथावत् सर्वजगद्विनयं करोती—" त्याह भगवानवलोकितेश्वरः ॥

"अथ समाधिनयसाधनमिच्छेत् तेन तथैव मासान्ते सकलां रात्रिं यथाभिरुचितेन समाधिना जापो दातव्यः । ततः प्रभाते सर्वसमाधय आमुखीभवन्ती—"त्याह भगवान् वज्रधर्मः ॥

अथ कर्मसाधनमिच्छेत् तथैव जपन्मासान्ते सकलां रात्रिं जपेत् । ततः सर्वकर्मक्षयो भवती—" त्याह भगवां वज्रधरः ॥

पद्मकुलोपचारविधिविस्तरः परिसमाप्तः ॥ ॥

अथ मणिकुलोपचारविधिविस्तरो भवति ॥

"तत्रादित एव सर्वतथागतप्रणामचतुष्टयं कृत्वा शतसहस्रं जपेत् । ततस्तथैव पटे भगवां सर्वार्थसिद्धिं चतुर्मुद्रामण्डलयोगेन लिखेत् । ततस्तथैव पूजां कृत्वा तथैव साधयेत् । मासान्ते सकलां रात्रिं जपेत् । ततः प्रभाते भगवां सर्वतथागताभिषेकरत्नः आकाशगर्भो बोधिसत्व आगत्याभिषेकं ददाति । तेनाभिषेकेण त्रिसाहस्रमहासाहस्रे लोकधातौ विद्याधरचक्रवर्ती भवती—" त्याह भगवान् वज्रधरः ।

"अथ मुद्रासाधनमिच्छेत् तेन तथैव धर्मवज्रिप्रयोगेण वज्ररत्नमुद्रा यथावत्साध्या सर्वाशाकर्मकरी भवती ॥

"अथ मणिज्ञानमिच्छेत् साधयितुं तेन तथैव वज्ररत्नोद्भवसमाधिर्यथानुक्रमतो भावयितव्यः । निःस्वभावादाकाशात्कथं रत्नसंभव इति, रत्नाच्च कथं बोधिसत्वकायसंभव इति । इमं समाधिं चतुःसंध्यं भाव्य जपेद्, यथोपरि ततो मासान्ते तेनैव समाधिना [सकलां रा]त्रिं जपेत् । ततः प्रभाते सर्वतथागतैरागत्य यथाभिरुचितोऽभिषिच्यत" इत्याह भगवानाकाशगर्भः ॥

"अथ कामसाधन [मिच्छेत्] तथैव जपता मासान्ते सकलां रात्रिं जपेत् । ततः प्रभाते भगवानाकाशगर्भः सर्वार्थसाधको भवतीति । ततः सर्वकर्माणि कुर्याद्" इत्याह भगवानार्यवज्रधरः ॥

मणिकुलोपचारविधिविस्तरः परिसमाप्तः ॥

अथ सर्वकुलोपचारसाधारणविधिविस्तरो भवति ॥

तत्रादित एव च सर्वहृदयोपचारविधिविस्तरः ।

"हृदयमनीषितानि सर्वतथागतानां सिध्यन्ताम्" इत्युच्चार्य हृदयं यथाभिरुचितो जप्य साधनविधिः कर्तव्य इति ॥

तत्रायं मुद्रोपचारविधिः। "सर्वमुद्रा मे भोग्या भवन्ती—" त्युक्त्वा समयमुद्रां बध्वा यथाभिरुचितो यथाशक्त्या जपेत्। ततो यथावत्सिद्धिरिति॥

तत्रायं सर्वमन्त्रोपचारविधिः। "निःप्रपञ्चा वाक्सिद्धिर्भवतु, सर्वतथागतसमाधयो मे आजायन्ताम्" इत्युक्त्वा मन्त्रं यथाभिरुचितो जपेत्, एषा सिद्धिरिति॥

तत्रायं विद्योपचारविधिः। "अविद्यान्धा च ते मे सत्वाः सर्वतथागताश्च विद्याधिगमसंवरभूता" इत्युक्त्वा विद्यां यथाभिरुचितो जप्य साधनमावहेद्" इत्याह भगवानार्यवज्रधरः॥

"अथ सर्वहृदयमुद्रामन्त्रविद्यानां यथाकामकरणीयतया वज्रजापविधिविस्तरो भवति। यस्य सत्वस्य हृन्मुद्रां मन्त्रं विद्यां तु साधयेत्। जापार्थतस्तमात्मानं सत्वं वा साध्य सिध्यती—" त्याह भगवान् वज्रसत्वः॥

सर्वकुलसाधारणजापविधिविस्तरः परिसमाप्तः॥ ॥

अथ सर्वकुलसाधारणसिद्धिविधिविस्तरो भवति॥

तत्रादित एव तथागतकुलसिद्धयः। तद्यथार्थनिष्पत्तिसिद्धिः ऋद्धिसिद्धिर्विद्याधरत्वं महासिद्धिश्चेति॥

"तत्रार्थनिष्पत्तिर्भवति। यत्र निधिशङ्का भवेत् तत्र मुद्रां बध्वा स्वसमाधिना तन्निधिस्थानं वज्रदृष्टया निरीक्षयेत्। यदि वज्राकारमुत्तिष्ठत्वं पश्यति तथा ज्ञातव्यं निधिरत्रास्तीति। ततो वज्रस्फोटसमयमुद्रां बध्वोत्खन्य यथाकामकरणीयतया गृह्णीयादचिरात् प्राप्नोती—" त्याह भगवान् वज्रसत्वः॥

"तत्र ऋद्धिसिद्धिनिष्पत्तिर्भवति। यां मुद्रां साधयेद् "**वज्रसिद्धिर्**।" इत्युक्त्वा ऋद्धिसिद्धिश्चतुर्विधा भव[न्ति/ तद्यथा] जलस्थापरिचंक्रमणनिषीदतादिकं तथागतादिसर्वरूपसंदर्शनं यावदभिरुचिस्तावद् अद्रेष्यत्वं। आकाशगामी च योजनसहस्रमूर्ध्वमुत्पत्यधस्ताच्च गच्छति। सर्वादिशश्च योजनसहस्राद् यथाभिरुचितवेगः परिभ्रम्यागच्छति। योजनसहस्रादर्शन सर्वसत्वमनीषितानि ज्ञानाति। सर्वभावानि च चक्षुषा पश्यति श्रोत्रेण शृणोति। सर्वदिक्षु च योजनसहस्रादर्शन मनोऽभिरुचिताः सर्वस्त्रियोऽङ्के समुत्क्षिप्यानयति। सर्वहिरण्यसुवर्णमणिमुक्तादयश्च सर्वार्थानपहरति, न चास्य कश्चित् किंचित् छक्नोति कर्तुं। यद् वज्रेणाप्यदृश्यो भवति। किं पुनरन्यैः?। दशपुरुषसहस्रबली नित्यारोग्यवान् नित्यं सर्वकामोपभोजा सदायौवनो दिव्यरूपो सर्वतथागतान् सवज्रसत्वां पश्यन् पूजयंश्चानुत्तरवज्रसिद्धिश्चत्वारिवर्षसहस्राणि जीवती—" त्याह भगवान् सर्वतथागतवज्रऋद्धिः॥

तत्रायं वज्रविद्याधरसिद्धिनिष्पत्तिर्भवति। मुद्रान् साधयं "**वज्रविद्याधर**" इति कुर्यात्, सिद्धया वज्रविद्याधरचक्रवर्ती भवति। सर्वकामोपभोगी सहस्रबुद्धक्षेत्रमेकक्षणेन परिभ्रम्यागच्छति। सर्वसुखानि परिभुंक्ते। द्विरष्टवर्षवयुः आकुञ्चितकुण्डलकेशधारी महावज्रविद्याधरः सर्वतथागतान् सवज्रसत्वान् पश्यन् महाकल्पस्थायी भवती—" त्याह भगवान् सर्वतथागतविद्याधरः॥

तत्र महासिद्धिनिष्पत्तिर्भवति। स्वमुद्रां हृदयार्थतः साधयन्। स्वमुद्रा सत्वरूपो भवत्य्, एकक्षणेन दशसु दिक्षु सर्वलोकधातुषु विश्वरूपी विश्वक्रियाप्रवर्तकः, सर्वतथागतान् सवज्रसत्वां दृष्ट्वा सर्वाकारवरोपेताभिः सर्वतथागतपूजाभिः संपूज्याशेषानवशेषसत्वार्थं च कृत्वा पुनरप्यायाति। सर्वलोकधातुसर्वकामसर्वसुखसौमनस्यानि सर्वाकारवरोपेतान्युपभुञ्जन्, वज्रसत्वसमो महाबोधिसत्वः अशेषानवशेषमहाकल्पायुर्भवती—" त्याह भगवान् सर्वतथागतसिद्धिः।

तत्रैता वज्रकुलसिद्धयः। तद्यथा त्रिलोकविजयसिद्धिः सर्वाभिषेकसिद्धिः सर्वसुखसौमनस्यसिद्धिः उत्तमसिद्धिरिति॥

"तत्र त्रिलोकविजयसिद्धिर्भवति। त्रिलोकविजयमुद्रां बध्वा महेश्वरं [वामप]देनाक्रम्य साधयेत्। ततः सा प्रतिमा नादं मुञ्चति। ततो हुंकारः प्रयोक्तव्यः। हुंकारे प्रयुक्तमात्रे महेश्वरादयः सर्वत्रैलोक्याधिपतयः सपरिवाराः; साधकस्य पुरत आगत्वा आज्ञावश्यविधेया भवन्ति। ततः प्रभृति सर्वत्रिलोकाधिपतिर्वज्रधरो भवति। आकाशेन गच्छति

सकलत्रिलोकचक्रं परिक्रम्यागच्छति, दुष्टदेवादयश्च सर्वसत्वान् हुंकारेण दमयति। सर्वतथागतवज्रहुंकाररूपी सकलत्रिलोकमाज्ञया वर्तयन् सर्वतथागतान् सवज्रसत्वान् पश्यन्नारागयंश्च वर्षसहस्रान् जीवती—"त्याह भगवान् वज्रहुंकारः ॥

"तत्रायं सर्वाभिषेकसिद्धिमुद्रां साधयन्। सर्वतथागताभिषेकरत्नमुद्रया पूर्वमात्मानमभिषिच्य साधयेत्। ततस्तस्य सिद्धस्य चतुर्विधमभिषेको भवति। वज्राभिषेको रत्नाभिषेको धर्माभिषेकः कर्माभिषेकश्चेति। तत्र वज्राभिषेके लब्धे सर्वतथागतानां वज्रधरो भवति। रत्नाभिषेके सर्वरत्नाधिपतिर्भवति। धर्माभिषेके धर्मराजा भवति। कर्माभिषेके लौकिकलोकोत्तरसर्वकर्मसिद्धिमवाप्नोती—" त्याह भगवां सर्वतथागताभिषेकः ॥

"तत्रेयं सर्वसुखसौमनस्यसिद्धिर्, यदुत गुह्यपूजाभिर्नित्यं सर्वतथागतपूजां कुर्वन्, सर्वतथागतसर्वसुखसौमनस्यसिद्धिमवाप्नोती—"त्याह भगवां सर्वतथागतसर्वसुखसौमनस्यः ॥

"तत्रेयमुत्तमसिद्धिः, यदुत वज्रधरसमोऽहम्" इत्याह भगवां वज्रधरः ॥

तत्रैताः पद्मकुलसिद्धयः। तद्यथानुरागणवशीकरणरक्षपद्मसिद्धिश्चेति ॥

"तत्रानुरागणसिद्धिर्भवति, यथावत्पद्मरागभावनया सर्वतथागतादिसर्वसत्वानुरागणक्षमो भवति। स्वलोकेश्वरानुस्मृत्या तथैव सर्वसत्ववशीकरणसमर्थो भवति। मैत्र्यस्फरणसमाधिना सर्वजगद्रक्षावरणगुप्तक्षमो भवति। स्वं पद्मसमाधिना पद्मं हस्तेन गृह्य साधयं लोकेश्वररूपी सर्वाकारवरोपेतश्चतुर्वर्षसहस्रं जीवती—" त्याह भगवान् सर्वतथागतपद्मः ॥

तत्रैता मणिकुलसिद्धयः। तद्यथा सर्वकुलाभिषेकसिद्धिः, महातेजस्त्वं, सर्वाशाप्रपूरणं, रत्नसिद्धिश्चेति ॥

"तत्र सर्वतथागताभिषेकसिद्धिः। यदुत स्वाभिषेकनिर्यातना प्रदीपदानं दानपारमितापारिपूरिः, यथाशक्यरत्नसाधनं चत्वाभिः सिद्धिभिः सर्वतथागतां पूजयन्नचिरात् सिध्यती—" त्याह भगवां सर्वतथागतरत्नः ॥

सर्वकुलसाधारणसिद्धिविधिविस्तरः [परिसमा]प्तः ॥

"अथ सर्वकल्पोपायसिद्धितन्त्रमनुव्याख्यास्यामी—" त्याह भगवाननादिनिधनसत्वः ॥

[तत्रादित एव हृदयोपायसिद्धितन्त्रं।]

यथा विनयो लोको हि तादृशी सिद्धिरिष्यते।
उपायस्तत्र मुद्रा हि सर्वसिद्धिप्रदं महत् ॥

तत्रायं मुद्रोपायसिद्धितन्त्रं।

विरागविनयो लोको मुद्रासिद्धिस्तु रागजा।
उपायो भावना तत्र सर्वसिद्धिकरी वरा ॥

तत्रेदं मन्त्रोपायसिद्धितन्त्रं।

लोकोऽयं सत्यविभ्रष्टो मन्त्रसिद्धिर्न इष्यते।
उपायो निःप्रपञ्चस्तु सर्वसिद्धिकरः परः ॥

तत्रेदं विद्योपायसिद्धितन्त्रं।

अविद्याभिनिविष्टोऽयं विद्यासिद्धिर्न इष्यते।
उपायस्तत्र चौदारां सर्वसिद्धिप्रदं वरम् ॥इति॥

सर्वकल्पोपायसिद्धितन्त्रं ॥ ॥

"अथ सर्वकल्पपुण्यसिद्धितन्त्रमनुव्याख्यास्यामी—"त्याह भगवां सर्वतथागतः ॥

तत्रादित एव स्वहृदयपुण्यसिद्धितन्त्रं ।

कृत्वा चतुर्विधां पूजां महापुण्यमवाप्नुते ।
बुद्धपूजाग्रपुण्या हि सिध्यते नात्र संशय ॥इति॥

तत्रेदं मुद्रापुण्यसिद्धितन्त्रं ।

रक्षंस्तु समयं गुह्यं महापुण्यमवाप्नुते ।
अपुण्योऽपि हि सिध्येय शीघ्रं समयरक्षणाद् ॥इति॥

तत्रेदं मन्त्रपुण्यसिद्धितन्त्रं ।

बुद्धानामादिवचनैर्महापुण्यमवाप्नुयात् ।
धर्मदानादपुण्योऽपि शीघ्रं सिद्धिमवाप्नुते ॥

तत्रेदं विद्यापुण्यसिद्धितन्त्रं ।

दानमग्र्यं हि पुण्यानां ददन्पुण्यमवाप्नुते ।
दानपारमिता पूर्णः शीघ्रं बुद्धत्वमाप्नुते-॥ ति ॥

सर्वकल्पपुण्यसिद्धितन्त्रं ॥ ॥

"अथ सर्वकल्पप्रज्ञासिद्धितन्त्रमनुव्याख्यास्यामि ॥

तत्रादित एव हृदयप्रज्ञासिद्धितन्त्रं ।

अ-अक्षरप्रवेशेन सर्वाक्षरविजानना ।
स्ववक्त्रपरवक्त्रं तु भावयं सिद्धिमाप्नुयाद् ॥

इत्याह भगवान् मञ्जुश्रीर्महाबोधिसत्वः ॥

तत्रेदं मुद्राप्रज्ञासिद्धितन्त्रं ।

प्रज्ञा नैर्वेधिकी नाम समाधिरिति कीर्तिता ।
तया तु मुद्राः सिध्यन्ते भावयं सिध्यति क्षणाद् ॥

इत्याह भगवान् प्रज्ञाग्र्यः ॥

तत्रेदं मन्त्रप्रज्ञासिद्धितन्त्रं ॥

प्रज्ञाघोषानुगा नाम समाधित्वात्प्रपञ्चतः ।
तया भावितया शीघ्रं मन्त्रसिद्धिमवाप्नुयाद् ॥

इत्याह भगवान् वज्रबुद्धिः ॥

तत्रेदं विद्याप्रज्ञासिद्धितन्त्रं ।

विद्यामन्त्रविशेषाणां विशेषो नहि विद्यते ।
प्रज्ञया भावयन्नेवमाशु सिद्धिर्ध्रुवा भवेद् ॥

इत्याह भगवान् सर्वतथागतप्रज्ञाज्ञानः ॥

सर्वकल्पप्रज्ञासिद्धिविधिविस्तरतन्त्रं ॥ ॥

"अथ कल्पसंभारसिद्धितन्त्रमनुव्याख्यास्यामी–"त्याह भगवान् वज्रपाणिः ॥

तत्रादित एव सर्वहृदयसंभारसिद्धितन्त्रं ।

सर्वपूजां प्रकुर्वाणः सं[भारं हि] विवर्धते ।
कुशलानां तु धर्माणां ततः सिध्यति संभृतः ॥

तत्रेदं मुद्रासंभारसिद्धितन्त्रं ।

बहुचक्रप्रवेशाच्च बहुमण्डल[कल्पनात्] ।
[संभार]पूजामुद्राणां महासिद्धिः प्रवर्तते ॥

तत्रेदं मन्त्रसंभारसिद्धितन्त्रं ।

अनुमोदनादियोगेन सद्धर्मपठनात्तथा ।
बहुजापप्रदानाच्च मन्त्रसिद्धिर्ध्रुवा भवेद् ॥ इति ॥

तत्रेदं विद्यासंभारसिद्धितन्त्रं ।

अविद्यासुप्रहीणत्वात् दानपारमितानयात् ।
संभारपरिपूर्णस्तु शीघ्रं सिद्धिमवाप्नुते-॥ ति ॥

सर्वकल्पसंभारसिद्धितन्त्रं ॥ ॥

सर्वकल्पविधिविस्तरतन्त्रं परिसमाप्तं ॥ ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वकुलचिह्नसंभवज्ञानतन्त्रमुदाजहार ॥ तत्र कथं वज्रसंभवः ? ।

स एव भगवां सत्वः सर्वचित्तः स्वयं प्रभुः ।
कायवाक्चित्तवज्रस्तु दृढः सत्वः स्वयंभुवां ॥

सत्वानामुत्तमः सत्वो वज्रभावनया हृदि ।
वज्रसत्व इति ख्यातस्तु तस्मिं वज्रो प्रतिष्ठितः ॥

स एव ज्ञानयोगेन बुद्धानामसमत्विषां ।
निःक्रम्य हृदयाद्विश्वो विश्वरूपो भवत्यपि ॥

सर्वधातुरजःसंख्याः स एव तु जिनो भवेत् ।
तेभ्यो वै वज्रकायेभ्यो वज्रसत्वस्तु संभवेत् ॥

तत एवादिसत्वास्तु सर्वचिह्नसमुद्भवः ।
चिह्नेभ्यस्तु महासत्वास्तेभ्यः सर्वमिदं नयम् ॥ इति ॥

य इदं शृणुयात्कश्चिच्छ्रद्दधेद् धारयेद् हृदि ।
भावयेच्च सदा तुष्टः शीघ्रं सिद्धिमवाप्नुयाद् ॥

इत्याह भगवान् वज्रसत्वः ॥

सर्वतथागततत्वसंभवज्ञानविधिविस्तरतन्त्रं ॥ ॥

अथ वज्रपाणिर्महाबोधिसत्वः सर्वकल्पसंभवज्ञानविधिविस्तरतन्त्रमभाषत् ॥

तत्रादित एव तावत् सर्वतथागतकल्पसंभवज्ञानतन्त्रं भवति ।

बुद्धानामविकल्पं तु ज्ञानं भवति शाश्वतं ।
अविकल्पात्ततो ज्ञानात्कल्पनात्कल्प उच्यते ॥

तत्रेदं तथागतकुलकल्पसंभवज्ञानतन्त्रं ।

यत्राविकल्पः कल्पात्मा कल्प्यते कल्पनोद्भवः ।
वज्रसत्वो महासत्वः तेन कल्पो निरुच्यते ॥

तत्रेदं वज्रकुलकल्पसंभवज्ञानतन्त्रं ।

यथा लिख्य हि कल्पयन्ते विधयः कल्पसिद्धिदाः ।
तेन कल्प इति प्रोक्तो विकल्परहितात्मभिः ॥

तत्रेदं पद्मकुलकल्पसंभवज्ञानतन्त्रं ।

रागो विकल्पसंभूतः स च पद्मे प्रतिष्ठितः ।
ततस्तु कल्पस्थायिन्यः सिद्धयः संभवन्ति हि ॥

तत्रेदं मणिकुलकल्पसंभवज्ञानतन्त्रं ।

मणयो ह्यविकल्पास्तु प्रभावैः सुसमुच्छ्रिताः ।
एवंस्तु सिद्धयो दिव्याः संभवन्त्यविकल्पिताः ॥

इत्याह भगवान् वज्रधरः ॥

सर्वकुलकल्पसंभवज्ञानतन्त्रं ॥ ॥

अथ सर्वकल्पहृदयसंभवज्ञानतन्त्रं ॥

मनीषितविधानैस्तु सिध्यते तु मनीषितं ।
समाधिसाधनो हृद्स्थः हृदयस्तु तेन चोच्यते ॥

अथ सर्वमुद्रासंभवज्ञानतन्त्रं ॥

दुरतिक्रमो यथाभेद्यो राजमुद्राग्रशासनः ।
महात्मचिह्नविश्वस्तु तथा मुद्रेति कीर्तिता ॥

अथ मन्त्रसंभवज्ञानतन्त्रं ॥

अनतिक्रम[णो च] हि दुर्भेद्यो गुह्य एव च ।
मन्त्र्यते गुह्यसिद्धत्वं मन्त्रस्तेन निरुच्यते ॥

अथ विद्यासंभवज्ञानतन्त्रं ॥

अविद्याविप्रणाशाय वाग्विद्यो[त्तम]सिद्धये ।
विद्यते वेदनासिद्धिस्तेन विद्या प्रकीर्तिते ॥

त्याह् भगवान् वज्रधरः ॥

सर्वकल्पहृदयादिसंभवज्ञानतन्त्रं । ॥

अथ सर्वकल्पज्ञानोत्पत्तितन्त्रं ॥

तत्रादित एव हृदयज्ञानोत्पत्तितन्त्रो भवति ॥

हृदयं जप्य विज्ञेयमात्मनो वा परस्य वा।
भव्यं भूतं भविष्यं च यः पश्यति शृणोति च ॥

तत्रेदं मुद्राज्ञानोत्पत्तितन्त्रं भवति।

मुद्रामेकतरां बध्वा यथावद्विधिना मनः।
कृत्वा निरीक्षेल्लोकं तु सर्वं ज्ञेयं यथोपरी-॥ ति ॥

तत्रेदं मन्त्रज्ञानोत्पत्तितन्त्रं।

सकृदुच्चारयन्मन्त्रं ब्रूयाज्जिह्वां स्वकीन्तु यः।
भव्यं भूतं भविष्यं च तत्सर्वं सत्यमावहेद् ॥

इत्याह भगवानवलोकितेश्वरः ॥

तत्रेदं विद्याज्ञानोत्पत्तितन्त्रं।

सकृदुच्चार्य विद्यां तु वेदयेन्मनसा स तु।
भव्यं भूतं भविष्यं [च वज्रवाक्शास]नं यथे-॥ ति ॥

सर्वकल्पज्ञानोत्पत्तिविधिविस्तरतन्त्रं परिसमाप्तं ॥ ॥

अथ सर्वकुलसाधारणगुह्यकायवाक्चित्तवज्रमुद्रासाधनतन्त्रं भवति ॥

तत्रेदं तथागतकुलगुह्यकायमुद्रासाधनं भवति।

यथा तथा निषण्णस्तु पर्यङ्केन तु साधयेत्।
यथा लेख्यानुसारेण महासत्वः प्रसिध्यती—॥

त्याह भगवान् वज्रसत्वः ॥

तत्रेदं वज्रकुलगुह्यकायमुद्रासाधनं भवति।

प्रत्यालीढसुसंस्थानं यथा लेख्यानुसारतः।
साधयेत सुसंक्रुद्धः सिध्यते नात्र संशय ॥

इत्याह भगवान् वज्रहुंकारः ॥

तत्रेदं पद्मकुलगुह्यकायमुद्रासाधनं भवति।

वज्रपर्यङ्कसंस्थं तु वज्रबन्धं करद्वयं।
समाधिकायो भूत्वा तु साधयेत्पद्मसंभवम् ॥

इत्याह भगवान् पद्मसत्वः ॥

तत्रेदं मणिकुलगुह्यकायमुद्रासाधनं भवति।

उत्थितो वा निषण्णो वा चङ्क्रमन् वा यथा तथा।
वज्ररत्नाभिषेकेण सिध्यते नात्र संशय ॥

इत्याह भगवान् वज्रगर्भः।

तत्रेदं तथागतकुलगुह्यवाङ्मुद्रासाधनतन्त्रः ।

नातिस्यन्दितजिह्वाग्रदन्तोष्ठद्वयसंयुता ।
साधयेत्सर्वकल्पान्तु वज्रवाक्स्वरवर्जिते-।।

त्याह भगवान् वज्रवाचः ।

तत्रेदं वज्रकुलगुह्यवाङ्मुद्रासाधनतन्त्रं ।

मेघघूल्लित-हुं-कारक्रोधगंभीरवाक्स्थिरा ।
क्रोधस्फुटा महावज्रं वज्रक्रोधवाग्साधनम् ।।

इत्याह भगवान् वज्रहुंकारः ।।

तत्रेदं पद्मकुलगुह्यवाङ्मुद्रासाधनतन्त्रं ।

अनुच्छ्वासं सूक्ष्म[श्वासं सूक्ष्मवाचासुसं] स्फुटं ।
सिध्यते सर्वजापानि समाधिज्ञानगर्भये-।।

त्याह सर्वतथागतसमाधिज्ञानगर्भः ।।

तत्रेदं मणिकुलगुह्यवाङ्मुद्रा[साधन] तन्त्रं।

सुपरिस्फुटया वाचा प्रणामपरमः सदा ।
जपेते विनयैश्चापि सर्वमाशु प्रसिध्यती-।।

त्याह भगवान् सर्वतथागतपूजावि[धिविस्त]रकर्मा ॥

तत्रेदं तथागतकुलगुह्यचित्तमुद्रासाधनतन्त्रं ।

कामो हि भगवांच्छश्वः सर्वसत्वसुखप्रदः ।
वज्रसत्वः स्वयमे[व इ]ति भाव्याशु सिध्यती-।।

त्याह भगवान् कामः ।

तत्रेदं वज्रकुलगुह्यचित्तमुद्रासाधनतन्त्रं ।

सर्वसत्वहितार्थाय दुष्टानां [विनयार्थाय] ।
बुद्धशासनरक्षार्थं क्रोधः सिद्धिकरः पर ॥

इत्याह भगवान् सर्वतथागतवज्रहुंकारः ।।

तत्रेदं पद्मकुलगुह्यचित्तमुद्रासाधनतन्तं ।

यथा पद्ममलिष्ठं तु वासदोषैः सुरागवान् ।
तथा मे रागदोषैस्तु भवेद्रागः स सिध्यती-।।

त्याह भगवान् पद्मरागः ।।

तत्रेदं मणिकुलगुह्यचित्तमुद्रासाधनतन्त्रं ।

कदा नु सर्वसत्वानां सर्वकार्यार्थसिद्धये ।
रत्नवर्षाणि वर्षेयं सिद्धः सर्वाशु सिध्यती-।

त्याह भगवानार्याकाशगर्भः ॥

तत्रेदं तथागतकुलगुह्यवज्रमुद्रासाधनतन्त्रं ।

उत्थितो वा निषण्णो वा [चङ्क्रमन्वा] यथा तथा ।
वाममुद्रागुह्यकरः सर्वं कुर्वं स सिध्यती-॥

त्याह भगवां सर्वतथागतगुह्यवज्रपा[णिः ॥

तत्रेदं वज्रकुलगुह्यवज्रमुद्रासाधनतन्त्रं ॥]

यथा तथा स्थितश्चैव कुर्वन् चापि यथा तथा ।
वज्रक्रोधाङ्गुलिं बध्वा वस्त्रच्छन्नां तु सिध्यती-॥

त्याह भगवा[न् सर्वतथागतक्रोधराजः ॥

तत्रेदं पद्मकुलगु]ह्यवज्रमुद्रासाधनतन्त्रं ।

पद्ममुष्टिं तु वामेन करेणाच्छादितेन तु ।
बध्वा यथा शीघ्रं पद्म[सिद्धिमवाप्नुयाद् ॥

इत्याह भगवानवलोकितेश्व]रः ॥

तत्रेदं मणिकुलगुह्यवज्रमुद्रासाधनतन्त्रं ।

रत्नमुष्टिं तु बध्वा वै वामाच्छादितसत्क[रः ।
यथा तथा क्रियते वै रत्नसिद्धिमवाप्नु]याद् ॥

इत्याह भगवानाकाशगर्भः ।

तत्रेदं सर्वकुलगुह्यसाधारणमुद्रासाधनतन्त्रं ।

महामु[द्राप्रयोगेण स्वसत्वसमाधिना हि ।]
वज्रवाग्वज्रदृष्टिभ्यामचिरात्सिद्धिरुत्तमे-॥

त्याह भगवान् सर्वतथागतवज्रसत्वः ॥

सर्वकुलगुह्य [कायवाक्चित्तवज्रमुद्रासाधनतन्त्रं स]माप्तं ॥ ॥

अथ भगवान् वज्रपाणिः सर्वतथागतानाहूयैवमाह । "प्रतिपद्यत भगवन्तस्तथा[गता इदं कल्पमधितिष्ठन्ति प्रतिवेदयन्ति ।"

अथ स]र्वतथागताः पुनः समाजमागम्य, पुनरपि साधुकाराण्यददुः ।

साधु ते वज्रसत्वाय वज्ररत्ना[य साधु ते ।
वज्रधर्माय ते साधु साधु ते] वज्रकर्मणे ॥

सुभाषितमिदं सूत्रं वज्रयानमनुत्तरं ।
सर्वतथागतगुह्यं महायानाभिसंग्रहम् ॥ इ[ति ॥

सर्वतथागततत्वसंग्र]हात् सर्वकल्पानुत्तरतन्त्रं परिसमाप्तं ॥ ॥

CHAPTER 26b

EPILOGUE OF THE SARVA-TATHĀGATA-TATTVA-SAṄGRAHA

अथ वज्रपाणिर्महाबोधिसत्वः उत्थायास[नाद् भगवन्तमनेन नामाष्टशतेनाध्येषामा]स ।

वज्रधातु महासत्व सर्वार्थ परमार्थक ।
शाक्यराज महाज्ञान वज्रात्मक नमोऽस्तु ते ॥ १ ॥

[सत्वसंभव तत्वार्थ सत्वहेतु महानय ।]
महासत्वार्थ कार्यार्थ सत्वसत्व नमोऽस्तु ते ॥ २ ॥

बुद्धधर्म महाधर्म धर्मचक्रप्रवर्तक ।
म[हावचन विद्याग्र्य महासत्व नमोऽस्तु ते ॥] ३ ॥

महाकर्म महारक्ष सर्वकर्म प्रसाधक ।
महात्म सत्वचर्याग्र सत्वहेतो नमोऽस्तु ते ॥ ४ ॥

[सर्वपारमिताप्राप्त सर्वज्ञज्ञानवेदक ।
सर्वस]त्व महोपाय महाप्रज्ञा नमोऽस्तु ते ॥ ५ ॥

महाकारुणिकाग्र्याग्र्य कारुण्य करुणात्मक ।
सर्वदा[न महामैत्री सर्वकार नमोऽस्तु ते ॥] ६ ॥

शाक्यसिंह महाशाक्य शाक्यशाक्य महामुने ।
विभो महाविनय नेयार्थ विनयाग्र नमोऽस्तु [ते ॥ ७ ॥

धर्मधातु समप्राप्त धर्मधातु तथाग]त ।
वज्रनाथ महानाथ सत्वराशि नमोऽस्तु ते ॥ ८ ॥

महाप्रभ महालोक महावीर्य महाबल ।
म[हावीर सुवीराग्र्य शम्भु वीर नमोऽस्तु ते ॥] ९ ॥

ब्रह्मन् स्वयंभू भगवन् शाक्यवीर महामुने ।
सर्वात्मक मुने शुद्ध धर्मराज नमोऽस्तु ते ॥ १० ॥

आ[काशकाय कायाग्र्य त्रिकायाकायभा]वक ।
सर्वकाय महाकाय वज्रकाय नमोऽस्तु ते ॥ ११ ॥

अवाच वाच [वाचाग्र्य त्रिवाचावाचदर्शक ।
सर्ववाच] सुमहावाच वज्रवाच नमोऽस्तु ते ॥ १२ ॥

अचित्त चित्त चित्ताग्र्य त्रिचित्ताचित्तदर्शक ।
सर्वचित्त महाचित्त [वज्रचित्त नमोऽस्तु ते ॥ १३ ॥

अवज्र वज्र व]ज्राग्र्य त्रिवज्रावज्रशोधक।
सर्ववज्र महावज्र वज्रवज्र नमोऽस्तु ते ॥ १४ ॥

सर्वव्यापि भवाग्र्याग्र्य सु[गताधिपति जय।
त्रैधातुकमहाराज] वैरोचन नमोऽस्तु ते ॥ १५ ॥

नामाष्टशतकंश्च तद्यः कश्चिच्छृणुया सकृत्।
पठेद्वा भावयेद्वापि [सर्वो बुद्धत्वमाप्नुयात् ॥ १६ ॥

अध्येषया]मि त्वान्नाथ सर्वसत्वहितार्थतः।
महाकारुण्यमुत्पाद्य धर्मचक्रं प्रवर्तये–॥ १७ ॥ ति ॥

[अथ भगवान् वैरोचनः सर्वतथागताधिपतिना]ज्ञावचनमुपश्रुत्य, सर्वतथागतानाहूयैवमाह। "प्रतिपद्यत भगवन्तः तथागताः समा[जमापन्तुम्" इति ॥

अथ सर्वतथाग]ताः समाजमापद्य, इमां गाथामभाषन्त।

सर्वसत्वहितार्थाय सर्वलोकेषु सर्वतः।
[यथा विनयतो विश्वं धर्मचक्रं प्रवर्त्यताम् ॥ इति ॥]

अथास्मिन् भाषितमात्रे सर्वबुद्धक्षेत्रेषु सर्वलोकधातुषु सर्वसत्वानां पुरतः स्फर्यं यावत्सर्व[परमाणुरजोमण्डलेषु भगवान् शाक्यमुनि]स्तथागतो धर्मचक्रं प्रवर्तयामास ॥

अथ वज्रपाणिर्महाबोधिसत्वः पुनरपीमां गाथामभाष[त्।

सर्वसत्वहितार्थाय सर्वलोकेषु] सर्वतः।
यथा विनयतो विश्वं वज्रचक्रं प्रवर्त्यताम् ॥ इति ॥

अथास्मिन् भाषितमात्रे तथैव सर्वबुद्धक्षे[त्रेषु यावत् सर्वपरमाणुरजोमण्डलेषु भ]गवान् वज्रधातुस्तथागतो वज्रधात्वादीन् सर्ववज्रचक्राणि प्रवर्तयामास ॥

अथ त्रिलोकविजयो [महाबोधिसत्व इमां] गाथामभाषत्।

सर्वसत्वहितार्थाय सर्वलोकेषु सर्वतः।
यथा विनयतो विश्वं क्रोधचक्रं प्रवर्त्यताम् ॥ [इति ॥

अथास्मिन् भाषितमात्रे तथैव] सर्वबुद्धक्षेत्रेषु यावत् सर्वपरमाणुरजोमण्डलेषु भगवांस्त्रिलोकविजयी तथागतः सर्वतथागतक्रो[धचक्रं प्रवर्तयामास ॥

अथार्याव]लोकितेश्वरो बोधिसत्व इमां गाथामभाषत्।

सर्वसत्वहितार्थाय सर्वलोकेषु सर्वतः।
यथा वि[नयतो विश्वं पद्मचक्रं प्रवर्त्यताम् ॥ इति ॥]

अथास्मिन् भाषितमात्रे तथैव सर्वबुद्धक्षेत्रेषु यावत् सर्वपरमाणुरजोमण्डलेषु भगवां धर्मराजा तथागतः पद्मचक्रं प्रवर्तयामास ॥

अथार्याकाशगर्भो बोधिसत्व इमां गाथामभाषत्।

सर्वसत्वहितार्थाय सर्वलोकेषु सर्वतः।
यथा विनयतो विश्वं मणिचक्रं प्रवर्त्यताम् ॥ इति ॥

अथास्मिन् [भाषितमात्रे सर्वबुद्धक्षेत्रान्तर्गत]सर्वसत्वाः सूक्ष्मा वा स्थूला वा ते सर्वे सर्वतथागतं सुमेरुगिरिमूर्ध्नि

वज्रमणिरत्नशिखरकूटागारे सर्वतथा[गतसिंहासने स्थित्वा वज्रधात्वादीन् सर्व]चक्राणि प्रवर्तयन्तं सर्वतोऽद्राक्षुरिति ॥

अथ वज्रपाणिर्महाबोधिसत्वः तस्यां वेलायामिमां गा[थामभाषत्।

सर्वसत्वहितार्थाय प्र]तिपद्यस्व कार्यतः।
मानुष्यमवताराग्र्यं वज्रचक्रं प्रवर्त्यताम् ॥ इति ॥

अथ पुनरपि भगवान् सर्वत[थागतानाहूयैवमाह। "प्रतिपद्यत भ]गवन्तस्तथागताः पुनः समाजमापन्तुम्" इति ॥

अथ भगवन्तः सर्वतथागताः पुनः समाजमा[पद्य, वैरोचनस्य हृदये प्रविष्टा] इति ॥

अथ भगवान् वैरोचनस्तथागतः सर्वतथागतकायवाक्चित्तवज्रमात्मानमवबुध्य, व[ज्रपाणिमेवमाह। "प्रविश कुलपु]त्र त्वमपि मम हृदये; सर्वतथागतसर्ववज्रकुलसर्वमण्डलाः सर्वतथागतहृदयेषु समनुप्र[विष्टाः"।

अथ वज्रपाणिर्महाबोधिसत्वः] सर्वतथागतानुज्ञात इमां गाथामभाषत्।

सर्वसत्वहितार्थाय प्रतिपद्यामि सर्वतः।
प्रवेष्टुं सर्वबुद्धानां का[यवाक्चित्तस्य वज्र ॥ इति ॥

अथास्मिन् भा]षितमात्रे यावन्तस्तथागताः सर्वलोकधातुपरमाणुरजःसमेषु सर्वलोकधातुषु तिष्ठन्ति ते तथा [गता एकैकेन सर्वलोक]धातुपरमाणुरजःसमाः स्फरणकायाः भगवतो वैरोचनस्य हृदये प्रविष्टाः।

अथ वज्रपाणिर्महाबोधिस[त्वः सर्वतथागतेषु] भगवतश्च वैरोचनस्य सर्वकायेषु सर्ववाक्प्रवर्तनस्थानेषु सर्वचित्त-सन्ततिप्रवाहेषु सर्ववज्रनयेषु सर्वा[ङ्गप्रत्यङ्गेषु सर्वस्थानेषु] सर्वलक्षणेषु सर्वानुव्यञ्जनेषु सर्वरोमकूपेषु सर्वपरमाणु-रजोमण्डलेषु च हृदयेषु प्रविष्ट्वा स्थिता इति ॥

[अथ भगवानचिराभि] संबुद्धः सर्वतथागतकायवाक्चित्तवज्रः सर्वतथागतकायमात्मानमवबुध्य, तस्मात् सुमेरु-गिरिमूर्धाद्येन [बोधिमण्डं तेनोपजगा]मोपेत्य, भगवतो बोधिवृक्षस्याधस्तात् लोकानुवर्तनतया, पुनस्तृणानि गृह्य द-मुदानमुदानयामास।

अ[हो ह्यग्रार्थ आत्मनः स]त्वार्थः सत्वशासिनां।
यद् विनेयवशाद्धीरास्तीर्थदृष्ट्या विहन्ति हि ॥

अविनेयस्य लोकस्य दुर्दृष्ट्यान्धस्य सर्वतः।
ज्ञा[नाभया शोधनार्थं बुद्धबो]धिमवाप्नुयाद् ॥ इति ॥

अथ कामावचरा देवा भगवतस्तत्वमजानन्तो ब्रूवन्। "किं भो श्रमण एवं तीव्राण्येवं रौद्राणि बो[ध्यर्थाय] दुःखा-न्युत्सहसी—" ति।

अथ भगवांस्तानि तृणान्यास्तर्योपविष्ट्वा तां देवानेवमाह। "प्रतिपद्यत मार्षा मम बोधिं [प्राप्तुम्" इति।

अथ कामाव]चरा देवा भगवतो भाषितस्यार्थमजानन्तो येन शक्रो देवानामिन्द्रः तेनोपजगामोपेत्य, शक्रं देवानामिन्द्रमि[दं वृत्तान्तमारोचया]मास। अथ शक्रो देवानामिन्द्रः सर्वकामावचरदेवसङ्घपरिवारो रूपावचराधिपतिं महाब्रह्माणमिदं [वृत्तान्तमारोचया]मास। अथ महाब्रह्मा सर्वकामावचररूपावचरदेवसहितस्त्रिलोकाधिपतिमीश्वरं तं वृत्तान्तमारोच[यामास॥

अथ महे]श्वरस्त्रिलोकाधिपतिर्नारायणादीन् सर्वदेवाधिपतीनेवमाह। "प्रतिपद्यत मार्षास्तथागतोऽर्हं सम्यक्संबुद्धो [लोकानुवर्तनतया पु]नरनुत्तरां सम्यक्संबोधिं दर्शयिष्यति। मामन्त्र्या एवं विद्येन् न तथागतो मानुषो भवति, देवा एव [तथागता भवन्ति], मनुषे घटयेयुः, न तथागतत्व इति। तत्साधु प्रतिपद्यत तत्र पूजनाय गन्तु"मिति।

अथ महेश्व[रादिदेवाधिपतयः स्थित्वा] बोधिमण्डे, येन च भगवान् बोधिमण्डनिषण्णः तेनोपजगामोपेत्य च भग-

वतः पादौ शिरसाभिवन्द्य, भगवन्तमेवमाहुः। ["प्रतिपद्य भ]गवन्नस्माकमनुकम्पामुपादाय, अस्मात् तृणसंस्तरादुत्थाय, दिव्येष्वासनेषु निषद्यानुत्तरां समयक्संबोधिमभिसंबोद्धुं" ॥

अथ [भगवान् दे]वाधिपतीनेवमाह। "प्रतिपद्यत मार्षा ममानुत्तरां समयक्संबोधिं दातु"मिति। अथ ते एवमाहुर्। "न वयं भगवं समर्था बोधिं द[ातुं।] यदि वयं समर्था भवेमस्तदात्मनैवाभिसंबोधिमभिसंबुध्येमही–" ति ॥

अथ भगवानिदमेवार्थमुद्दीपयं भूयस्या मात्रया इ[मां गाथा]मभाषत्।

न सा रूपि न चारूपि न सत्यं न मृषाशुचि।
बुद्धबोधिरिदं ज्ञानमवबुध्य जिनो भवेद् ॥ इति ॥

अथ ते देवाधिप[तयो मु]हूर्तं तूष्णीम्भावेन तस्थुः ॥ अथ भगवांस्ततस्तृणासनादुत्थाय, तां देवानेवमाह। "प्रतिपद्यत मार्षा ईदृशं ज्ञानमवबोद्धुं।" [त ए]वमाहुर्। "न शक्तमो भगवन्" ॥

अथ भगवांस्तस्मिन्नेवासने निषद्येमां गाथामभाषत्।

मनसः प्रतिवेधेन बोधिचित्तं दृढीकुरु।
वज्रं सत्वे दृढीकृत्वा बुद्धमात्मानुभावय ॥

अथ त एवमाहुर्। "एवमस्त्व्" इति कृत्वा सर्वे प्रक्रान्ताः ॥

अथ भगवान् रात्रौ प्रभातायां [लोकानु]वर्तनतया मारां जित्वानुत्तरां सम्यक्संबोधिमभिसंबुध्य, अशेषानवशेष-[सत्वधातुषु सर्वसत्वहितार्थाय, स्वहृद]यावस्थितमार्यवज्रपाणिनमनेन नामाष्टशतेनाभिस्तौति।

वज्रसत्व महासत्व [महायान महात्मक।
महाप्रभ महाशु]द्ध महानाथ नमोऽस्तु ते ॥ १ ॥

वज्रराज महावज्र वज्र सर्वतथागत।
महासत्व महावीर्य महोपाय नमोऽस्तु ते ॥ २ ॥

वज्ररा[ग महाशुद्ध स]र्वसौख्य महासुख।
सुखाग्र्यानादिनिधन महाकाम नमोऽस्तु ते ॥ ३ ॥

वज्रसाधु महातुष्टि साधुकार प्रहर्षक।
महाहर्ष महामो[दन] प्रामोद्य नमोऽस्तु ते ॥ ४ ॥

वज्ररत्न महाराज स्वभिषेक महामते।
सर्वरत्न महाशोभ विभूषण नमोऽस्तु ते ॥ ५ ॥

वज्रतेज म[हातेज] वज्रप्रभ महाद्युते।
जिनप्रभ महाज्वाल बुद्धप्रभ नमोऽस्तु ते ॥ ६ ॥

वज्रकेतु महाकेतु महाध्वज धनप्रद।
आकाशकेतो महा[यष्टि त्या]गध्वज नमोऽस्तु ते ॥ ७ ॥

वज्रहास महाहास महाप्रीति प्रमोदन।
प्रीतिवेग रतिप्रीते धर्मप्रीते नमोऽस्तु ते ॥ ८ ॥

वज्रधर्म महा[धर्म सर्व]धर्म सुशोधक।
बुद्धधर्म सुधर्माग्र्य रागधर्म नमोऽस्तु ते ॥ ९ ॥

वज्रतीक्ष्ण महाकोश प्रज्ञाज्ञान महामते।
पापच्छेद म[हाखड्ग बु]द्धशस्त्र नमोऽस्तु ते ॥ १० ॥

वज्रहेतु महाचक्र बुद्धचक्र महानिधि।
सर्वमण्डल धर्माग्र धर्मचक्र नमोऽस्तु ते ॥ ११ ॥

वज्रभा[ष महाभाष] निःप्रपञ्च महाक्षर।
अनक्षर महाजाप बुद्धवाच नमोऽस्तु ते ॥ १२ ॥

वज्रकर्म सुकर्माग्र्य महाकर्म सुकर्मकृत्।
गुह्यपू[ज महापूज बुद्धपूज नमो]ऽस्तु ते ॥ १३ ॥

वज्ररक्ष महावर्म कवचाग्र्य महादृढ।
महारक्ष महासार बुद्धवीर्य नमोऽस्तु ते ॥ १४ ॥

वज्रयक्ष महाक्रोध सर्वदुष्टभयानक।
सर्वबुद्धमहोपाय अग्रयक्ष नमोऽस्तु ते ॥ १५ ॥

महासन्धि महामुद्र महासमयबन्धक।
महामुष्टे समुद्राग्र्य वज्रमुष्टे नमोऽस्तु ते ॥ १६ ॥

वन्द्यो मान्यश्च पूज्यश्च सत्कर्तव्यस्तथागतैः।
यस्मादनादिनिधनं बोधिचित्तं त्वमुच्यसे ॥ १७ ॥

त्वामासाद्य जिनाः सर्वे बोधिसत्वाश्च शौरिणः।
संभूता संभविष्यन्ति बुद्धबोध्यग्रहेतवः ॥ १८ ॥

नमस्ते वज्रसत्वाय वज्ररत्नाय च ते नमः।
नमस्ते वज्रधर्माय नमस्ते वज्रकर्मणे ॥ १९ ॥

त्वामभिष्टुत्य नामाग्रैः प्रणम्य च सुभावतः।
यत्पुण्यं तेन सर्वो हि बुद्धबोधिमवाप्नुयात् ॥ २० ॥

येदमुच्चारयेत्सम्यग्नामाष्टशतमुत्तमं।
सकृद्वारं सुभक्तिस्थः सर्वबुद्धत्वमाप्नुयाद् ॥

इत्याह भगवान् बुद्धः ॥

अथ वज्रपाणि महाबोधिसत्वं ते सर्वतथागता [एकक ठे]न साधुकाराण्यनुप्रादान् ॥

साधु ते वज्रसत्वाय वज्ररत्नाय साधु ते।
वज्रधर्माय ते साधु साधु ते वज्रकर्मणे ॥

सुभाषितमि[दं सूत्रं] वज्रयानमनुत्तरं।
सर्वतथागतं गुह्यं महायानाभिसंग्रहम् ॥ इति ॥

इदम् [अवोचद्भगवानात्तमनाः सतथागतार्यबोधिसत्वश्च सर्वः स्वहृदये प्रविश्य भगवतश्च वज्रसत्वस्य च] भाषितमभ्यनन्दन्निति ॥

[सर्वतथागततत्वसंग्रहं नाम महायानसू]त्रं समाप्तम् ॥ ॥

॥ ओं नमो बुद्धाय ॥